Vol.-4 No.-1
Year-2024

ISSN : 2583-2271

# मनीषा

(संस्कृतविषयिणी वार्षिकी विशेषज्ञसमीक्षिता शोधपत्रिका)

# MANĪṢĀ

(A Research Journal of Sanskrit)

DOUBLE-BLIND PEER REVIEWED JOURNAL

स्नातकोत्तरसंस्कृतविभागः
सबं-सजनीकान्तमहाविद्यालयः
लुटुनिया, पश्चिममेदिनीपुरम्-७२११६६, पश्चिमबङ्गः

# मनीषा

## (संस्कृतविषयिणी वार्षिकी विशेषज्ञसमीक्षिता शोधपत्रिका)

# MANĪṢĀ

(A Research Journal of Sanskrit)

DOUBLE-BLINDED PEER REVIEWED JOURNAL

**ISSN: 2583-2271**

**Vol -4 No. 1**

**2024**

**स्नातकोत्तरसंस्कृतविभागः**

**सबं-सजनीकान्तमहाविद्यालयः**

**लुटुनिया, पश्चिममेदिनीपुरम्, ७२११६६, पश्चिमबङ्गः**

# मनीषा

## (संस्कृतविषयिणी शोधपत्रिका)


### मुख्यसम्पादकः

| | |
|---|---|
| **अध्यापकः (डॉ.) तपनकुमारदत्तः** | अध्यक्षः, सबं-सजनीकान्तमहाविद्यालयः, विद्यासागरविश्वविद्यालयः |

### सम्पादकः

| | |
|---|---|
| **डॉ. भवशङ्करमुखार्जी** | सहाचार्यः, संयोजकः, स्नातकोत्तरसंस्कृतविभागः, सबं-सजनीकान्तमहाविद्यालयः, विद्यासागर-विश्वविद्यालयः |

### सहसम्पादकौ

| | |
|---|---|
| **डॉ. गगनचन्द्रदे** | सहाचार्यः, विभागाध्यक्षः (स्नातकोत्तरीयस्तरः), स्नातकोत्तरसंस्कृतविभागः, सबं-सजनीकान्त-महाविद्यालयः, विद्यासागरविश्वविद्यालयः |
| **डॉ. सुमन्तचौधुरी** | सहायकाध्यापकः, विभागाध्यक्षः (स्नातकस्तरः), स्नातकोत्तरसंस्कृतविभागः, सबं-सजनीकान्त-महाविद्यालयः, विद्यासागरविश्वविद्यालयः |

### सम्पादकमण्डली

| | |
|---|---|
| **अध्यापकः (डॉ.) बिष्णुपदमहापात्रः** | आचार्यः, न्यायविभागः, श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविश्वविद्यालयः, निउ-दिल्ली |
| **डॉ. केशवचन्द्रमहापात्रः** | अध्यक्षः, नरेन्द्रनाथसंस्कृतमहाविद्यालयः, प्रियबागः, ओडिशा |
| **डॉ. चन्दनभट्टाचार्यः** | आचार्यः, संस्कृतविभागः, गौरबङ्गविश्वविद्यालयः, मालदा, पश्चिमबङ्गः |
| **डॉ. सुशान्तकुमारराजः** | सहाचार्यः, केन्द्रियसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी, ओडिशा |
| **डॉ. बुद्धेश्वरषडङ्गी** | सहाचार्यः, श्रीसीतारामवेदिक-आदर्शसंस्कृतमहाविद्यालयः, कलिकाता, पश्चिमबङ्गः |
| **डॉ. गोपीकृष्णन-रघुः** | सहायकाध्यापकः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्, बेलुडमठम्, हाओडा, पश्चिमबङ्गः |

# उपदेष्टृमण्डली

| | |
|---|---|
| **अध्यापकः (डॉ.) गोपबन्धुमिश्रः** | प्राक्तन उपाचार्यः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरातः |
| **अध्यापकः (डॉ.) गोपालमिश्रः** | भूतपूर्व उपाचार्यः, गौडबङ्गविश्वविद्यालयः अध्यापकचरः, संस्कृतविभागः, रवीन्द्रभारतीविश्व-विद्यालयः, कलिकाता, पश्चिमबङ्गः |
| **अध्यापकः (डॉ.) गोपालकृष्णदाशः** | अध्यापकचरः, उत्कलविश्वविद्यालयः, भुवनेश्वरः, ओडिशा |
| **अध्यापिका (डॉ.) सर्वाणी गाङ्गुली** | वरिष्ठा फेलो, ICSSR, संस्कृतविभागः, विद्यासागरविश्वविद्यालयः, मेदिनीपुरम्, पश्चिमबङ्गः |
| **अध्यापकः (डॉ.) गोविन्दचन्द्रकरः** | अध्यापकचरः, व्याकरणविभागः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी, ओडिशा |

# MANĪṢĀ

## (*A Research Journal of Sanskrit)*


## CHIEF EDITOR

| | |
|---|---|
| **Professor (Dr.) Tapan Kr. Dutta** | Principal, Sabang Sajanikanta Mahavidyalaya, Vidyasagar University |

## EDITOR

| | |
|---|---|
| **Dr. Bhaba Shankar Mukherjee** | Associate Professor, Co-ordinator, P.G. Department of Sanskrit, Sabang Sajanikanta Mahavidyalaya, Vidyasagar University |

## ASSOCIATE EDITORS

| | |
|---|---|
| **Dr. Gagan Chandra Dey** | Associate Professor and H.O.D. (PG Section), P.G. Department of Sanskrit, Sabang Sajanikanta Mahavidyalaya, VU |
| **Dr. Sumanta Chowdhury** | Assistant Professor and H.O.D. (UG Section), P.G. Department of Sanskrit, Sabang Sajanikanta Mahavidyalaya, VU |

## EDITORIAL BOARD

| | |
|---|---|
| **Dr. Bishnupada Mahapatra** | Professor in Nyaya, Shri Lal Bahadur Shastri National Sanskrit University, New Delhi |
| **Dr. Keshab Chandra Mahapatra** | Principal, Narendranath Sanskrit College, Priyabag, Odisha |
| **Dr. Chandan Bhattacharyya** | Professor, Department of Sanskrit, Gour Banga University, Malda, W.B. |
| **Dr. Susanta Kumar Raj** | Associate Professor in Sahitya, Central Sanskrit University, Shri Sadashiv Campus, Puri, Orisha |
| **Dr. Buddheswar Sarangi** | Associate Professor, Sri Sitaram Vedic Adarsha Sanskrit Mahavidyalaya, Kolkata, W.B. |
| **Dr. Gopikrishnan Reghu** | Assistant Professor, Ramakrishna Mission Vivekananda Educational and Research Institution, Belur Math, Howrah, W.B. |

# ADVISORY BOARD


| | |
|---|---|
| **Prof. (Dr.) Gopabandhu Mishra** | Formar Vice-Chancellor, Somnath Sanskrit University, Gujarat |
| **Prof. (Dr.) Gopal Mishra** | Former Vice-Chancellor, Gour Banga University, Professor, Department of Sanskrit, Rabindra Bharati University, Kolkata, W.B. |
| **Prof. (Dr.) Gopal Krishna Dash** | Ex Professor, Utkal University, Bhubaneswar, Odisha |
| **Prof. (Dr.) Sarbani Ganguly** | Senior Fellow, ICSSR, Department of Sanskrit, Vidyasagar University, Midnapore, W.B. |
| **Prof. (Dr.) Govinda Chandra Kar** | Ex. Professor in Vyakarana, Shri Jagannath Sanskrit University, Puri, Odisha |

**मनीषा - संस्कृतविषयिणी शोधपत्रिका**

(*Double-Blinded विशेषज्ञसमीक्षिता शोधपत्रिका*)

**MANĪṢĀ** - *A Research Journal of Sanskrit*
*(Double-Blinded Peer Reviewed Journal)*

**ISSN - 2583-2271 (Vol -4, No. 1)**

प्रकाशनवर्षम् – २०२४
**Year of Publishing: 2024**

प्रकाशनदिनाङ्कः – ३०.१२.२०२४
**Date of Publication – 30.12.2024**

विषयः – साहित्यम्
**Subject – Literature**

भाषा – संस्कृतम्
**Language : Sanskrit**

प्रकाशनप्रारूपम् - आन्तर्जालिकम्
**Publication format - Online**

प्रकाशनावधिः - वार्षिकी
**Frequency : Annual**

प्रकाशकः – अध्यक्षः
सबं-सजनीकान्त-महाविद्यालयः
लुटुनिया, सबं, पश्चिममेदिनीपुरम्, पत्रसंकेतः - ७२११६६
पश्चिमबङ्गः, भारतवर्षम्

**Publisher – Principal**
*Sabang Sajanikanta Mahavidyalaya*
Lutunia, Sabang, Paschim Medinipur, 721166
West Bengal, India

© अध्यक्षः, सबं सजनीकान्तमहाविद्यालयः

© *Principal, Sabang Sajanikanta Mahavidyalaya*

E-mail - manisha@sabangcollege.ac.in
Website - https://sabangcollege.ac.in/e-journals/

# From the Desk of Chief Editor

*Sanskrit literature is an ocean like literature, where inexhaustible amount of wealth deposited in it. People with having profound knowledge try to collect the hidden treasure from it.*

*PG Department of Sanskrit with their limited resource tries to cultivate the hidden treasure deposited in the Ocean like treasure* **Manīṣā.** *The journal of the department is self-explanatory which justifies the intellects there in Sanskrit Literature. It is said –*

*Buddhirmanīṣā dhiṣaṇā dhīḥ prajñā śemuṣī matiḥ.*
*Prekṣopalabdhiścitsaṃvitpratipatjñapticetanā*

*- Amarakoṣa*

*Scholars who are keen to justify their intellect shares their treasure in the form of writings. PG Department of Sanskrit takes their utmost care to exhibit the same in the domain of Sanskrit World through their journal* **Manīṣā.** *Subjects like Sanskrit Literatures, Philosophy, Grammars, Architecture etc. ornamented in the journal.*

*I shall be highly pleased if the pupil of sanskrit accepts the essence of the writings.*

*Faculties of P.G. Department are very much punctual as well as laboriour to enhance the richness of the department and the excellence of the college as a whole.*

*The journal will more be attractive if the thirst of academicians as well as scholars be quenched through this* **Manīṣā.** *In this respect, I do humbly appreciate the skills of Dr. Sumanta Chowdhury a young energetic faculty who devoted even a moment to collect, correct, even compute the materials to ornament the journal so that the academic world could cherish the essence of writings there in.*

Prof. (Dr.) Tapan Kr. Dutta
The Chief Editor
Manīṣā - A Research Journal of Sanskrit

# सम्पादकीयम्

संस्कृतभाषा भारतीयानां प्राणरूपिणी, कर्तव्याकर्तव्यसम्पादिनी, सत्पथप्रदर्शिनी, आचारविचारप्रवर्तिनी, लोककल्याणकारिणी च सर्वाणि क्षेत्राणि सन्निष्ठितानि सन्ति । तथाहि –

ऋषिणामाद्यानां गहनमननावाप्तसुयशाः
ख्येयं श्रुतीनां शास्त्राणां निखिलगुणतत्त्वार्थनिलया ।
पुरातत्त्वाधारा सकलभवज्ञानाब्धिविभवा
जयेद् दैवी वाणी त्रिभुवनमनोज्ञा बुधप्रिया ॥

श्रीमद्भगवद्गीतायामुक्तम् – " सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते"।

संस्कृतं हि नाम तथाभूतः ज्ञानस्वरूपः पारावारः यस्य सलिले निमज्य न केवलं भाषा अपि तु मानवानां परिवारः समाज एतेषां समष्टिभूतस्य राष्ट्रं तत्समग्रं परिष्कर्तुं शक्यते। यतो हि विद्यते अस्मिन् जलनिधौ विपुलं विशालं समृद्धं शास्त्रभाण्डागारं येषु च उपनिबद्धा मनुजजीवनोपयोगिनो राष्ट्रोन्नत्युपयोगिनश्च ते सर्वेऽप्युत्कृष्टपक्षा यांश्च परिपाल्य राष्ट्रं न केवलं राष्ट्रम् अपितु राजमानं राष्ट्रं सर्वथा महतः राष्ट्रस्य पदमलंकर्तुं शक्नोति । अस्माकं भारताचला सर्वविधवैशिष्ट्यविभूषिता विविधज्ञानविज्ञानविभवविराजिता वसुधा। स चाऽयं सकलोऽपि ज्ञानविभवोऽस्याः संस्कृतभाषया संगृहीतः संरक्षितश्चाऽभिराजते। अतो भारतीयसंस्कृतेः यथावद्विज्ञानाय सुरभारत्याः प्राचीनसंस्कृतशास्त्राणाञ्च ज्ञानमत्यन्तमावश्यकमेव।

मनीषाख्येयं शोधपत्रिका भवतां पण्डितप्रवराणां सहयोगेन स्वाविभावस्य चतुर्थे वत्सरे प्रविश्यामरभारत्याः प्रसारे प्रचारे स्वकीयं गुरणं करोति करिष्यति च। अस्यां शोधपत्रिकायां विविधप्रदेशविश्वविद्यालयमहाविद्यालयेषु ये लब्धवर्णा प्राध्यापकाः शोधछात्राश्च स्वकीयं गवेषणाप्रबन्धं प्रदाय मनीषाकलेवरं विभूषयन्ति ते सर्वेऽपि सर्वदा कार्तज्ञभाजनतां लभन्ते। येषां सहयोगेन एव सफलतया संपादनं सहजं संजातं तेषां निःशेषानां पत्रिकासम्पादनसमितिसदस्यानां तथा ये शास्त्रज्ञा महता परिश्रमेण शोधपत्राणि समीक्ष्य लेखानां निर्वाचने साहाय्यमाचरन् तेषाञ्च कृते साधुवादान् विज्ञापयामि। अवसरेऽस्मिन् सारस्वतकर्मण्येतस्मिन् सहायं कुर्वाणायैः परामर्शदातृसमितिसदस्यैर्धन्यवादं व्याहरामि। महाविद्यालयस्यास्याध्यक्षाः डॉ. तपनकुमारदत्तमहाभागानां निरन्तरप्रोत्साहनेप प्रचेष्टया च प्रकाशमायातीति ते सततं धन्यवादार्हाः।

मनीषापत्रिकाया शोधपत्राणां सङ्कलनात्मकमिदमनर्घमुत्फुल्लितप्रसूनं नव्यशोधार्थिनामध्यापकानाञ्च पाथेयं भविष्यतीत्याशास्महे। मनीषेयं संस्कृतजगत्यां देदीप्यमाना स्यादित्याशास्योपलम्भानां मनीषिणां सदुपदेशास्सर्वदैवास्माकं स्वागतार्हा भवेयुः।

या तत्त्ववाणी परिपूर्णगात्रा या भूयशास्त्रीयनिबन्धयुक्ता ।
या ज्ञानविज्ञानविधानदक्षा सा वै मनीषा जयताद् जगत्याम् ॥

विपश्चितां वशंवदः
सम्पादकः

# सूचीपत्रम्


| क्रमः | प्रबन्धाः | लेखकनाम | पत्रसंख्या |
|---|---|---|---|
| १ | न्यायवैशेषिकनये परमाणुतत्त्वविमर्शः | प्रो. बिष्णुपद-महापात्रः | १-८ |
| २ | पाणिनीयव्याकरणे एकाक्षरसंज्ञा | डॉ. गिरिधारी-पण्डा | ९-१३ |
| ३ | वैदिकवाङ्मये पर्यावरणविज्ञानम् | डॉ. लक्ष्मीकान्त-षडङ्गी | १४-१८ |
| ४ | शङ्करभणितिपर्यालोचनपूर्वकं शब्दानुशासनशास्त्रस्य निःश्रेयससाधनत्वविमर्शः | सुव्रत-मण्डलः | १९-१३ |
| ५ | प्रथमन्यायसूत्रव्याख्याने न्यायभाष्यन्यायसूत्रवृत्त्यो-र्वैलक्षण्यसमीक्षणम् | डॉ. दीपक-गराइ | २४-२९ |
| ६ | तार्किकनये मङ्गलवादविमर्शः | शान्ति-घोषः | ३०-३६ |
| ७ | अद्वैतस्य मूलसिद्धान्तानां स्थापने नव्यन्यायशास्त्रस्य प्रभावविचारः | मिलन-दत्तः | ३७-४३ |
| ८ | न्यायनये ईश्वरस्वरूपविचारः | दीपक-मण्डलः | ४४-५५ |
| ९ | न्यायवैशेषिकनये बुद्धिस्वरूपविमर्शः | गीताराणी-महाण्र्णा | ५६ -६० |
| १० | न्यायव्याकरणशास्त्रदिशा सम्प्रदानकारकविमर्शः | समीर-हालदारः | ६१-६६ |
| ११ | वैशेषिकदर्शनदिशा सर्गप्रलयविमर्शः | मिन्टु-दे | ६७-७२ |
| १२ | सांख्यनये सत्कार्यवादः | विप्लव-सरकारः | ७३-७८ |
| १३ | पूर्वमीमांसादर्शने ध्वनितत्त्वविमर्शः | सुखेन-पोडेलः | ७९-८४ |
| १४ | आधुनिककाले पुरुषार्थान्तर्गतधर्मस्य विर्वतनम् | जलि-रायः | ८५-८९ |
| १५ | काव्यप्रकाशे काव्यस्य कारणानुसन्धाने टीकाकाराणामवदानम् | सुदीप-सरदारः | ९०-९४ |
| १६ | वैदिककाले दण्डनीतिः | डॉ. पङ्कजकुमार-माहाना | ९५-९८ |
| १७ | संस्कृतवाङ्मये पर्यावरणचिन्तने वनस्पतीनामन्यवृक्षाणां च भूमिका | डॉ.रत्नाकर-खुण्टिया | ९९-१०१ |
| १८ | वैदिकयुगे दैनन्दिनजीवने सामाजिकी आर्थिकी च परिस्थितिः | डॉ. विकाश-मण्डलः | १०२-१११ |
| १९ | प्राचीनसंस्कृतवाङ्मये व्यवसायिकशिक्षा | सत्यनारायण-पण्डा | ११२-११९ |

# न्यायवैशेषिकनये परमाणुतत्त्वविमर्शः

**प्रो. बिष्णुपद-महापात्रः**

**आचार्यः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

**नवदेहली – ११००१६**

**सारसंक्षेपः**

*न्यायवैशेषिकनये परमाणुतः जगतः सृष्टिर्भवतीति सिद्धान्तमुररीकृत्य तत्र परमाणुविषये यन्मतं विद्यते खलु न्यायवैशेषिकशास्त्रे तत्र परमाणुविषये दीधितिकारस्य वैमत्यदर्शनेऽपि समेषां न्यायवैशेषिकाणां नये परमाणुषु एव विश्रामः, न तु द्व्यणुकादिषु। एषां परमाणूनां संयोगाद् बहुप्रपञ्चात्मकस्य जगतः सृष्टिः भवतीति न्यायवैशेषिकाणामाशयः । एवञ्च परमाणुभ्यः जगतः सृष्टिर्भवतीति न्यायवैशेषिकयोः नयः आरम्भवादपदेन ख्यातः। तत्र कोऽसौ आरम्भवादः? कश्च आरम्भः? इत्यादिजिज्ञासायामस्माभिः निश्चप्रचं वक्तुं शक्यते यत् परमाण्वाद्युपादानभूतद्रव्ये उपपत्तिरेव आरम्भपदार्थः। आरम्भतत्त्वबुभुत्सया प्रवर्तिता कथा आरम्भवादपदार्थः। आरम्भवादसद्भावे प्रमाणं प्रदर्शयति सूत्रकारः-* ***"व्यक्ताद्व्यक्तानां प्रत्यक्षप्रामाण्यात्"।*** *अर्थाद् व्यक्तानां शरीरादीनां मूर्तपदार्थानां व्यक्तात् कारणीभूतात् मूर्तादेव भूतपदार्थादुत्पत्तिर्भवतीति प्रत्यक्षसिद्धत्वात्। व्यक्ताद् मृत्पदार्थाद् यथा व्यक्तस्य घटस्योत्पत्तिः दृश्यते तथा शरीरस्यापि शुक्रशोणितादिभ्य उत्पत्तिर्भवति एतत्सर्वं मनसि निधाय न्यायवैशेषिकाभिमतपरमाणुतत्त्वस्य विचारोऽत्र समुपस्थापितः ।*

**कुञ्चीशब्दाः –** परमाणुः, द्व्यणुकम्, त्रसरेणुः, आरम्भवादः, अतीन्द्रियः चेत्यादयः।

*****************************************************************************

धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टये मोक्षस्यैव प्राधान्यात् सर्ववादिसम्मतत्वाद् एकविंशत्यात्मकदुःख-निवृत्तिरूपत्वात् तादृशदुःखानां चासह्यत्वात् न्यायदर्शना-नुसारेण मोक्षप्रयोजकीभूतज्ञानसिद्ध्यर्थं तादृशज्ञानवि-ज्ञानपदार्थनिरूपणार्थमादौ सूत्रकारः महर्षिगौतमः न्यायसूत्रं सूत्रितवान्। सूत्रग्रन्थे तावत् भावभिन्नाभावपदार्थानां निरूपणे यदि वैशेषिकदर्शनस्य न्यूनत्वमागच्छति तथा भूताशङ्का नैव करणीया, यतः प्रतियोगिनिरूपणाधीनमेव अभावनिरूपणं भवतीत्यतः नास्ति काचन औलुक्यदर्शनस्य न्यूनता । उक्तं च श्रीमता उदयनाचार्येण-

**"अभावस्तु स्वरूपवनपि पृथक् नोद्दिष्टः।**

**प्रतियोगिनिरूपणाधीननिरूपणत्वात्॥"**[1]

एवञ्च सूत्रकारैः कणादैः-

**"तथाभावे भावप्रत्यक्षत्वाच्च", "एतेनाघटोऽ-गौरधर्मश्च व्याख्यातः"**[2] इत्यादि सूत्रैः प्रागभावादि-पदार्थानां स्वरूपमभ्युपगतम्। अतः न्यायवैशेषिकनये द्रव्यादिभेदात् सप्तपदार्थः प्रसिद्धः, न्यायसूत्रप्रतिपादित-षोडशपदार्थानां वैशेषिकाभ्युपगतसप्तपदार्थेषु अन्तर्भूत-त्वादुभयसिद्धान्ते यदि सप्तपदार्थः स्वीक्रियते तर्हि नास्ति काचन विप्रतिपत्तिः।

**"एते च पदार्था वैशेषिकनये प्रसिद्धाः, नैयायिकानामप्यविरुद्धाः।"**[3]

सप्तपदार्थेषु नवैव द्रव्याणि पृथिव्यादिभेदाद् ।

**"क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः द्रव्याणि।"**[4]

---

[1] कि.वली पृ-२८

[2] वै.सू. ९/१/६-७

[3] न्या.सि.मु. पृ-२५

[4] का.वली.०३

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

पृथिव्यादिचतुर्णां द्वैविध्यमुपपादितं न्यायवैशेषिकदार्शनिकैः। कार्यभूतानां विनाशः। अतः न्यायवैशेषिकनये परमाणूनामतीन्द्रियत्वं जगदुत्पत्त्यु-पादानत्वं निरवयवत्वं नित्यत्वञ्च। परमाणोः किं लक्षणमिति जिज्ञासायामुच्यते शिवादित्येन-

**"निरवयवः क्रियावान् परमाणुः"**[5]

पृथिवीजलतेजोवायुभ्यः परमाणुभ्य एव पार्थिव- तैजस-वायवीयपदार्थानामुत्पत्तिः। "अर्थात् परमाणुद्वय-संयोगाद् द्व्यणुकस्य, द्व्यणुकत्रय-संयोगात् त्रसरेणोः, त्रसरेणुचतुष्टयसंयोगाच्चत-रेणोः- अनेन क्रमेण महतीनां पृथिव्यादीनाम् उत्पत्तिर्भवति। दीधितिकारनये च त्र्यणुकानि एव मूलावयवाः, परमाणवो द्व्यणुकानि च ते नाङ्गीकुर्वन्ति।

**"परमाणुद्व्यणुकयोश्च मानाभावः, त्रुटावेव विश्रामात्"।**[6]

परमाणुविषये दीधितिकारस्य वैमत्यदर्शनेऽपि समेषां न्यायवैशेषिकाणां नये परमाणुषु एव विश्रामः, न तु द्व्यणुकादिषु । एषां परमाणूनां संयोगाद् बहुप्रपञ्चात्मकस्य जगतः सृष्टिः भवतीति न्यायवैशेषिकाणामाशयः। एवञ्च परमाणुभ्यः जगतः सृष्टिर्भवतीति न्यायवैशेषिकयोः नयः आरम्भवादपदेन ख्यातः। तत्र कोऽसौ आरम्भवादः? कश्च आरम्भः? इत्यादिजिज्ञासायामस्माभिः निश्चप्रचं वक्तुं शक्यते यत् परमाण्वाद्युपादानभूतद्रव्ये उपपत्तिरेव आरम्भपदार्थः। आरम्भतत्त्वबुभुत्सया प्रवर्तिता कथा आरम्भवादपदार्थः। आरम्भवादसद्भावे प्रमाणं प्रदर्शयति सूत्रकारः-

**"व्यक्ताद्व्यक्तानां प्रत्यक्षप्रामाण्यात्" ।**[7]

अर्थाद् व्यक्तानां शरीरादीनां मूर्तपदार्थानां व्यक्तात् कारणीभूतात् मूर्तादेव भूतपदार्थादुत्पत्तिर्भवतीति प्रत्यक्षसिद्धत्वात्। व्यक्ताद् मृत्पदार्थाद् यथा व्यक्तस्य घटस्योत्पत्तिः दृश्यते तथा शरीरस्यापि शुक्रशोणितादिभ्य उत्पत्तिर्भवति। तत्र भणति भाष्यकारः वात्स्यायनः-

**"व्यक्तञ्च खलु इन्द्रियग्राह्यं तत्सामान्यात् कारणमपि व्यक्तम्।"**[8]

कारणद्रव्यस्य परमाणुलक्षणस्याप्रत्यक्षत्वेऽपि इन्द्रियग्राह्यं प्रत्यक्षं द्रव्यं कार्यभूतं व्यक्तमित्युच्यते। कार्यद्रव्यसादृश्यात् कार्यकारणयोः सजातीयस्यावश्यकत्वाच्च कारणमपि परमाणुद्रव्यं व्यक्तम्। तत्र च सारूप्यं कार्यकारणयोः मृद्घटादिलक्षणयोः रूपादीनामन्वयदर्शनात् स्थूलपृथिव्यादिषु रूपादिकमस्तीति तत्कारणेनापि रूपादियुक्तेनैव भवितव्यमिति नित्यानामतीन्द्रियाणां पृथिव्यादीनां परमाणुरूपाणां स्थूलभूतकारणत्वम् अनुमीयते। रूपादियुक्तत्वादिति व्यक्ताद् व्यक्तं शरीरादिकमुत्पद्यते। तत्रेदमवधातव्यं यत् मूलसूत्रे "व्यक्ताद् व्यक्तानाम्" इत्यत्र "अव्यक्ताद् व्यक्तानामुत्पत्तिः" इति वक्तव्यमासीत् । एवञ्च 'व्यक्ताद्' इति पदेन सांख्याभिमताव्यक्तायाः त्रिगुणात्मिकायाः प्रकृतेः नैव ग्रहणमित्याशयेन प्रकृतिपरिणामवादं परित्यज्य अक्षपादैः परमाणुवादोऽभ्युपगतः। जयन्तभट्टोऽपि गौतमीयं मतमभ्युपगत्य प्रवदति-

**"व्यक्तादिति कपिलाभ्युपगतत्रिगुणात्मका-व्यक्तरूपकारणनिषेधेन परमाणूनां शरीरादौ कार्ये कारणत्वमाह।"**[9]

---

[5] सप्त.प.

[6] पदार्थतत्त्वनिरूपणम्

[7] न्या.सू. ४/१

[8] न्या.भा.पृ. -३५०

[9] न्या.म.

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

अर्थात् प्रत्यक्षमूलकानुमानप्रमाणेनादृष्टस्य अतीन्द्रियस्य वा मूलभूतं यत्कारणं परमाणुः तस्य सद्भावत्वं सिद्ध्यतीति। उक्तं च भाष्यकारेण-

**"दृष्टो हि रूपादिगुणयुक्तेभ्यो मृत्प्रभृतिभ्यस्तथाभूतस्य द्रव्यस्योत्पादः तस्य चाऽदृष्टस्यानुमानमिति रूपादीनामन्वयदर्शनात् प्रकृतिविकारयोः पृथिव्यादीनां नित्यानामतीन्द्रियाणां कारणभावोऽनुमीयते इति।"**[10]

अभिप्रायस्तु- रूपादिगुणविशिष्टमृत्तिकादिभ्यः तज्जातीयघटादिद्रव्याणामुत्पत्तिः दृश्यते, एतादृशदृष्टान्तेन एव अतीन्द्रियमूलकारणभूतानां परमाणूनां सद्भावत्वं प्रसिद्ध्यति, यतः 'कारणगुणाः कार्यगुणमारभन्ते' इति न्यायेन मूलभूतकारणपरमाणौ ये ये गुणाः विद्यन्ते, तादृशकारणेनोत्पद्यमाने सजातीये कार्यद्रव्येऽपि तादृशगुणानामुत्पत्तिर्भवतीत्यतः परमाणोः सद्भावत्वम्। आचार्येण शङ्करेण -

**"इदानीं परमाणुकारणवादं निराकरोति।"**[11]

स्वकीये शारीरकभाष्ये यद् भाषितं तत्रानुमतं भाति। यतः तस्य शिष्यः सुरेश्वराचार्यः मानसोल्लासग्रन्थे भणति -

**"परमाणुगता एव गुणा रूपरसादयः।**
**कार्ये समानजातीयमारभन्ते गुणान्तरम्॥"**[12]

अस्याः कारिकायाः व्याख्यानावसरेऽस्मिन् तट्टीकाकारः रामतीर्थः गदति- **"समानजातीयमिति विशेषगुणाभिप्रायम्....."।** तेषामयमेवाशयः- परमाणुद्वयगतद्वित्वसंख्याजन्यद्व्यणुके यत्परिमाणं तस्य संख्यायाः वैजात्यगुणेऽपि उपर्युक्तनियमे न कश्चन व्यभिचारः। यतः संख्यापरिमाणयोः द्रव्यमात्रस्य सामान्यगुणत्वाद् विशेषगुणाभावाच्च। यदि तत्र वैदान्तिकैः आशङ्क्यते विशेषगुणस्य किमपि लक्षणं नैयायिकैश्च नाभिहितमित्यपि असङ्गतं भाति। यतः विशेषगुणस्य सामान्यलक्षणं तत्तदाचार्यैः प्रतिपादितत्वात्। तद्यथा- "**विशेषगुणत्वं स्वाश्रयसमानाधिकरणयत्किञ्चिज्जातिव्यापकताव-च्छेदिका या स्वाश्रयसमानाधिकरणद्रव्यविभाज-कोपाधिमदितरभेदव्याप्यतावच्छेदिका गुणत्व-व्याप्याजातिस्तद्वत्त्वमेव बोध्यम्।" "पृथिवीवृत्ति-जलवृत्तिवृत्तीतरसंयोगाऽवृत्तिगुणत्वव्याप्य-जातिमत्त्वं विशेषगुणत्वम्।" कालदिङ्मनोवृत्तिताऽ-नवच्छेदक-जातिमद्गुणत्वं विशेष-गुणत्वमिति।"**[13]

तत्र परमाणोः सद्भावत्वे किमपि मानमस्ति न वेति जिज्ञासायाम् अनुमानप्रमाणं प्रदर्शयति जगदीशः-

**"परमाणुद्व्यणुकानुमानं यथा- त्रसरेणुः सावयवद्रव्यारब्धो बहिरिन्द्रियवेद्यद्रव्यत्वात्, बहिरिन्द्रियवेद्यद्रव्यं यत्तत् सावयवद्रव्यारब्धं यथा घटः। अत्र त्रसरेणुः पक्षः सावयवद्रव्यारब्धत्वं साध्यं बहिरिन्द्रियवेद्यद्रव्यत्वादिति हेतुः, घटो दृष्टान्तः। अनेन द्व्यणुकं परमाणुश्च सिद्ध्यति।"**[14]

यद्यपि त्रसरेण्वाद्यात्मकस्यापि वायोर्गगनादीनाञ्च अतीन्द्रियत्वात् नात्रानुमानस्य प्रमाणत्वं प्रदर्शयितुं युक्तं न केवलमणुद्व्यणुकयोस्तथापि पृथिव्यादिचतुष्टयस्यै-वाणुद्व्यणुकयोः सत्त्वात् प्रथमतः तयोरेवानुमानमभिहितम्। त्रसरेण्वाद्यन्त्यावयव्यन्तेषु द्रव्येषु प्रत्यक्षस्यैव प्रमाणत्वात् त्रसरेणोः पक्षरूपेणोल्लेखः। महत्त्वे सत्युद्भूतरूपवत्त्वात् त्रसरेणुः जालसूर्यमरीचिस्थो दृश्यते। साध्यघटकीभूतं सावयवत्वमवयवसमवेतत्वम-वयवत्वञ्च द्रव्यसमवायि-कारणत्वमिति ज्ञेयम्।

---

[10] न्या.भा.पृ-३५०

[11] शा.भा.परमाणुजगत्कारणत्वाधिकरणम्।

[12] मानसोल्लासः

[13] न्या.सि.मु.

[14] त.मृ. पृ-१४

द्रव्यारब्धत्वञ्च द्रव्यनिष्ठसमवायिकारणतानिरूपित-द्रव्यनिष्ठकार्यतावत्त्वम्। द्रव्यारब्धत्वमात्रस्य साध्यत्वेऽर्थान्तरत्वापत्तिः, सावयवत्वमात्रस्य साध्यत्वे परमाणुसिद्धिर्न स्यादित्यतः उभयपदम्। सावयवारब्धत्वादस्याद्रव्ये बाधाद् द्रव्यपदम्। वस्तुतः सावयवत्वस्य द्रव्यारब्धत्वस्य वा सावयवारब्धत्वस्य वा अभाववति परमाण्वादौ हेत्वधिकरणताया असत्त्वाद्व्यभिचाराप्रसक्तेः तत्तन्मात्रस्य साध्यत्वे व्यर्थविशेषणत्वं दोष इति नाऽशङ्क्यं, यतः साध्यांशे व्यर्थविशेषणस्य अदोषत्वादिति। एवञ्च मूले हेतुपदे बहिरिन्द्रियवेद्यद्रव्यत्वं, तच्च मनोभिन्नेन्द्रियग्राह्य-द्रव्यत्वम्। आत्मनि अतिप्रसक्तिवारणाय बहिःपदम्। रूपादौ च व्यभिचारवारणाय द्रव्यपदम्। रूपादौ द्रव्यारब्धत्वस्य विद्यमानत्वे का क्षतिः? इति जिज्ञासायामुच्यते रूपादेर्गुणत्वेन स्वसमवायिनिष्ठ-स्वसजातीयगुणारब्धत्वनियमात्। तथा च कणादसूत्रम्-

**"द्रव्यगुणयोः सजातीयारम्भकत्वं साधर्म्यम्",**

**"द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरम्।"**[15]

उपर्युक्तहेतुना त्रसरेणुपक्षे सावयवद्रव्यारब्धत्वं सिद्ध्यति न तु परमाणोः। तथा च उच्यते, परिशेषानुमानद्वारा साध्यघटकसावयवद्रव्यत्वेन द्व्यणुकस्य तदवयवत्वेन च परमाणोः सिद्धिर्भवति। परमाणोः सिद्धिविषये मुक्तावलीकारः भणति-

**"महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणुपरिमाणतारम्यस्यापि क्वचिद्विश्रान्तत्वमस्तीति तस्य परमाणुत्वसिद्धिः।"**[16]

एवञ्च चार्वाका अप्रत्यक्षे परमाणौ द्व्यणुके च मानाभावात् त्रसरेणव एव अणुपरिमाणाश्रया जगत्कारणीभूताश्च मन्यन्ते। दीधितिकारोऽपि त्रसरेणुपर्यन्तमेवावयवधाराविश्राममङ्गीकृत्य जगत्-कारणतां त्रसरेणावेव अभ्युपगच्छति। तन्मतनिराकरणाय विश्वनाथः प्रवदति-

**"त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वाद्, घटवदित्यनुमानेन तदवयवसिद्धौ, त्रसरेणोरवयवाः सावयवाः महदारम्भकत्वात् कपालवदित्यनुमानेन तदवयवसिद्धेः।"**[17]

उपर्युक्तानुमानेन यदि सावयवत्वसिद्धिः तदा द्व्यणुकावयवाः सावयवाः महदारम्भकारम्भकत्वात् कपालवदित्यनुमानेन परमाणोरपि सावयवत्व-सिद्धिः स्यादित्याशङ्क्य तं निराकरोति-

**"अनवस्थाभयेन तदसिद्धेरिति।"**[18]

अर्थात् अप्रामाणिककल्पनासमाप्त्यभावा-त्मिकाया अनवस्थाया आपत्तिभयेन अवयवधाराया अनुमित्यविषयत्वात् परमाणौ विश्रामः स्वीकार्यः। तथा सति परमाणूनां निरवयवत्वं सिद्ध्यति। परमाणोः सद्भावे इत्थमपि श्रूयते-

**"जालमध्यगते भानौ यत्सूक्ष्मं दृश्यते रजः।**
**तस्य षष्ठतमो भागः परमाणुः प्रकीर्तितः॥"**

त्रसरेणोः सद्भावे स्मृतिः वदति-

**"जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः।**
**प्रथमं तत्प्रमाणानां त्रसरेणुः प्रचक्षते॥"**[19]

अर्थात् गवाक्षविवरप्रविष्टसूर्यरश्मिषु यत्सूक्ष्मं रजो दृश्यते तद्दृश्यमानपरिमाणानां प्रथमः त्रसरेणुः। "त्रसरेणुस्तु विज्ञेयः त्रिंशता परमाणुभिः"- वैद्यकपरिभाषादीपः।

**"जालसूर्यमरीचिस्थं त्रसरेणू रजः स्मृतम्।"**[20]

जालकान्तरप्रविष्टादित्यरश्मिस्थितं यद्रजस्तत् त्रसरेणुरित्युक्तं योगीश्वरादिभिस्तत्त्वदर्शिभिः।

---

[15] वै.सू. १/१/९-१०

[16] न्या.सि.मु. पृ-११८

[17] न्या.सि.मु. पृ-११९

[18] न्या.सि.मु. पृ-११८

[19] मनु.८/१३२

[20] याज्ञ.आचार-३६२

याज्ञवल्क्यस्मृत्यन्तर्गताया अस्या कारिकायाः व्याख्यानावसरे अपरार्कः प्रवदति-

**“गवाक्षप्रविष्टादित्यकिरणेषु यत्सूक्ष्मं वैशेषिको-क्तरीत्या द्व्यणुकत्रयारब्धं दृश्यते रजः, तत् त्रसरेणुरिति मन्वादिभिः स्मृतम्।”**[21]

सूत्रकारेण परमाणुविषये सङ्केतितं यत्- **“परं वा त्रुटेः”**[22]

अर्थात् परं यः स परमाणुः, तस्य चातिसूक्ष्मत्वात् विभागो न सम्भवति।

**“स्त्रियां मात्रा त्रुटिः पुंसि लवलेशकणाणवः”**[23]

**“त्रुटिस्त्रसरेणुरित्यनर्थान्तरम्”**[24] इति वाचस्पति-मिश्राः प्रवदन्ति।

न्यायवैशेषिकयोः नये परमाणोः नित्यत्वम्। पृथिवीजलतेजोवायुनां ये सावयवभूताः ते अनित्याः भवन्ति। तदतिरिक्ताः निरवयवभूताः तेषां परमाणवः नित्या भवन्ति । उक्तं जगदीशेन-

**“तत्र सावयवा अनित्या इतराणि नित्यानि।”**[25]

परमाणूनां नित्यत्वात् परमाणोः परिमाणमपि नित्यं भवति। उक्तं च वैशेषिकसूत्रकारेण-

**“नित्यं परिमण्डलम्।”**[26]

परमाणुपरिमाणस्य नित्यत्वे सूत्रमेव प्रमाणम्। परिमण्डलमस्यास्तीति परिमण्डलं परमाणुः। तेन आश्रयनाशाभावात् परमाणुपरिमाणं नित्यम-विनाशि। प्रत्यक्षसिद्धान्महतः परिमाणाद् विपरीतं तदणुपरिमाणम्।

**“अतो विपरीतमणु।”**[27]

तदर्थं परिष्करोति शङ्करमिश्रः-

**“अणुत्वं हि कार्यं द्व्यणुकमात्रवृत्ति, नित्यं तु परमाणुवृत्तिः।”**[28]

एवञ्च परमाणुपरिमाणं न कस्यापि कारणं भवति। उक्तं कारिकावलीकारेण-

**“पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्।”**[29]

अर्थात् परितो मण्डलं वर्तुलः परिमण्डलं तस्य भावः पारिमाण्डल्यं परमाणुपरिमाणम्। परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमात् महादारब्धस्य महत्तरत्ववदणुजन्यस्याणुतरत्व-प्रसङ्गाच्च परमाणुपरिमाणं न कस्यापि कारणम्। तथा चोक्तं प्रशस्तपादाचार्येण-

**“कारणत्वञ्चान्यत्र पारिमाण्डल्यादिभ्यः।”**[30]

एतेन सिद्धं यत् परमाणोर्नित्यत्वमविनाशित्वं तत्परिमाणस्यापि नित्यत्वञ्च। तादृशपरमाणुपरि-माणस्य कारणत्वं नास्तीति न्यायवैशेषिकाणां सिद्धान्तः।

तत्र सांख्याचार्याः कपिलाः परमाणोः श्रुतिप्रमाणाभावात् नित्यत्वं चाभ्युपगच्छन्ति। तथा च सूत्रं-

**“नाणुनित्यता तत्कार्यत्वश्रुतेः।”**[31]

अर्थात् परमाणोः नित्यत्वविषये श्रुतेः अविद्यमानत्वात् तस्य जन्यत्वे च श्रुतेः विद्यमानत्वात् तस्य नित्यत्वं नास्ति। तत्र परमाणोः नित्यत्वं नाङ्गीकृतं तत्र तेषां समयः। नित्यत्वे यदि श्रुतिः नास्ति तर्हि तस्य नित्यत्वं मास्तु किन्तु जन्यत्वे श्रुतिवाक्यं वक्तव्यं तथा च सांख्याचार्यैः नोक्तमिति चेत् परमाणोः कथमनित्यत्वं सिद्ध्यति। भाष्यकारैरपि जन्यत्वविषये न केनापि श्रुतिवाक्यमुट्टङ्कितम्। यदि उच्यते कालवशाद् श्रुतिवाक्यानां लोपः जातः-

**“कालार्कभक्षितं सांख्यशास्त्रं ज्ञानसुधाकरम्।
कलावशिष्टं भूयोऽपि पूरयिष्ये वचोऽमृतैः।।”**[32]

---

[21] याज्ञ.अपरार्कभाष्यम्

[22] न्या.सू.४/२/१७

[23] अमरकोशः

[24] ता.टी.

[25] त.मृ. पृ-०६

[26] वै.सू.७/१/२२

[27] तदेव ७/१/११

[28] तत्रैव

[29] कारिकावली-१५

[30] प्रशस्तपादभाष्यम्

[31] सां.सू.५/८७

[32] सां. प्र. भा.श्लो.सं- ५

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

इत्यादि विज्ञानभिक्षुकथनं नानुमतं नानुभवसिद्धम्। एवञ्च उक्तसूत्रस्य व्याख्यानावसरे या स्मृतिः उट्टङ्किता-

**"अण्व्यो मात्रा विनाशिन्यो दशार्धानां तु याः स्मृताः।**
**ताभिः सार्धमिदं सर्वं सम्भवत्यनुपूर्वशः॥"**[33]

एतादृश्या स्मृत्या यदि श्रतिवाक्यमनुमेयं स्यात्तर्हि तादृशी श्रुतिः न केवला पराश्रुतिः अपि च सा अनुमितिपरा श्रुतिः भवेत्। अनुमितिपरया श्रुत्या परमाणोः जन्यत्वं साधयितुं नैव शक्यते। यतः सूत्रकारैः अक्षपादाचार्यैः सांख्यसूत्रं विचार्य परमाणोः निरवयवत्वं चाभ्युपगत्य तस्य नित्यत्वं साधितम्। **'अण्व्यो मात्रा....'**। इत्यादि स्मृतिवाक्यात् सांख्यैः परमाणोः यज्जन्यत्वमवगतं तदपि न युक्तं भाति । यतः "दशार्धानां" इत्यत्र दशार्धपदेन क्षित्यादिपञ्चभूतानां सूक्ष्मांशभूतानि यानि पञ्चतन्मात्रणि तेषां विनाशित्वमिति विवक्षितत्वात् 'मात्र'पदेन च पञ्चतन्मात्रणां सूक्ष्मत्वं प्रतिपादयितुम् 'अण्व्यः' इति शब्दस्य प्रयुक्तत्वाच्च न परमाणोः जन्यत्वम्। एवञ्च गुणवाचकाणुशब्दात् स्त्रीप्रत्यये कृते 'अण्वी' इति शब्दस्य निष्पत्तिर्भवति। तस्य शब्दस्य प्रथमायां बहुवचने 'अण्व्यः' भवतीति स च शब्दः गुणवाचकः इति 'मात्र'-शब्देन द्योत्यते, न तु परमाणुरूपेऽर्थे तस्य 'अण्वी' शब्दस्य प्रयोगः मनुना कृतः इति नैयायिकानामाशयः। एवञ्च कणादनये आकाशस्य नित्यत्वात् विभुत्वाच्च तन्मूलः न कोऽपि परमाणुरस्ति। सांख्यनये च आकाशस्य मूलतन्मात्रं शब्दतन्मात्रं विद्यते, अतः 'मात्र'-पदेन आकाशस्य मूलतन्मात्रं एतेन सुस्पष्टं भाति यत् 'मात्र'-पदेन न परमाणोः ग्रहणं न वा सांख्याभिमतपञ्चतन्मात्रपरमाणु इति न्यायनये विवक्षितः। तत्र परमाणुबोधकं किमपि श्रुतिप्रमाणमस्ति न वा इति जिज्ञासायामुच्यते-

**"विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतोस्पात्।**
**संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन् देव एकः॥"**[34]

इत्यस्य मन्त्रस्य तृतीयपादे 'पतत्र'-शब्दस्य यो हि प्रयोगः तस्यार्थः परमाणुः। परमाणूनां गतिशीलत्वात् गत्यर्थपद्-धातुना निष्पन्नोऽयं पतत्रशब्दः परमाणुवाचकः इति वैदिकमन्त्राद् विज्ञायते। यतः मन्त्रस्य परार्धवाक्ये 'पतत्रैः परमाणुभिः संजनयन् समुत्पादयन् संधमति संयोजयति' इत्याकारिकायाः व्याख्यायाः दर्शनात् परमाणुबोधकं श्रुतिप्रमाणमस्ति इति निश्चप्रचं वक्तुं शक्यते। अस्य मन्त्रस्य व्याख्यानावसरे उदयनः प्रवदति-

**"पतन्तीति। संधमति- संजनयिन्निति च व्यवहितोपसर्गसम्बन्धः। तेन संयोजयति समुत्पादयतीत्यर्थः।"**[35]

एवञ्च परमाणूनां जन्यत्वे श्रुत्यभावात् नित्यत्वे च विरुद्धश्रुतेः अभावात् अनुमानेन तस्य नित्यत्वं जगत्कारणत्वं च साधयितुं शक्यते।

यदि तेषां नित्यत्वमनुमानेन साध्यते तर्हि मध्यद्रव्ये द्रव्यान्तरस्य यदा संयोगः तदा सर्वावयवाच्छेदेन न तस्य संयोगः, यदि परमाणोः सावयवत्वं नाङ्गीक्रियते तर्हि तद्भिन्नपरमाणोः कथं संयोगः? तत्र संयोगः स्वीक्रियते तर्हि तेषां परमाणूनां सावयवत्वमङ्गीकार्यम्। तेषां च सावयवत्वात् कथं नित्यत्वम्। यदि च निरवयवभूते परमाणौ परमाण्वन्तरस्य संयोगः स्वीक्रियते चेत्तर्हि तादृशसंयोगजन्यद्रव्यस्य कथं स्थूलत्वम्? तदा च कथं न्यायवैशेषिकाभिमतः परमाणुकारणवादः? अतः शारीरकभाष्ये आचार्यैः शङ्करैः न्यायाभिमतः

[33] म.स्मृ.१/२७
[34] श्वे.उ.३/३
[35] न्या, कुसु. ५/३

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

परमाणुकारणवादः निराकृतः। परमाणोः निराकरणावसरे महायानबौद्धसम्प्रदायैरपि इत्थं भणितम्। तत्र विज्ञानवादिनः बौद्धाचार्या वसुबन्धवः इत्थं निगदन्ति-

**"न तदेकं न चानेकं विषयः परमाणुशः।**
**न च ते संहता यस्मात् परमाणुर्न सिद्ध्यति॥**
**षट्केन युगपद् योगात् परमाणोः षडंशता।**
**षण्णां समानदेशत्वात्पिण्डः**
**स्यादणुमात्रकः॥"**[36]

तत्र वसुबन्धुना प्रथमकारिकाद्वारा वैभाषिकबौद्धसम्प्रदायाभिमतबाह्यविषयसत्तायाः खण्डनप्रकारो प्रदर्शितः। तद्यथा वैभाषिकाभिमत-बाह्यविषयः न एकावयवविशिष्टः नानेकः, न वा पुञ्जीभूतः परमाणुसमूहः, यतः परमाणोरेवासिद्धत्वात्। कथमित्याकाक्षायां द्वितीयकारिकाद्वारा प्रोच्यते- परमाणुमनभ्युपेत्य तत्र परमाण्वन्तरस्य संयोगः इत्यभ्युपगमे न परमाणुसिद्धिः। यतः एकस्मिन् परमाणौ ऊर्द्धम् अधः इत्यादि षड्दिग्भ्यः षड्परमाणूनां युगपत्संयोगः तदा तस्य परमाणोः षडंशत्वमस्तीति वक्तुं शक्यते। तथा न सम्भवति। यतः तस्मिन्नेव परमाणौ एकप्रदेशे तादृशषड्विधपरमाणूनां संयोगः न भवति। यस्मिन् प्रदेशे च एकस्य परमाणोः संयोगः तस्मिन् प्रदेशे पुनः परमाण्वन्तरस्य संयोगः नैव सम्भवति। अर्थात् तस्य परमाणोः भिन्नभिन्नपरमाणूनां संयोगः स्वीकार्यः। तथा सति सावयवत्वात् असौ न परमाणुः। वसुबन्धुमतमभ्युपेत्य पूर्वपक्षरूपेण सूत्रकाराः प्रवदन्ति-

**'संयोगोपपत्तेश्च'।**[37]

अर्थात् मध्ये सन्नणुः पूर्वापराभ्यामणुभ्यां संयुक्तस्तयोर्व्यवधानं कुरुते। व्यवधानेनाऽनुमीयते- पूर्वभागेन पूर्वेणाणुना संयुज्यते, परभागेन परेणामुना संयुज्यते, यौ तौ पूर्वापरौ भानौ तावस्याऽवयवौ। एवं सर्वतः संयुज्यमानस्य सर्वतो भागा अवयवा इति । एतन्मतं नैव समीचीनं, यतः 'अनवस्थाकारित्वाद-नवस्थानुपपत्तेश्चाप्रतिषेधः। अर्थात् यदि परमाल्पस्य परमाणोरपि सावयवत्वं स्यात् तदा न कस्यापि निरवयवत्वं स्यात् इत्युत्तरोत्तरं सावयवत्वप्रसक्त्या सावयवत्वानवस्थां प्राप्नोति। एतादृशानवस्थायां च सुमेरुसर्षपयोः साम्यमापद्येत। उभयोरप्यवयवानामा-नन्त्यात् सावयवत्वसमाप्तेरस्वीकारात्, न च सुमेरुसर्षपयोः साम्यं कस्याप्यभीष्टमिति तन्निवृत्त्यर्थं परमाणौ सावयवत्वस्य समाप्तिः स्वीकार्येति परमाणूनां निरवयवत्वं सिद्धम्।

एवञ्च अनवस्थायां परमाणूनामवयवत्वविभागे स्वीकृते प्रतिद्रव्यं, द्रव्यावयवानामाऽऽनन्त्यापत्त्या-ऽवयवावयविनोः परिमाणभेदस्य गुरुत्वभेदस्य च ग्रहणं न स्यात्। तथा च समपरिमाणत्वं स्यात्, न च एतत् कस्याप्यभीष्टमिति सावयवत्वानवस्थानि-वृत्त्यर्थं परमाणोर्निरवयवत्वमभ्युपेयम्। एतेन सिद्धं भवति यत् परमाणूनामविनाशित्वान्न सर्वशून्यवादः, न वा परमाणूनामनित्यत्वं, न वा परमाणूनामकारणत्वम्। यतः असमवायिकारण-नाशात् कार्यद्रव्यस्य नाशः इति नैयायिकैरभ्युपगत्वात् परमाणूनां नित्यत्वम् एवञ्च वैशेषिकैः **"क्रियागुणव्यपदेशाभावात् प्रागसत्।"**[38] इत्यनेन सूत्रेण, नैयायिकैश्च- **"बुद्धिसिद्धं तु तदसत्।"**[39] इत्यनेन सूत्रेण आरम्भवादस्य मूलभूतः असत्कार्यवादः स्थापितः इत्यलमतिपल्लवितेन।

**संकेताक्षरसूची**

१. कि.वली. -किरणावली
२. त.मृ. – तर्कामृतम्
३. ता.टी. -तात्पर्यटीका

[36] विज्ञाप्तिमात्रतासिद्धौ विंशतिकारिका
[37] न्या.सू.४/२/२४
[38] वै.सू.१/१/१
[39] न्या.सू.४/१/५०

 ISSN : 2583-2271
Vol. - 4, No. 1: 2024

४. न्या.सि.मु. -न्यायसिद्धान्तमुक्तावली
५. न्या.सू. - न्यायसूत्रम्
६. न्या.कु. - न्यायकुसुमाञ्जलिः
७. न्या. म. -न्यायमञ्जरी
८. प्र.पा.भा. - प्रशस्तपादभाष्यम्
९. वै.सू. -वैशेषिकसूत्रम्
१०. सप्त.प. -सप्तपदार्थी
११. सां.सू. – सांख्यसूत्रम्

## सहायकग्रन्थसूची


- उदयनाचार्यः । ***न्यायकुसुमाञ्जलिः*** । सम्पा. महाप्रभुलालगोस्वामी । मिथिला विद्यापीठ ग्रन्थमाला, सं-28, 1972 ।
- उदयनाचार्यः । ***कारिकावली*** । सम्पा. सि. शंकररामशास्त्री । मद्रास,1923 ।
- उदयनाचार्यः । ***किरणावली*** । सम्पा.जे.एस.जटली । बड़ौदा : ओरियण्टल इन्स्टीट्यूट, 1991 ।
- उदयनाचार्यः । ***कारिकावली*** । सम्पा, विन्ध्येश्वरीप्रसादद्विवेदी । चौखम्बा संस्कृत सीरीज । वाराणसी,1897 ।
- कपिलः । ***सांख्यसूत्रम्*** । सम्पा.रामशंकरभट्टाचार्यः । वाराणसी : भारतीय विद्या प्रकाशन, 1977 ।
- न्यायपञ्चानन विश्वनाथः । ***न्यायसिद्धान्तमुक्तावली*** । सम्पा. श्री. कृष्णवल्लभाचार्य । वाराणसी : चौखाम्बासंस्कृतसंस्थानम् । षष्ठसंस्करणम् , २००३।
- भट्टाचार्यः, विश्वनाथन्यायपञ्चाननः । ***न्यायसिद्धान्तमुक्तावली*** । सम्पा. श्री हरिरामशुक्लः न्यायाचार्यः । वाराणसी : चौखम्भा प्रकाशन् । २०१८ ।
- तर्कालङ्कारः, जगदीशः । ***तर्कामृतम्*** । सम्पा. रामचन्द्रमिश्रः । वाराणसी : चौखम्बा विद्याभवन,1973 ।
- प्रशस्तपादः । ***प्रशस्तपादभाष्यम्*** । सम्पा. दण्डिस्वामिदामोदराश्रमः । कोलकाता: आद्यापीठः बालकाश्रमः । द्वितीयसंस्करणम् ।
- वात्स्यायनमुनिः । ***न्यायभाष्यम्*** । सम्पा. स्वामी द्वारिकादासशास्त्री । वाराणसी : बौद्धभारतीग्रन्थमाला । १९९८ ।
- भट्टः, जयन्तः । ***न्यायमञ्जरी*** । सम्पा. गौरीनाथशास्त्री । वाराणसी : सं सं वि वि । १९८३।
- भट्टः, जयन्तः । ***न्यायमञ्जरी*** । सम्पा. गंगाधरशास्त्रीतैलंगः । वाराणसी : चौखम्बा संस्कृतसीरीज,1895 ।
- महर्षिकणादः । ***वैशेषिकसूत्रम्*** । सम्पा. नारायणमिश्रः । वाराणसी : बौद्धभारती, 1968।
- महर्षिगौतमः । ***न्यायदर्शनम्*** । सम्पा. अनन्तलाल ठक्कुरः। दरभंगा : मिथिलाशोधसंस्थानम्, 1967 ।
- मिश्रः, शिवादित्यः । ***सप्तपदार्थी*** । सम्पा. अमरेन्द्रमोहनतर्कतीर्थः । कोलकाता : मेट्रोपलिटन् प्रिन्टिं एण्ड पाब्लिशार्स हाउस । १९३४ ।
- मिश्रः, वाचस्पतिः । ***न्यायवार्तिकतात्पर्यटीका*** । सम्पा . राजेश्वरशास्त्री-द्रविडः । वाराणसी : चौखम्बासंस्कृतसंस्थानम् । द्वितीयसंस्करणम् , १९८९ ।

# पाणिनीयव्याकरणे एकाक्षरसंज्ञा

**डॉ. गिरिधारी-पण्डा**
**सहाध्यापकः, संस्कृतविभागः, मेदिनीपुरमहाविद्यालयः(स्वयंशासितः)**
**मेदिनीपुरम्, पश्चिमबङ्गः**

**प्रबन्धसारः**

*सूत्रकारभावेन पाणिनिना सूत्रोपदार्थितेन मार्गेण व्याकरणमुपनिबद्धम्। अष्टाध्याय्याः अनुशीलनात् प्रत्येतव्यं जायते यत् २२७ संख्यकाः पारिभाषिकशब्दाः प्रथिताः सन्तः सूत्राशयं नियमयन्ति। कतिपयानि पारिभाषिकपदानि सन्ति येषां अक्षरानुकरणं विधाय आचार्यैः स्वकृतौ संस्थापितम्। परवर्त्तिनि काले तद्विज्ञानविदः अपाणिनीय-संज्ञा-भावेन तेषां व्यवहारविज्ञानम् अधिगम्य मतम् अवयवीकृतवन्तः। एवं च पाणिनीयसंज्ञाभावेन केषाञ्चित् सम्बन्धविधानम् आविष्कृतवन्तः। पारिभाषिकशब्दानामर्थबोधनाय संज्ञासूत्राणि पाणिनिना विरचितानि। संज्ञासञ्ज्ञिपुरःसरं तद्विवेकः साधितः, यस्याधारेण संज्ञासंज्ञिभावपुरःसरं संज्ञासूत्रमिति तल्लक्षणं प्रथितं जायते। यथा वृद्धिरादैजित्यत्र वृद्धिरिति संज्ञापदम्, आदैच् इति संज्ञिपदम्। संज्ञिपदान्येव संज्ञायाः अर्थबोधकानीति रहस्यम् । लघ्वर्थं हि संज्ञाकरणम्। संज्ञा नाम यतो न लघीयः। एवं च संज्ञाकरणं वक्तुः अधीनम्। अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः इति प्रवादोऽस्ति। द्विविधं हि लाघवं पाणिनिव्याकरणे दृष्टीगोचरीभवति। यथा- शब्दकृतमर्थकृतञ्च ।*

*अत एव स्वस्मिन् व्याकरणे टि-घु-घ-घि-चेत्यादयः अल्पाक्षरसंज्ञाः पाणिनिना प्रदर्शिताः। तत्र एकाक्षरसंज्ञा, द्व्यक्षरसंज्ञा इत्यादिरूपेण कल्पिता। अत्र प्रबन्धे पाणिनिव्याकरणे याः एकाक्षरसंज्ञाः प्रकल्पिताः, तासां संज्ञानां विचारः प्रस्तूयते।*

**कुञ्चीशब्दाः -** व्याकरणं, सूत्रं, पारिभाषिकपदं, संज्ञाशब्दः, संज्ञाभेदः, एकाक्षरी संज्ञा, महती संज्ञा, अन्वर्थलाभः चेति।

*************************************************************************************

**प्रस्तावना -**

'सूत्रम्' इति पदस्योपादने सर्वथा लाघवमेव उद्देश्यम्। सूत्रे अल्पाक्षरेण समन्वितेन पदेन बहुविधस्य तात्पर्यस्य उपस्थापनं कर्तव्यं जायते इति सूत्रलक्षणात् तस्मात् प्रतिपाद्यते। एतस्मिन् विधौ सूत्रेषु कार्यानुसारं कार्यविधेः प्रतिपादनानुसारं च षड्विधप्रकारभेदव्यवस्था कल्पनीया विद्यते। संज्ञा, परिभाषा, विधिः, नियमः, अतिदेशः, अधिकारश्चेति भावेन षड्विधेषु सूत्रप्रकारेषु संज्ञाशब्दः अन्यतमः। संज्ञासंज्ञिपुरःसरं तद्विवेकः साधितः, यस्याधारेण संज्ञासंज्ञिभावपुरःसरं संज्ञासूत्रमिति तल्लक्षणं प्रथितं जायते। यथा वृद्धिरादैजित्यत्र वृद्धिरिति संज्ञापदम्, आदैच् इति संज्ञिपदम्। संज्ञिपदान्येव संज्ञायाः अर्थबोधकानीति रहस्यम् । लघ्वर्थं प्रयासोऽयं विहितः। अष्टाध्याय्यां याः संज्ञाः प्रयुक्ताः दृश्यन्ते, तत्र सर्वाः संज्ञाः पाणिनिना न कल्पिताः। परन्तु पाणिनिपूर्वाचार्यैः प्रयुक्ता अपि संज्ञाः पाणिनिना अङ्गीकृताः। यतो हि गोपथब्राह्मणे- प्रातिपदिकम्, आख्यातं, वचनं, विभक्तिः, प्रत्ययः इत्यादीनां संज्ञानां प्रयोगो दृश्यते।

महाभाष्यानुसारेण संज्ञा द्विविधा। कृत्रिमा अकृत्रिमा च। महाभाष्यकृता साधितम्- "या वैताः कृत्रिमाष्टिघुभ्वादिसंज्ञाः"[1] इति। पुनः सः लिखति "इह हि व्याकरणे ये वैते लोके प्रतीतपदार्थकाः शब्दास्तैर्निर्देशः क्रियन्ते।"[2] 'कर्तृरीप्सिततमं कर्म'

[1] महाभाष्ये कारके (१/४/२३) इति सूत्रव्याख्यायाम्

[2] तत्रैव

(पा. सु.-१.४.४९) कृत्रिमसंज्ञा भवति। सूत्राणां परिगणनावसरे अष्टाध्याय्यां संज्ञासूत्राणि सन्ति।

यद्यपि पूर्वाचार्यकल्पितानां महतीनां संज्ञानां स्थाने पाणिनिना लघुसंज्ञाः अपि कल्पिताः। परन्तु बहुत्र महत्याः संज्ञायाः अपि समाश्रयणं स्वशास्त्रे कृतम्। तत्रापि एकाक्षरी द्व्क्षरी इति भावेन संज्ञाः साधिताः। प्राचां संज्ञास्वीकारे ज्ञानलाघवं भवति। एवं च अन्वर्थलाभप्रयोजनमपि।

**विचारः -** "संज्ञा च नाम यतो न लघीयः। कुत एतत्। लघ्वर्थं हि संज्ञाकरणम्।"[3] इति महाभाष्यकारेण उक्तम्। एवञ्च संज्ञाकरणं वक्तुः अधीनम्। अर्थमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः इति प्रवादोऽस्ति । द्विविधं हि लाघवं पाणिनिव्याकरणे दृष्टीगोचरीभवति। यथा- शब्दकृतमर्थकृतञ्च।

अत एव स्वस्मिन् व्याकरणे टि, घु, घ, घि-चेत्यादयः अल्पाक्षरसंज्ञाः पाणिनिना प्रदर्शिताः। तत्र एकाक्षरसंज्ञा, द्व्यक्षरसंज्ञा इत्यादिरूपेण कल्पिता। एषः भेदः आकृतिदृव्या साधितः।

पाणिनीयव्याकरणशास्त्रे प्रयुक्ताः संज्ञाः आकृतिदृष्ट्या सप्तधा विभक्तुं शक्यन्ते। तद्यथा-

१. एकाक्षराः संज्ञाः टि-घि-घ-घु इत्यादयः ।

२. द्व्यक्षराः संज्ञाः- वृद्धिः, गुणः चेत्यादयः ।

३. त्र्यक्षराः संज्ञाः - संयोग-सवर्ण-प्रगृह्येत्यादयः ।

४. चतुरक्षराः संज्ञाः - सर्वनाम-बहुव्रीहि-द्विवचनेत्यादयः।

५. पञ्चाक्षराः संज्ञाः- सार्वधातुक-आर्धधातुक अव्ययीभावेत्यादयः ।

६. षडक्षराः 'संज्ञा' सर्वनामस्थानमित्येकैव ।

७. सप्ताक्षरा संज्ञा- "कर्मप्रवचनीया" इत्येकैव ।

सर्वासु संज्ञासु पाणिनीयव्याकरणशास्त्रे त्र्यक्षराणां संज्ञानां संख्या अधिकतमा विद्यते। उपर्युक्तासु सर्वासु संज्ञासु एकाधिकाक्षरा याः संज्ञास्ताः प्रायः सर्वाः पूर्वाचार्याणामिति कल्प्यते। एकाक्षराः या संज्ञास्ताः सर्वाः शब्दलाघवदृष्ट्या आचार्येण कल्पिताः। एकाक्षरासु संज्ञासु 'इत्' इति संज्ञा "एति लोपं प्राप्नोति" इति व्युत्पत्त्यनुसारेण अन्वर्था भवितुमर्हति। किन्तु अस्य कथनस्य नागेशेन खण्डनं कृतम्। शेषाः घ-टि-घीत्यादयः संज्ञास्तु रुढि-संज्ञाः यादृच्छिक्याः इति कल्पयितुं शक्यते।

पाणिनीयव्याकरणशास्त्रे प्रयुक्ताः कतिपयाः एतादृश्योऽपि संज्ञाः सन्ति यासां के के संज्ञिनः इति बोधनाय संज्ञासूत्राणि न प्रणीतानि। मन्ये पाणिनीयव्याकरणशास्त्रप्रणयनकाले ताः संज्ञाशब्दाः प्रचलिताः प्रसिद्धाश्च आसन्। व्याख्यानपरम्परायां तासां संज्ञानां सञ्ज्ञिनां च बोधोऽद्यापि भवति। एतादृशसंज्ञाशब्दानाम् अन्वर्थत्वं प्रतिपादितं सिद्धान्तकौमुदीव्याख्यायां वालमनोरमाकारेण। तथाहि 'कर्मप्रवचनीयाः' इति महासंज्ञाकरणसामर्थ्यात् अन्वर्थत्वं स्वीकृतम्। कर्मेति क्रियोच्यते, तां प्रोक्तवन्तः कर्मप्रवचनीयाः, भूते कर्त्तरि बाहुलकादनीयर्-प्रत्ययः। ततश्च क्रियामेव न द्योतयन्ति किन्तु क्रियानिरूपितसम्बन्धविशेषं द्योतयन्ति। एवं च अनुप्रत्यादिषु क्रियानिरूपितसम्बन्धस्य द्योत्यत्वेन अन्वयात् तत्र गत्युपसर्गसंज्ञायाः प्राप्तिर्भवति।

पाणिनीयतन्त्रे प्रयुक्ताः बह्व्यः संज्ञा एतादृश्यः अपि सन्ति याभिः व्याख्यानपरम्परया सञ्ज्ञिनां बोधो जायते स्म। ताभिरद्यापि व्यवहारः स्वशास्त्रे विहितो दृश्यते। पाणिनिना निषेधविकल्पयोरर्थयोः विभाषा संज्ञा कृता, तथापि तत्स्थाने अन्यतरस्याम् उभयथा इत्यादीनामपि प्रयोगं कृत्वा इष्टं साधितवान् आचार्यः। अत्र प्रबन्धे पाणिनिव्याकरणे याः एकाक्षरसंज्ञाः प्रकल्पिताः, तासां संज्ञानां विवेचनमत्र संक्षेपेण प्रस्तूयते।

**१. दाधा घ्वदाप् (१/१/२०)**

[3] महाभाष्ये सर्वादीनि सर्वनामानि (१/१/२७) इति सूत्रव्याख्यायाम्

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

घुसंज्ञाविधायकं सूत्रमिदम्। दा धा इत्येतत् शब्दस्वरूपं घिसंज्ञं भवति। दाप् तु घुसंज्ञो न भवति इति सूत्रार्थः। दारूपाः चत्वारः सन्ति। डुदाञ् दाने, दाण् दाने, दो अवखण्डने, देङ् रक्षणे। धारूपौ द्वौ स्तः- धाञ् धारणपोषणयोः, धेट् पाने।

**२. तरप्तमपौ घः (१/१/२२)**

घसंज्ञाविधायकं सूत्रम्। तरप्तमपौ प्रत्ययौ घसंज्ञौ भवतः इत्यर्थः। उदाहरणं यथा कुमारितरा, ब्राह्मणितरा इति।

**३. अचोऽन्त्यादि टि (१/१/६४)**

टिसंज्ञाविधायकं सूत्रम्। अचां मध्ये योऽन्त्यः स आदिः यस्य तट्टिसंज्ञं भवतीति सूत्रार्थः। उदाहरणं यथा- मनीषा।

**४. शेषो घ्यसखि (१/४/७)**

घसिंज्ञाविधायकं सूत्रमिदम्। अनदीसंज्ञौ ह्रस्वौ याविवर्णोवर्णौ तदन्तं सखिवर्जं घिसंज्ञं स्यादिति सूत्रार्थः। अर्थात् सखिशब्दं वर्जयित्वा नदीसंज्ञाभिन्नौ ह्रस्वेकारान्तोकारान्तौ शब्दौ नदीसंज्ञकौ स्तः।

**५. यचि भम् (१/४.१८)**

भसंज्ञाविधायकं सूत्रमिदम्। उदाहरणं यथा दाक्षिः। दक्षस्य अपत्यं पुमान् इति विग्रहे "अत इञ्" इति सूत्रेण इञ्प्रत्यये दक्ष इञ् इति जाते दक्षघटकस्य अकारस्य भत्वात् "यस्येति च" इति सूत्रेण अकारस्य लोपो भवति।

विषयबाहुल्यादत्र केवलं पञ्च एकाक्षरसंज्ञा-सूत्राणि सूत्रार्थोपस्थापनपूर्वकमत्रोपस्थापितानि। अपरेषामेकाक्षराणामुपपादनमत्राक्षरानुक्रमेण विहितम्।

**१. अ-** अष्टादशानां सवर्णानां संज्ञा। तथाहि ह्रस्व-दीर्घ-प्लुतानां त्रयाणामपि उदात्तानुदात्तस्वरित-भेदान्नवविधत्वम्। नवानामप्यनुनासिकाननुनासिक-भेदेन अष्टादशविधत्वम्। संज्ञासूत्रम्- "अणुदित्सवर्णस्य चाऽप्रत्ययः" (पा १/१/६९) । उपयोगः "आद्गुणः" (पा.६/१/८७), "अस्य च्वौ"( पा.७/४/३२) ।

**२. अत्-** षड्विधह्रस्वाकारस्य संज्ञा। अनुनासिकह्रस्वोदात्तः, अनुनासिकह्रस्वानुदात्तः, अनुनासिकह्रस्वस्वरितः, अनुनासिकह्रस्वोदात्तः, अनुनासिकह्रस्वानुदात्तः, अनुनासिकह्रस्वस्वरित-श्चेति षड्विधह्रस्वाकारः। संज्ञासूत्रम्- "तपरस्तत्कालस्य"( पा. १/१/७०) । उपयोगः "अत इञ्"( पा. ४/१/९५) ।

**३. आत्-** षड्विधदीर्घाकारस्य संज्ञा। संज्ञासूत्रम्- "तपरस्तत्कालस्य"। उपयोगः "आतो धातोः"( पा. ६/४/१४०) ।

**४. इ-** अष्टादशानां सवर्णानां संज्ञा। 'अ'वत्। उपयोगः "एरनेकाचोऽसंयोगपूर्वस्य"( पा. ६/४/८२) ।

**५. इत्-** 'इत्' इत्यस्य द्विविधः संज्ञी (१) षड्विधह्रस्वेकारः, (२) हलन्त्यम्' इत्यादिसूत्रबोधितश्च। "षः प्रत्ययस्य", "चुटू", "लशक्वतद्धिते" (पा. १/३/२, ३, ५, ६, ७, ८) 'अत्' इतिवत्। उपयोगः तित्स्वतिरम् पा.६/१/१८५ "इतोऽत् सर्वनामस्थाने"( पा. ७/१/८६) । "ईदासः"( पा. ३७/२/८३) ।

**इत्-** इत्संज्ञको वर्णः। संज्ञासूत्राणि "उपदेशेऽजनुनासिक इत्", "हलन्त्यम्", "आदिर्ञिटुडवः"। ईत्- षड्विध-दीर्घेकारस्य संज्ञा। "आप्ज्ञप्यृधामीत्"।

**६. उ -** अष्टादशानां सवर्णानां संज्ञा। 'अ'-वत्। उपयोगः "ओः सुपि"( पा. ६/४/८३) ।

**७. उत्, ऊत्-** 'अत्' इतिवत्। उपयोगः "उदुपधाद्भावादकर्मणोरन्यतरस्याम्"( पा. १/२/२१)। "ऊदुपधाया गोहः"( पा. ६/४/८९) ।

**८. ऋ-** अष्टादशानां ऋवर्णानां द्वादशानां ऌवर्णानां चेति त्रिंशत्सवर्णानां संज्ञा। ऋकारऌकारयोः सावर्ण्यात्। भेदास्तु 'अ'वत्। ऌवर्णस्य

ह्रस्वाभावान्नाष्टादशविधत्वम्। उपयोगः "उरण् रपरः"( पा. १/१/५१) ।

**९. ऋत्-** 'अत्' इतिवत्। उपयोगः "ऋत उत्"( पा. ६/१/१११) । ऋत्- "ऋत इद्धातोः"( पा. ७/१/१००) । ऌत्- "पुषादि-द्युताद्य्ऌदितः परस्मैपदेषु" (पा.सू.- ३/१/५५)।

**१०. ॡ** - 'ऋ'वत्। उपयोगः - "ॡत्ति सवर्णे ऌ वा"( पा. वार्त्तिकम्) ।

**११. ऌत्-** 'ऋत्' इतिवत्। "पुषादिद्युताद्य्ऌदितः(पा. ३/१/५५) ।

**१२. एत्-** 'आत्' इतिवत्। "ह एति"( पा. ७/४/५२)

**१३. ऐत्-** 'आत्' इतिवत् ।

**१४. ओत्-** 'आत्' इतिवत्। "औतोऽम्शसोः"( पा. ६/१/९३) ।

**१५. औत्-** 'आत्' इतिवत्। "दिव् औत्" (पा. ७/१/८४) ।

**१६. कृत्-** तिङ्भिन्नधातुविहितप्रत्ययानां संज्ञा। यथा गम् क्त गतः। संज्ञासूत्रम् "कृदतिङ्" (पा. ३/१/९३) उपयोगः "कर्त्तरि कृत्" (पा. ३/४/६७) ।

**१७. घ-** 'नदी'संज्ञकभिन्नह्रस्वेकारोकारान्ताः सखिभिन्नाः शब्दाः घिसंज्ञकाः। मुनि, शम्भु प्रभृतयः। संज्ञासूत्रम्- "शेषो घ्यसखि" (पा. १/४/७) । उपयोगः - "घेर्ङिति" (पा. ७/३/१११) ।

**१८. घु-** "दाधा घ्वदाप्" (पा. १/१/२०) । उपयोगः "घुमास्थागापाजहातिसां हलि" (पा. ६/४/६६) ।

**१९. टि-** शब्दान्तर्गतस्वराणामन्तिमवर्णो वर्णसमुदायो वा टिसंज्ञकः। राम इत्यत्र अकारः, मनस् इत्यत्र अस् इति। संज्ञासूत्रम्- "अचोऽन्त्यादि टि" (पा. १/१/६४) । उपयोगः- "टेः" (पा. ६/४/१४३) ।

**२०. भ-** "स्वौजसमौट्.." (पा. ४/१/२) इत्यारभ्य "उरः प्रभृतिभ्यः कप्" (पा. ५/४/१५१) इति सूत्रं यावत् चतुर्थ-पञ्चमाध्यायवर्त्तिषु विभक्ति-स्त्रीप्रत्यय-तद्धित-समासान्तप्रत्ययेषु यकार आदौ येषां तेभ्यः, अच् आदौ येषां तेभ्यश्च, (सु औ जस् अम् औट् इति विहाय) पूर्वस्य भसंज्ञा भवति। संज्ञासूत्रम्- "यचि भम्" (पा. १/४/१८)। उपयोगः "भस्य" (पा. ६/४/१२९)।

**२१. लुक्-** प्रत्ययादर्शनम्। संज्ञासूत्रम्- "प्रत्ययस्य लुक्श्लुलुपः" (पा. १/१/६१) । उपयोगः - "षड्भ्यो लुक्" (पा. ७/१/२२) ।

**२२. लुप्-** प्रत्ययदर्शनम्। उपयोगः "जनपदे लुप्" (पा.४/२/८१) ।

**२३ श्लुः** – प्रत्ययादर्शनम्। उपयोगः "जुहोत्यादिभ्यः श्लुः" (पा. २/४/७५) ।

**२४. षट्-** "ष्णान्ता षट्" (पा. १/१/२४) इति संज्ञासूत्रम्। षान्ता नान्ता च संख्या षट्संज्ञा। उपयोगः "षड्भ्यो लुक्" (पा. ७/१/२२) ।

**२५. सत्-** शतृ- शानच्प्रत्ययौ सत्संज्ञकौ। संज्ञासूत्रम्- "तौ सत्" (पा. ३/२/१२७) । उपयोगः "लृटः सद्वा" (पा. ३/३/१४) ।

**उपसंहारः-**

"लघ्वर्थं हि संज्ञाकरणम्"[4] इति भाष्यानुसारेण शास्त्रे लोके च लाघवेन प्रवृत्यर्थं संज्ञाः क्रियन्ते। "अर्द्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः"[5] इत्युक्तिरपि व्याकरणशास्त्रस्य लाघवप्रवृत्तिं ध्वनयति। अतएव अष्टाध्याय्यां पाणिनिना टि-घु-घि इत्यादयः अल्पाक्षरसंज्ञाः विरचिताः। पुनश्च ताभिः अल्पाक्षरसंज्ञाभिः साकम् अन्वर्थलाभाय सर्वनामप्रातिपदिकादयो महत्यः अपि संज्ञाः स्वीकृताः। सर्वा अपि महत्यः संज्ञा अन्वर्थलाभाय भवन्तीति न भ्रमितव्यम्। "शि सर्वनामस्थानम्" इति सूत्रविहिता या सर्वनामस्थानेति महती संज्ञा सा अन्वर्थलाभाय नास्ति। अत एव महासंज्ञाकरणं पूर्वाचार्यानुरोधात् इत्युक्तम्। अत एव एताः महत्यः संज्ञाः प्राचीनाचार्येभ्य उद्धृताः इत्यामनन्ति भाषाविज्ञानविदः। तथा च ज्ञानलाघवदृष्ट्या,

[4] महाभाष्ये सर्वादीनि सर्वनामानि (१/१/२७) इति सूत्रव्याख्यायाम्

[5] परिभाषेन्दुशेखरे, परिभाषासंख्या - १३२

अर्थलाघवदृष्ट्या, अन्वर्थलाभाय, पूर्वाचार्यादरदृष्ट्या च महतीनां संज्ञानां समादरं कृतवान् पाणिनिरिति अभिव्यज्यते।

### सहायकग्रन्थसूची


- अष्टाध्यायीसूत्रपाठः, दीक्षितपुष्पा, संस्कृतभारती, नवदेहली, २०१०।
- अष्टाध्यायीसूत्रपाठः, मिश्रनारायणः, चौखम्बा ओरियन्टालिया, वाराणसी, १९७७।
- लघुशब्देन्दुशेखरः, मिश्रविश्वनाथः, पञ्चसन्ध्यन्तः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली १९९८।
- वैयाकरणसिद्धान्तकौमुदी, प्रथमभागः, बालमनोरमा-तत्त्वबोधिनीटीका, मोतिलाल बनारसीदास, दिल्ली, २००५।
- वैयाकरणमहाभाष्यम्, डाः आचार्यसुद्युम्नः, रामलाल कपूर ट्रष्ट, रेवलि, सोनीपत, २००८।
- परिभाषेन्दुशेखरः, मिश्रः, विश्वनाथः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००५।
- अष्टाध्यायीसूत्रपाठः, प्रह्लादटिप्पणीसहितः, सम्पादकः पं. सत्यनारायणशास्त्री खण्डुडी, कृष्णदास संस्कृत सीरीज ६५, कृष्णदास संस्कृत अकादमी, वाराणसी-२२१००१, १९८५।
- महाभाष्यम्, (नवाह्निकम्), सम्पादकः- चारुदेव शास्त्री, मोतिलाल बनारसीदास, दिल्ली, १९६८।
- वाक्यपदीयम्, ब्रह्मकाण्डम् श्री वामदेव आचार्यः, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी- २२१००१,१९८७।
- महाभाष्यम्, सम्पादक श्रीगुरुप्रसादशास्त्री, राष्ट्रियसंस्कृतसंस्थानम्, नइ देल्ली- ११००५८,२००६।
- वैयाकरणसिद्धान्तकौमुदी, व्याख्याकारः पं. वमचन्द्र झा, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी- २२१००१,२००९।
- व्याकरणशास्त्रेतिहासः, सम्पादकः लोकमणिदाहालः, भारतीय विद्याप्रकाशन, जवाहनगर, दिल्ली- २००७।
- काशिकावृत्तिः, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी-२२१००१।
- वैयाकरणसिद्धान्तकौमुदी, मोतीलाल वनारसी-दास दिल्ली, २०००
- वैयाकरणसिद्धान्तलघुमञ्जूषा, कुञ्चिका-कलासम्बलिता चौखम्बा-संस्कृत-सीरीज, वाराणसी, १९८५
- व्याकरणदर्शनेर इतिहास, गुरुपदहालदारः, कोलकाता १३५० बङ्गाब्दः।
- पाणिनीयव्यकरणे अनुवृत्तेः वैशिष्टविमर्शः, डा. गोविन्दचन्द्रकरः (शोधप्रबन्धः), श्रीसदाशिवकेन्द्रीय-संस्कृतविद्यापीठम्, पुरी, १९८६.

# वैदिकवाङ्मये पर्यावरणविज्ञानम्

**डॉ. लक्ष्मीकान्त-षडङ्गी**
**सहाध्यापकः, योगदा-सत्सङ्ग-पालपाडा-महाविद्यालयः**
**पालपाडा, पूर्वमेदिनीपुरम्, पश्चिमबङ्गः**

**प्रबन्धसारः**

*जगतीह समग्रजीवानां वनस्पतीनां च परितः यदावरणं परिदृश्यते तदेव पर्यावरणमित्युच्यते। परितः आवरणमिति व्युत्पत्त्या पर्यावरणमिति शब्दस्योत्पत्तिर्जायते। 'परि' इत्युपसर्गात् 'आ' इत्युपसर्गाच्च 'वृञ्'-आवरणे इति धातोः ल्युट्-प्रत्यये पर्यावरणम् इति शब्दस्योत्पत्तिर्भवति। जगत्यस्मिन् पर्यावरणम् एकमेव गृहं, यत् सततमेव जीवानां समीपं तिष्ठति, खाद्यपानीयानिलादिकं च प्रयच्छति। जीवजगतः सम्पूर्णजीवनप्रणाली समग्रोत्तम-पर्यावरणीयकारकाणामुपरि निर्भरशीला। पर्यावरणमिदं वायुं जलवायुं च विनियमितं विधातुं महत्त्वपूर्णां भूमिकामावहति। इदं तु पर्यावरणं प्राकृतिकमानवीयभेदेन द्विधा विभक्तम्। जलस्थलजीववायुमण्डलरूपेण पर्यावरणस्यास्य चत्वारि अङ्गानि तथा च क्षित्यप्तेजोमरुदाकाशरूपेण पञ्चतत्त्वान्यपि सन्ति। अस्मिन्नेव पर्यावरणे न केवलं मानवाः अपि तु समग्रजीवाः प्रत्यक्षरूपेण निर्भरशीलाः सन्ति। यतो हि समग्रजीवजगदिदं सृष्टौ, स्थितौ च पर्यावरणस्योपरि निर्भरशीलम्। पृथिव्याम् अरण्यनदीसरित्समुद्रमृत्तिकादयः अस्मभ्यं खाद्यपानीयादिकं प्रयच्छन्ति। येन वायुना वयं श्वासक्रियां सम्पादयामः, येन जलेन च वयं शस्यानि उत्पादयामः तत् सर्वमेव पर्यावरणस्य अंशविशेषरूपम्।*

*पर्यावरणस्यास्य सत्सु चतुरङ्गेषु जलमन्यतमम्। यस्यापरं नाम जीवनम्। यस्मिन् जले एव जीवजगतः जीवनस्य सृष्टिः, स्थितिः, विनाशश्च अपेक्षन्ते। यतो हि उपयुक्तजलयोगादेव यथा जीवानां सृष्टिः स्थितिश्च सम्भाव्यते,तथैव उपयुक्तजलयोगाभावेनैव जीवानां विनाशः जायते। अतः सष्टिसम्भवाय रक्षणाय चोपयुक्तजलस्य भूमिका अत्यावश्यकी। परन्तु सम्प्रति मनुष्याणां सावधानतायाः रक्षणावेक्षणव्यवहारादीनामभावाच्च प्राकृतिकसम्पदिदं जलं विनष्टं भवति। यस्य साक्षात् प्रभावः जीवजगतः उपरि आपतति। फलस्वरूपं निरामयः शतायुर्पुरुषः अद्य व्याधिग्रस्तः अर्धशतायुना परिणतः भवति। न केवलं मनुष्यसमाजः अपि तु दूषितजलवायुप्रभावादद्यतनीया पृथिवी पशुपक्षिकीटपतङ्गसरीसृपादिविहीना श्रीहीना च भवति। अस्याः समस्यायाः प्रमुखकारणमस्ति जनानां जलसम्पदः असदुपयोगः। अस्यैव प्राकृतिकसम्पदः जलस्य संरक्षणाय वैदिकर्षिभिः बहुधा स्तुतिः विहिता। तद्यथा- "अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तये, देवा भवत वाजिनः।" (ऋ. १/२३/१९) "आपःपृणीत भेषजं वरुथं तन्वे मम, ज्योक्च सूर्यं दृशे।" (ऋ. १/२३/२१) "इदमापः प्रवहत यत्किंच दुरितं मयि, यद्वाहमभिदुद्रोह यद्वा शेपे उतानृतम्।" (ऋ. १/२३/२२)*

*वयमस्माकं सुस्वास्थ्याय, सुखसमृद्धये च सम्पूर्णपर्यावरणस्योपरि निर्भरशीलाः। अतः पर्यावरणस्यास्य अन्यतमांशविशेषस्य जलसम्पदः सुरक्षा अस्माभिः सर्वादौ कर्तव्या।*

**कुञ्चीशब्दाः –** पर्यावरणम्, पृथिवी, जलम्, जीवः, विज्ञानी चेत्यादयः।

*******************************************************************************

**भूमिका –** जगत्यस्मिन् समग्रजीवानां वनस्पतीनां च परितः यदावरणं परिदृश्यते तदेव पर्यावरणमित्युच्यते। परितः आवरणमिति व्युत्पत्त्या पर्यावरणमिति शब्दस्योत्पत्तिः जायते। 'परि' इत्युपसर्गात् 'आ' इत्युपसर्गाच्च 'वृञ्' आवरणे इति धातोः 'ल्युट्' प्रत्यये पर्यावरणम् इति शब्दः जायते। जगतीह पर्यावरणम् एकमेव गृहं यत् सर्वदा एव जीवानां सन्निकटे तिष्ठति तेषां कृते खाद्यपानीयादिकं च प्रयच्छति। जीवजगतः सम्पूर्णजीवनप्रणाली समग्रोत्तमपर्यावरणीयकारकाणाम् उपरि निर्भरशीला। इदं पर्यावरणं वायुं जलवायुं च

विनियमितं विधातुं महत्त्वपूर्णां भूमिकाम् आवहति। इदं तु पर्यावरणं प्राकृतिकमानवीयभेदेन द्विधा विभक्तम्। जलस्थलवायुमण्डलरूपेण पर्यावरणस्यास्य चतुरङ्गानि तथा च क्षित्यप्तेजोमरुदाकाशरूपेण पञ्चतत्त्वान्यपि सन्ति। पर्यावरणेऽस्मिन् न केवलं मानवाः अपि तु समग्रजीवाः प्रत्यक्षरूपेण निर्भरशीलाः सन्ति। यतो हि समग्रजीवजगदिदं सृष्टौ, स्थितौ च पर्य्यावरणस्योपरि निर्भरशीलम्। पृथिव्याम् अरण्य-नदी-सरित्-समुद्र-मृत्तिकादयः अस्मभ्यं खाद्यपानीयादिकं प्रयच्छन्ति। येन वायुना वयं श्वासक्रियां सम्पादयामः, येन जलेन च वयं शस्यानि समुत्पादयामः तत् सर्वमेव पर्यावरणस्य अंशविशेषरूपम्।

पृथिव्यां समग्र-जगतिकवस्तुनः मूले यत् पञ्चमहाभूतमस्ति तत्र पृथिवी अन्यतमा। अस्याः पृथिव्याः सारं तु जलम्। अतः पर्यावरणस्यास्य सत्सु चतुरङ्गेषु जलमन्यतमम्। उच्यते च – **“एषां वै भूतानां पृथिवीरसः पृथिव्या आपः”**[1]। यस्यापरं नाम जीवनम्। एतद्धि जलं जीवचेतनायाः मूलं कारणमासीत्। जले एव जीवजगतः सृष्टिः स्थितिः विनाशश्च अपेक्षन्ते। ऋग्वेदे उच्यते यथार्थेन - **“तम आसीत्तमसागूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम्”**[2]। उपयुक्तजलयोगादेव यथा जीवानां सृष्टिः स्थितिश्च सम्भाव्यते, तथैव उपयुक्तजलयोगाभावेनैव जीवानां विनाशोऽपि जायते। अतः सृष्टिसम्भवाय रक्षणाय चोपयुक्तस्य जलस्य भूमिका अत्यावश्यकी। परन्तु सम्प्रति एकविंशशतके वर्तमानप्रजन्मस्य कृते विशुद्धजलस्य उपयुक्तजलस्य वा प्राप्तिः एव प्रमुखम् आह्वानम्। यतो हि सम्प्रति मनुष्याणां सावधानतायाः रक्षणावेक्षणव्यवहारादीनामभावाच्च प्राकृतिकसम्पदिदं जलं विनष्टं भवति। यस्य साक्षात् प्रभावः जीवजगतः उपरि आगच्छति। फलस्वरूपं निरामयः शतायुःकल्पितः पुरुषः अद्य व्याधिग्रस्तः हतायुः च भवति। न केवलं मनुष्यसमाजः अपि तु दूषितजलवायुप्रभावेन अद्यतनीया पृथिवी पशुपक्षिकीटपतङ्गसरीसृपादिविहीना श्रीहीना च भवति। अस्याः समस्यायाः कारणं समाधानञ्च प्राचीनवैदिकसाहित्ये सुवैज्ञानिकरीत्या सुप्राचीनकालात् वैदिकविज्ञानिभिः बहुधा प्रतिपादितमस्ति। यद्यपि साम्प्रतिककालं विज्ञानकालमस्ति तथापि युगे युगे तु पुण्यकर्मणां प्रशंसनम् अशुभकर्मणां निन्दनं च करोति वेदः। न केवलमेतत् अपि तु साधूच्यते **“इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेदः”**[3] इति उच्यते।

पर्यावरणस्य एकैकमेव तत्त्वानि परस्परनिर्भरशीलानि परिपूरकाणि वा जायन्ते। सम्प्रति वैज्ञानिकप्रयोगाधारेण एतदेव प्रमाणितं यत् आकाशीय-विक्षोभेन, वायवीयविक्षोभेन, आग्नेयविक्षोभेन, जलीयविक्षोभेन, पृथ्वीविक्षोभेन अन्नादीनां समुत्पत्तिः सम्भवति। एवं समग्र-सृष्टिरियं पञ्चभूताश्रिता अस्ति। अतः समस्तप्राणिनां निरामयजीवनाय आकाशदीनां पञ्चमहाभूतानां विशुद्धं प्रदूषणरहितं वा परमावश्यकम्। यतो हि महाभूतानां प्रदूषणेन जीवनं व्याधिग्रस्तं शोकग्रस्तम् अशान्तं च भविष्यति। अतः पर्यावरणमिदं प्रदूषणात् परित्राणाय सम्प्रति वैज्ञानिकाः बहूपायानि चिन्तयन्ति, विविधेषु स्थानेषु संगोष्ठी कुर्वन्ति च। येन प्राणिनां पञ्चमहाभूतानां गुणं प्रदूषणरहितं स्यात्। यथा आकाशस्य शब्दः अनुद्वेगकरः, वायोः स्पर्शः मृदुः, अग्नेः रूपं सुन्दरं जलस्य रसः सुस्वादुः तथा पृथिव्याः गन्धः आनन्ददायिनी च स्यात्। जीवजगतः

---

[1] ऋग्वेदः -४/५७/३.

[2] ऋग्वेदः -१०/१२९/३.

[3] सायणभाष्यम्

 ISSN : 2583-2271
Vol. - 4, No. 1: 2024

कृते एतेषाम् एवं प्रयोजनम् अत्यावश्यकम्। वैदिकविज्ञानिनः सुप्राचीनकालाद् एतदर्थं सर्वादौ एतेषां शान्तिं प्रार्थयन्ति स्म। यथा **"ॐ द्यौः शान्तिरन्तरीक्षः शान्तिः पृथ्वी शान्तिरापः शान्तिः रोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वः शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥ ॐ शान्तिः शान्तिः शान्तिः"[4]।**

जलस्य अपरं नामास्ति जीवनम्। परन्तु तज्जलमद्य प्रतिनियतं प्रदूषितम्। अद्य तद्दूषणमात्रा एवम् अतिमात्रं प्रविशति यत् विशुद्धं जलम् अस्माकं समीपे दुराशामात्रम्। एतदर्थं पर्यावरणविज्ञानिनां गम्भीरचिन्तनं शोधकार्यं च प्रचलति। सम्प्रति तीव्र-औद्योगिकविकासः पुञ्जिवादी-विचार-धारा, प्राकृतिकपदार्थानां दोहनम्, अरण्य-ग्रामीण-पशु-पक्षि-कीट-पतङ्ग-सरीसृपादीन् प्रति भयानकरूपेण हिंसा, रसायनादीनां पदार्थानाम् अत्यधिकप्रयोगः, परमाणुविस्फोरकादीनां परिणामश्च, पर्यावरणप्रदूषणस्य प्रमुखकारणानि सन्ति। गृहस्थालि-शिल्प-कृषिक्षेत्रादीनां वर्ज्यवस्तूनि नदीह्रदादिषु प्रक्षेपात् जलं पर्यावरणं च प्रदूषितं भवति। एतदर्थं सम्प्रति परिवेशविज्ञानिनः क्रमवर्धमानं जलदूषणप्रसङ्गे गभीरभावेन चिन्तिताः। जलदूषणेन विशेषतः मनुष्याणां प्राणिजगतश्च व्यापकरूपेण हानिः सञ्जायते। आधुनिकयुगस्य इव सुप्राचीनवैदिकयुगे पानीयजलस्य संरक्षणस्य सुव्यवस्थाविधानस्य प्रयोजनं नासीत्। तदा प्रदूषणात् जलस्य रक्षार्थं वेदादिषु सुरक्षातत्त्वं समुपदिष्टम्। तद्यथा – **"मा आपो हिंसीः"[5], "नाप्सु मूत्रपुरीषं कुर्यात्"[6]** इत्यादयः। पुनश्च –

**"श्वात्राः पीता भवत यूयमापोऽ अस्माकमन्तरुदरे सुशेवाः।
ताऽस्मभ्यमयक्ष्माऽ अनीवाऽ अनागसः स्वदन्तु देवीरमृताऽ ऋतावृधः"[7]॥**

अर्थात्, विनाहानिकारकं जीवाणुविहीनं अशुद्धतादिदोषविवर्जितं दिव्यगुणयुक्तं सुपरीक्षितं शुद्धं च पानीयं पीत्वा मनुष्यः सुस्थः बलवान् सुखी च स्यात्। न केवलं खाद्ये पानीये च अपि तु स्नानादिषु अपि शुद्धजलस्य कामनाम् अथर्ववेदकर्त्तारः कुर्वन्ति स्म तद्यथा –

**"शुद्धा न आपस्तन्वे क्षरन्तु यो नः सेदुरप्रिये तं निदध्मः।
पवित्रेण पृथिवि मोत्पुनोमि"[8]॥**

जलं सुनिर्मलं विधातुं तदादीन्तनकालेऽपि जनसचेतनता मनुसंहितादिषु प्रामाण्यग्रन्थेषु परिलक्षिताऽस्ति। तद्यथा –

**"नाप्सु मूत्रपुरीषं वा ष्ठीवनं वा समुत्सृजेत्।
अमेध्यलिप्तमन्यद्वा लोहितं वा विषाणि वा"[9]॥**

अर्थात् जले मल-मूत्र-रुधिर-अमेध्यादिकम् अपवित्रं वस्तु न क्षिपेत्। न केवलं वैदिकविज्ञाने अपि तु सहस्रवर्षेभ्यः प्राक् पद्मपुराणस्य 'क्रियायोगसारः' इति खण्डे वेदादीनामिव अनुरूपमुक्तिः परिलक्षितास्ति। तत्रोच्यते गङ्गादिषु पवित्रनदीषु मलमूत्रत्यागशौचः तथा अपरिष्कृतजलप्रक्षेपः महापापस्य कारणमस्ति। एतादृशकार्यसम्पादनेन नराणां ब्रह्महत्यापातकः सञ्जायते। तद्यथा –

**"मूत्रं वाथ पुरीषं वा गङ्गातीरे करोति यः।
न दृष्ट्वा निष्कृतिस्तस्य कस्य कोटिशतैरपि॥
उच्छिष्टं कफकं चैव गङ्गागर्भे च यस्त्यजेत्।**

[4] यजुर्वेदः
[5] शुक्लयजुः -६/२२.
[6] तैत्तिः. आर. १/२६.७
[7] यजुः ४/१२
[8] अथर्वः -१२/१/३०
[9] मनु – ४/५६

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

**स याति नरकं घोरं ब्रह्महत्या च विन्दति”**[१०]॥

पर्यावरणप्रदूषणस्य द्विविधं कारणं परिलक्ष्यते-प्राकृतिकं मनुष्यसृष्टञ्च। सम्प्रति जीवनस्वरूपं जलमपि मनुष्यस्याविवेकेन प्रदूषितम्। गङ्गा-यमुनासदृशीषु सुस्वादुपवित्रपेयसलिलेषु नदीषु नदीतटस्थनगराणां मलमूत्रादिकं मालिन्यं नदीषु निपात्यते। औद्योगिकं विषमयरसायनदूषितजलमपि तासु निपात्यते। नराणां पशूनाञ्च शवास्तत्र प्रवाह्यन्ते। सर्वमेतदतिभीतिकरं प्रदूषणं कुरुते। जलं तथा विषाक्तं जायते यत् मत्स्याः जलजन्तवश्चापि म्रियन्ते। तथाविधं जलं मानवानां स्नानपानादिजनितं रोगमेव प्रकुरुते। सौभाग्येन सम्प्रति प्रशासनेन गङ्गाप्रदूषणनिवारकं प्राधिकरणं घाटितं, परन्तु जनसाहाय्येन विना वास्तविकलाभो नैव भविष्यति। सुप्राचीनवैदिकयुगे तु नदीनिर्झरिण्यादीनां सुनिर्मलं जलं व्यवहृत्य जीवाः निरामयाः दीर्घजीविनः चासन्। परन्तु सम्प्रति नदीनिर्झरिण्यादीनां जलं प्रायशः न व्यवह्रियते। जनाः वैज्ञानिक-पद्धत्या जलं सुनिर्मलं विधाय खाद्यपानीयादिषु व्यवहरन्ति। यतो हि विशुद्धजलेनैव जीवजगतः जीवनं शिवमयं जायते। एतदर्थं वैदिकर्षीणां कण्ठे ध्वनितोऽभूत् – **“शुद्धाः सतीस्ता उ शुम्भन्त”**[11] एव। अर्थात् परिशुद्धं जलमेव ग्राह्यम्। अपरिशुद्धं जलम् अग्राह्यं तद्यथा – **“विभाज्य धीरीतरा जहीतात्”**[12] एवञ्च **“मधुमतीरोषधीर्द्याव आपो मधुमन्नो भवत्वन्तरिक्षम्”**[13]। जलमेव अमृततुल्यं जीवप्रदायकम्। जलम् अस्मान् जीवयति इति हेतोः तदमृतमुच्यते। **“ता जीवन्ता जीवधन्याः प्रतिष्ठाः”**[14] एतत् जलम् अस्माकं शरीरस्य दूरितं मलं विनाशयति। उच्यते च – **“अरिप्रा आपो अपरिप्रमस्मात्”**[15] न केवलमेतत् अपि तु जलं साक्षादेव भेषजम्। एतदर्थम् अथर्ववेदीयऋषयः उच्यन्ते स्म – **“अप्स्वन्तरमृतमप्सु भेषजम्”**[16] ते ऋषयः तस्यैव समीपे प्रार्थयामासुः – हे जलाधिष्ठात्रि देवते! त्वम् अस्माकं शरीरस्य कृते रोगविनाशकं भेषजं प्रेरय येन वयं निरामयाः सन्तः सूर्यं पश्येम। तद्यथा – **“आपः पुनीत भेषजं वरुथं तन्वे मम ज्योक्च सूर्यं दृशे”**[17]॥

**निष्कर्षः –** जलं समाश्रित्य एव जीवनस्य जीविकायाश्च अग्रगतिः अपेक्षते। वर्तमानकालस्य इव प्राचीनवैदिकयुगे जलप्रदूषणं विशेषभावेन न परिदृष्टम्। यतो हि जनविस्फोरणं नगरायनं शिल्पायनं वा तदा न जातम्। तथापि प्राचीन-भारतीय-वैदिकर्षीणां मनने तदानीन्तनजलसंरक्षणभावना नः मनांसि आन्दोलयति। जलं प्रदूषणमुक्त्यर्थं जलसंरक्षणार्थं च दल-मत-निर्विशेषेण सकलविश्ववासिनां ‘जलरक्षा जीवनरक्षा’ इति मन्त्रं परिभावनीयम्। एवं स्मरणीयं यत् परिच्छन्नं जलं पर्यावरणं वा सुस्थजीवनस्य दायकं न तु अन्यत्। जलसंरक्षणाय दूषणप्रतिरोधाय च व्यक्तिगतप्रचेष्टा अत्यावश्यकी। न केवलं कापि संस्था कोऽपि जनविशेषः न राष्ट्रं वा पर्यावरणस्य रक्षाकर्ता। वयमेव सर्वे परिवेशस्य रक्षिणः। सर्वेषां प्रचेष्टया सहयोगितया च दूषणनियन्त्रणं न दूरायत्तम्। यदि कोऽपि अज्ञातावशात् परिवेशं दूषयति तर्हि तस्य उपयुक्ता शिक्षा विधेया। यदि स्वार्थसिद्ध्यर्थं स्वेच्छया वा कोऽपि परिवेशम् अपरिच्छिन्नं करोति, तर्हि सुकठोरा शास्तिः तेन प्राप्तव्या। सम्प्रति

[10] पद्म. पु – ८/७, ८/१०
[11] अथर्व. १२/३/१/२६.
[12] अथर्व. ११/१/२/३.
[13] ऋग्वेद. ४/५७.
[14] अथर्व. १२/१/३/२५.
[15] अथर्व. १०/३/१/२४.
[16] अथर्व. १/१/४/४.
[17] अथर्व. १/१/६/३.

भारतसर्वकारस्य 'स्वच्छता अभियाननीतिः' सर्वेषु क्षेत्रेषु कार्यं कर्तुं दृढसंकल्पबद्धा। सम्प्रति भारतवर्षस्य सर्वेषु विद्यालय-महाविद्यालय-विश्वविद्यालयादिषु परिवेशविज्ञानविषयः पाठ्यरूपेण प्रचलितोऽस्ति। एतत् न केवलं पाठ्यदाने अपि तु प्रयोगक्षेत्रे यदि वाध्यतामूलकरूपेण अयमेव नियमः प्रचलितः भवेत् तर्हि अवश्यमेव न केवलमात्रं जलसम्पद् अपि तु समग्रं पर्यावरणमिदं सुरक्षितं सुस्थमयं च भवेत् इति शम्।

**सहायकग्रन्थसूची**


- ऋग्वेदसंहिता, अनुवादकः- हिरण्मयवन्द्योपाध्यायः, हरफ-प्रकाशनी, कलेजष्ट्रीट् , कोलकाता-७००००७
- मनुसंहिता, अनुवादकः- मानवेन्दुमुखोपाध्यायः, संस्कृतपुस्तकभाण्डारः, कोलकाता-७००००६
- यजुर्वेदसंहिता, अनुवादकः- विजनविहारी-गोस्वामी, हरफप्रकाशनी, कलेजष्ट्रीट्, कोलकाता-७००००८
- वैदिक-साहित्येर-इतिहास, अनुवादकः- प्रद्योतकुमारवन्द्योपाध्यायः, ढाका-ष्टुडेण्ट्स्-लाइब्रेरी, कोलकाता-७०००७३
- वैदिक-साहित्येर-रूपरेखा, अनुवादकः- श्रीमती-शान्ति-वन्द्योपाध्यायः, संस्कृत-पुस्तक-भाण्डारः, कोलकाता-७००००६
- संस्कृतसाहित्येर इतिहास, धीरेन्द्रनाथ-वन्द्योपाध्यायः, पश्चिमबङ्गराज्यपुस्तकपर्षत्, कोलकाता-७००००६

# शङ्करभणितिपर्यालोचनपूर्वकं शब्दानुशासनशास्त्रस्य निःश्रेयससाधनत्वविमर्शः

**सुव्रत-मण्डलः**
**सहायकाध्यापकः, संस्कृतविभागे, रवीन्द्रभारतीविश्वविद्यालयस्य**
**कलिकाता, पश्चिमबङ्गः**

**प्रबन्धसारः**

*निबन्धेऽस्मिन् शब्दानुशासनशास्त्रस्य साधारणप्रयोजनानि, वैयाकरणदार्शनिकदिशा च शब्दानुशासनशास्त्रस्य आत्यन्तिकदुःखनिवृत्तिसहायकत्वञ्च पर्यालोचितम्। किञ्च **"नहि नहि रक्षति डुकृञ्-करणे"** इति शङ्करवचनस्य विशेषतात्पर्यमिह पर्यालोचितम्। साधारणदृष्ट्या **डुकृञ्-करणे** इति पदं व्याकरणमात्रस्योपलक्षणम् इति मत्वा न हि शब्दशास्त्रमात्यन्तिकनिवृत्तिसहायकमित्यामनन्ति साधारणजनाः। परन्तु वैयाकरणदार्शनिकाः शब्दस्य यथार्थस्वरूपविज्ञानेनात्यन्तिकनिवृत्तिं लब्धुं शक्यते इति प्रतिपादितवन्तः स्वीयदार्शनिकतत्त्वसमृद्धेषु वाक्यपदीयादिषु ग्रन्थेषु। शब्दब्रह्मसायुज्यलाभाय ते शब्दशास्त्रस्यैव प्राधान्यं स्वीकृतवन्तः। तद्धर्यालोच्यवचनस्य किं तात्पर्यं तदिह समुपस्थापितं वैयकारणदार्शनिकमतोपस्थापनपुरःसरम्।*

**कुञ्चीशब्दाः –** दुःखत्रयं, शब्दसायुज्यं, शब्दसंस्कारः, आर्त्विजीनः, प्रपञ्चः, विवर्त, आत्यन्तिकनिवृत्तिः चेत्यादयः।

******************************************************************************

## १. उपोद्घातः –

जगत्याध्यात्मिकमाधिदैविकमाधिभौतिकञ्चेति दुःखत्रयम्। लौकिकेनोपायेन आत्यन्तिकनिवृत्तिः दुःखत्रयाणामशक्यैव। दुःखत्रयाभिघाताच्छास्त्र-जिज्ञासा करणीयेति सांख्यानामभिमतम्। तथाह्युच्यते –

'दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।
दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात्।।'[1] इति।

दुःखं जिहासितं शक्यसमुच्छेदञ्च। तत्त्वज्ञानमेव तद्घातोपायत्वेनोदयनाचार्येणालोचितम्। तथाह्युक्तं तेन – 'इह खलु निसर्गप्रतिकूलस्वभावं सर्वजनसंवेदनसिद्धं दुःखं जिहासवः सर्व एव तद्घातोपायमविद्वांसोऽनुसरन्तश्च सर्वाध्यात्मविदेकवाक्यतया तत्त्वज्ञानमेव तदुपायमाकर्णयन्ति, न ततोऽन्यम्'[2] इति। तत्त्वज्ञानमित्यनेनात्मतत्त्वज्ञानस्यैवाचार्येण परामर्शो विहितः। उक्तञ्च तथाहि तेन – 'प्रतियोग्यनुयोगितया चात्मैव तत्त्वतो ज्ञेयः'[3] इति।

अधुना प्रश्नोऽयमुपस्थाप्यते यद्दुःखत्रयाणाम् आत्यन्तिकनिवृत्तयेऽपवर्गलाभाय वा शब्दानुशासनशास्त्रजिज्ञासा किं फलदायिनी भवेत्?

## २. शब्दानुशासनशात्रस्य प्रयोजनविशेषे साधारणविमर्शः-

शब्दानुशासनशास्त्रस्य परं प्रयोजनं हि लघुनोपायेन शब्दानुशिष्टिः। अतोऽसाधुशब्देभ्यो विविच्य साधुशब्दानां ज्ञानमेव फलं शब्दानुशासनशास्त्रस्य। फणीन्द्रेणाभाणि शब्दानुशासनशास्त्रस्य मुख्यप्रयोजनख्यापनावसरे पस्पशाह्निके- 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति। किञ्च, नैकानि आनुषङ्गिकप्रयोजनानि तेन तत्र ख्यापितम्।

साधुशब्दविज्ञानं लौकिकाभ्युन्नतिप्रदायकं भवत्येव। तथाहि भाष्यकारेणोक्तं वाग्योगविदां विषये – 'यो वा इमां पदशः स्वरशोऽक्षरशश्च वाचं विदधाति स आर्त्विजीनो भवति'[4] इति। यज्ञो हि

---

[1] सांख्यकारिकायां - १
[2] आत्मतत्त्वविवेके
[3] तत्रैव
[4] महाभाष्ये पस्पशाह्निके

वेदोक्तं कर्म। तस्य निष्पादनाय यजमानस्य याजकस्य चार्त्विजीनत्वम् अपेक्षितम्। अत आर्त्विजीनः प्रशंसनार्हो भवति। एवं शब्दानुशासनशास्त्राध्ययनेन एषा अभ्युन्नतिः लभ्यते वाग्योगविदा।

किञ्च साधुशब्दज्ञानेन पारलौकिकाभ्युन्नतिरपि संसूच्यते भाष्यकारेण – 'एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति'[5] इति।

अत्र विचार्यो विषयो हि लौकिकाभ्युन्नतिर्हि न चिरस्थायिनी। सा च नात्यन्तिकदुःखहन्त्री। स्वर्लोकाप्तिरपि न परमपुरुषार्थः। यद्यपि -

'यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतञ्च तत्सुखं स्वःपदास्पदम्।।'[6]

इति स्वर्लक्षणे निगदितं तथापि 'क्षीणे पुण्ये पुनर्मर्त्यलोकं विशन्ति'[7] इति भगवद्वचनादेव ज्ञायते सुष्ठुशब्दप्रयोगजन्या ज्ञानजन्या वा लौकिकाभ्युन्नतिः पारलौकिकाभ्युन्नतिर्वा चरमपुरुषार्थप्रदानेऽसमर्था।

किञ्चात्र शङ्कराचार्यवचनम् अपि विशेषगुरुत्वावहम्। शङ्कराचार्येण **भज गोविन्दम्** इत्यत्र आदिम एव श्लोके निगदितम् –

'भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते।
सम्प्राप्ते सन्निहिते काले **नहि नहि रक्षति**
**डुकृञ्करणे'**[8] इति।

सामान्यरूपेण यदि आचार्यवचनं वयं पश्यामः तर्हि **नहि नहि रक्षति डुकृञ्करणे** इत्यस्माद्वचनाद् अर्थप्रतीतिर्भवति यद् व्याकरणपाठेन आत्यन्तिकदुःख-निवृत्तिर्मुक्तिर्वा न भवतीति। किं तर्हि शब्दानुशासनशास्त्रं न चरमपुरुषार्थप्रदायकम्?

**३. शब्दानुशासनशास्त्रस्य आत्यन्तिकदुःख-निवृत्तिविषयकं पर्यालोचनम् -**

शब्दसंस्कार एव परमात्मसिद्धिः। तस्य शब्दात्मनः प्रवृत्तितत्त्वज्ञः ब्रह्मामृतममश्नुते। उच्यते तथाहि –

'तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।
तस्य प्रवृत्तितत्त्वज्ञस्तद्ब्रह्मामृतमश्नुते।।'[9] इति।

शब्दानां साधुत्वव्यवस्थितिर्हि शब्दसंस्कारः। एवं शब्दानुशासनशास्त्रेण न केवलं लौकिकाभ्युन्नतिः क्षणस्थायिनी स्वर्गादिप्राप्तिर्वा संघटते, तच्च शास्त्रमपवर्गप्रदायकमपि।

शब्द एव परमात्मा जगत्कारणम्। वाक्यपदीयादिषु दार्शनिकतत्त्वसमृद्धशब्दशास्त्रेषु दार्शनिकतत्त्वानि शब्दानुशासनशास्त्रस्य प्रतिपादितानि। बीजञ्चैतेषां दार्शनिकतत्त्वानां त्रिमुनिव्याकरण एव निहितं दृश्यते। वस्तुतः शब्दस्यानित्यत्वात् नादैरभिव्यज्यमानः स्फोट एवार्थप्रत्यायको भवति। स च नित्य इति शाब्दिकदार्शनिकानामभिमतम्।
मीमांसकनैयायिकादीनां पूर्वपक्षिणां मतखण्डनं कृत्वा नागेशादिभिः स्वीयप्रौढग्रन्थेषु स्फोटतत्त्वं प्रतिष्ठापितम्। स्फोटतत्त्वस्वीकार उपयुक्तानि युक्तिजालानि नात्र वर्ण्यन्ते। तत्र स्थितानां दार्शनिकतत्त्वानामालोचनेनैव शब्दानुशासनशास्त्रे प्रतिपादितमात्मतत्त्वं स्फुटं भवति। तथाह्युपनिषदि यथा द्वैतलेशहीनं सच्चिदानन्दरूपं ब्रह्म परमतत्त्वरूपेण वर्णितं तथैव वैयाकरणदार्शनिकानां नये शब्दतत्त्वं हि तत्परमतत्त्वम्। तथाह्युच्यते वाक्यपदीये –

'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावे प्रक्रिया जगतो यतः।।'[10] इति।

उत्पत्तिविनाशरहितं प्रागभावप्रध्वंसाभावप्रतियोगि यद्दर्शनान्तरप्रतिष्ठितं

---

[5]तत्रैव
[6]सांख्यतत्वकौमुद्यां (प्रथमकारिकाया आलोचनावसरे)
[7]श्रीमद्भगवद्गीतायां – ९.२१
[8] भज गोविन्दम् इत्यस्य आदिमश्लोकः
[9]वाक्यपदीये ब्रह्मकाण्डे - १३१
[10]वाक्यपदीये ब्रह्मकाण्डे - १

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

ब्रह्म तदत्र व्याकरणदर्शने शब्दतत्त्वमिति प्रतिज्ञायते। सर्वेषां रूपादिपदार्थानां शब्दानुगतत्वेन शब्द एव प्रकृतिः। अत एव शब्दे ज्ञाते अर्था प्रतीयन्ते। उच्यते भर्तृहरिणा तथाहि –

'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शास्त्रेण भासते।।'[11] इति।

दण्डिनापि अनुरूपमेव प्रोक्तम् –

'इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।'[12] इति।

शब्दतत्त्वाख्यं ब्रह्मैव घटपटाद्यर्थरूपेण अवभासते। ननु शब्दतत्त्वाख्यस्य ब्रह्मणो घटादिविचित्रार्थावभासे किं बीजमिति चेदुच्यते – 'विवर्तते' इति। उपसंहृतक्रमाच्छब्दतत्त्वाख्याद् ब्रह्मणो जगतः सर्वे विकाररूपा भावा भवन्ति। शब्दादेव प्रवृत्तिनिवृत्ती भवतः। उत्पत्तिस्थितिविनाशरूपा विकारा अपि शब्दब्रह्मणः कालशक्तिवशादेव भवन्ति। वस्तुत एकस्य तत्त्वादप्रच्युतस्य भेदानुकारेण असत्या विभक्तान्यरूपेण उपग्राहिता हि विवर्तः। शब्दतत्त्वप्रसङ्गे 'घटोऽयम्' इति मूर्तविवर्तः 'घटो नष्टः' इति क्रियाविवर्तः। वेदान्तिन आमनन्ति –

'विवर्तस्तु प्रपञ्चोऽयं ब्रह्मणोऽपरिणामिनः।
अनादिवासनासम्भूतो न सारूप्यमपेक्षते।।'[13] इति।

एवमेव शाब्दिकानां नयेऽपि जगत्प्रक्रिया तु शब्दब्रह्मणो विवर्तभूता। किञ्च, अक्षरमित्यनेन शब्दब्रह्मणः कूटस्थत्वमपि स्वीक्रियते। अतो वागेव ब्रह्मेति वैयाकरणदार्शनिकानां दर्शनम्। तत एव दृश्यं जगदिति श्रुतिरपि श्रावयति – 'वागेव विश्वा भुवनानि जज्ञे'[14] इति। अतो वैशेषिकैः पदार्थनाम्ना स्वीकृता वेदान्तिभिश्च ब्रह्मणो विवर्तरूपेणाङ्गीकृता यावन्तो भावास्ते शब्दस्यैव विवर्ता इति सविमर्शो राद्धान्तः शाब्दिकानाम्। तथाह्युक्तं-

'ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्।
विवृतं शब्दमात्राभ्यस्तास्वेव प्रविलीयते।।'[15]
इति।

एवं शब्दतत्त्वं ब्रह्मस्वरूपमिति प्रतिपादयन्ति शाब्दिकाः।

भागवतेऽपि अयं वादः समर्थ्यते –

'अहं सर्वाणि भूतानि भूतात्मा भूतभावनः।
शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू।।'[16] इति।

गीतायामपि – 'ओमित्येकाक्षरं ब्रह्म'[17] इति वचनं समर्थकमस्य शब्दब्रह्मवादस्येति मन्ये।

'एकमेवाद्वितीयम्'[18] इत्यादिश्रुतिवाक्यैः ब्रह्मणोऽद्वैतत्वं समर्थितम्। एवमेव शब्दब्रह्मणोऽपि अद्वैतत्वं शाब्दिकैः स्वीकृतम्। तथाह्युच्यते भर्तृहरिणा –

'एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्।
अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते।।'[19] इति।

शब्दब्रह्म एकं सजातीयविजातीयस्वगतभेद-शून्यमिति तात्पर्यमस्य। एवं शक्तिभ्यः स्वयोग्यतारूपाभ्यः अपृथक्त्वेऽपि भेदाभावे सत्यपि पृथक्त्वेनेव भासते, स्वरूपतो भिन्नं न भवतीति एकत्वमस्य शब्दब्रह्मण उपपाद्यते। तस्यैव शब्दाद्वैतवादस्य सुष्ठु प्रतिष्ठापनाय एकस्यापि अनेकधा स्थितिः शब्दतत्त्वस्य दर्शयति आचार्यः –

'एकस्य सर्वबीजस्य यस्य चेयमनेकधा।
भोक्तृभोक्तव्यरूपेण भोगरूपेण स्थितिः।।'[20] इति।

बीजं हि परस्परविरुद्धगुणवतां पर्णफलादीनाम् एकमेवोद्गमस्वरूपम्। शब्दात्मापि तद्वत् सर्वेषां विरुद्धाविरुद्धपदार्थानामुद्गमस्थलम्। पार्थिवबीजस्य

---

[11]वाक्यपदीये - १/१२३
[12]काव्यादर्शस्य प्रथमपरिच्छेदे, श्लोकः-४
[13]भामतीटीकायाम्
[14]शतपथब्राह्मणे
[15]हरिवृषभवृत्तौ
[16]भागवते – ६.१६.५१
[17]श्रीमद्भगवद्गीतायां – ८.१३
[18]छान्दग्योपनिषदि – ६.२.१
[19]वाक्यपदीये ब्रह्मकाण्डे - २
[20]वाक्यपदीये - १/४

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

सीमिता शक्तिः। साधारणतया बीजम् एकमेव वृक्षं जनयति। परन्तु अप्रतिबद्धशक्तित्वाच्छब्दतत्त्वस्य सर्वबीजत्वम्। एकस्यैव सर्वोत्पत्तिकारणरूपबीजस्य भोक्तृभोक्तव्यरूपेण भोगरूपेण चानेकधोपस्थितिः। भोक्तृभोक्तव्यभोगेति अत्र हि उपलक्षणं – कर्तृ-कर्मकारकाणां साधकसाध्यसाधनानामेवम् अन्येषाञ्च। यच्चायं करोति, यच्च येन यथा च क्रियते इत्येतत्सर्वं शब्दब्रह्मैव। विवर्तमानस्य तस्येयमनेकधा स्थितिः भिन्नशक्तिव्यापाराश्रयणात्। स्वरूपत एक एवेति भावः।

एवं शब्दतत्त्वम् अद्वैतं ब्रह्म। तेनान्तरावस्थितेन महावृषेण सायुज्यं, संहृतक्रमस्य तस्य तत्त्वतः साक्षात्कारो वापवर्गः। यो हि वाग्योगविद् वैयाकरणः स प्रकृतिप्रत्ययादिरूपविभागप्राप्ताया वैखर्याः वाचः प्रकृतिभूतां प्रतिभाख्यां समनुगच्छति ततश्च प्रत्यस्तमितसर्वविकारां सत्तामात्रां परां प्रकृतिं प्रतिपद्यते। अयमेव शाब्दिकानामपवर्गः। शब्दब्रह्मणः अवगत्युपायो हि वेदः। ऋग्यजुःसामाथर्वप्रभृतिभेदेन भिन्नोऽपि मूलत स उपाय एक एवेति सूचयति ग्रन्थकारः –

‘प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः।
एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक् पृथक्।।’[21]
इति।

सर्वे ज्ञानसंस्कारहेतवो विधातुः शब्दब्रह्मण एव विद्याभेदाः। अङ्गानि हि शिक्षाकल्पनिरुक्तादीनि उपाङ्गानि दर्शनपुराणादीनि। अत्र प्रसङ्गतो वक्तुं शक्यते शिक्षाकल्पादिषु अङ्गेषु व्याकरणस्यैव मुख्यत्वम्। ‘मुखं व्याकरणं स्मृतम्’[22], ‘प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः’[23] इत्यादिवचनं तु सुप्रसिद्धमेव। व्याकरणं विना शब्दतत्त्वावबोधः असम्भवी। तथाहि भर्तृहरिणा भणितं – ‘तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते’[24] इति।

अतः ‘तद्द्वारमपवर्गस्य’ शब्दानुशासनशास्त्रम् एव। तस्य च राजमार्गसूचिका प्रसिद्धा भणितिर्हि – ‘इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
**इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः**।।’[25] इति।

एवं कृते पर्यालोचने दृश्यते यच्छब्दतत्त्वमेवानादिनिधनं ब्रह्म। वस्तुतोऽत्र स्फोटात्मकस्यैव शब्दब्रह्मत्वेन ग्रहणम्। निरूपितं तथाहि नागेशेन - ‘ननु कस्तर्हि वृत्त्याश्रयः शब्दः?’ इत्यस्यालोचनावसरे ‘स स्फोटात्मक इति गृहाण’[26] इति। ब्रह्मतत्त्वप्रतिपादकशास्त्रेषु यथा ब्रह्मणः स्वरूपं निगदितं तथैव शब्दब्रह्मणः स्वरूपमाकलयन्ति शाब्दिकदार्शनिकाः। तस्य शब्दब्रह्मणः सायुज्यप्राप्तिरेव अपवर्गः। तत्प्राप्तौ च मुख्यं सहायकं शब्दानुशासनशास्त्रमेव।

**४. नहि नहि रक्षति डुकृञ्करणे इत्यस्य विशेषतात्पर्यम्-**

तर्हि **नहि नहि रक्षति डुकृञ्करणे** इत्यस्य किं विशेषतात्पर्यं तदिहानुसन्धेयम्। वस्तुतो ब्रह्मतत्त्वविज्ञानमात्मतत्त्वज्ञानं वा निःश्रेयससाधनम्। तत्त्वावबोधं विना केवलं शब्दानुशासनशास्त्रपारायणेन न परमपुरुषार्थलाभ इति आचार्याणामभिप्रायः। किञ्चात्र वक्तुं शक्यते ‘नहि नहि रक्षति डुकृञ् करणे’[27] इति शङ्करवचने डुकृञ् करणे इति उपलक्षणमात्रम्। अनेन समेषां एव लौकिकशास्त्राणां ग्रहणं कर्तुं शक्यते। एवं न्यायव्याकरणादिलौकिकशास्त्राणां तत्त्वावबोधं विना केवलं पारायणेन न मुक्तिरिति भावः समायाति। अतः तत्त्वावबोधपूर्वकमध्ययनमेव

[21]वाक्यपदीये - १/५
[22]पाणिनीयशिक्षायाम्
[23]वाक्यपदीये – १/११
[24]वाक्यपदीये – १/१३
[25]वाक्यपदीये ब्रह्मकाण्डे - १६
[26]परमलघुमञ्जूषायां स्फोटनिरूपणे
[27]भजगोविन्दम् इत्यस्यादिमश्लोके

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

शास्त्राणां काम्यम्। एवं शब्दतत्त्वमेवानादिनिधनब्रह्मरूपेणाधिगम्य तत्सायुज्यलाभ एव शाब्दिकानामपवर्गः। पदार्थानाम् पारमार्थिकतया ज्ञानेन च नैयायिकानामपवर्गः। एवमन्येषां सांख्यादिशास्त्राणामध्येतारो यदि प्रकृततत्त्वं विज्ञातुं शास्त्राध्ययनं कुर्वन्ति न केवलं पाण्डित्यप्रदर्शनाय तर्हि अवश्यमेव तानि शास्त्राणि आत्यन्तिकदुःखनिवृत्तिसहायकानि भविष्यन्ति इत्येव मन्ये आचार्यशङ्कराणामभिमतम्।

**५. उपसंहारः**

एवं कृते पर्यालोचने दृश्यते यत् शङ्करवचनस्य सामान्यमर्थमादाय नैके व्याकरणशास्त्रस्य मोक्षप्रदाने नास्त्युपयोग इत्यामनन्ति। वस्तुतः वैयाकरणदार्शनिकानां भर्तृहर्यादीनां मतमनुसन्धामश्चेत् तत्र सयुक्तिकं शब्दब्रह्मणः स्वरूपं पर्यालोचितम्। तत्सायुज्यलाभाय व्याकरणमेव अजिह्मा राजपद्धतिरिति तैरुररीकृतम्। वस्तुतः स शब्दः स्फोटरूपः। न हि वैखरीनादरूपः। महाभारतवचनमुद्धृत्य सर्वदर्शनकृद्भिर्माधवाचार्यैरभाणि - "तदित्थं कूटस्थे परस्मिन्ब्रह्मणि सच्चिदानन्दरूपे प्रत्यगभिन्नेऽवगतेऽनाद्यविद्यानिवृत्तौ तादृग्ब्रह्मात्मना-वस्थानलक्षणं निःश्रेयसं सेत्स्यति। 'शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति'[28] इत्यभियुक्तोक्तेः"[29]इति। अन्येषामप्याचार्याणां शब्दब्रह्मविषयकं मतमिह सङ्कलितम्। वैयाकरणाः स्फोटरूपं शब्दमेव ब्रह्मत्वेनामनन्ति। तत्सायुज्यलाभ एव अपवर्गः शाब्दिकानाम्। तत्र च शब्दानुशासनशास्त्रस्यैव गुरुत्वाधिक्यम्। एवं शब्दानुशासनशास्त्रस्य निःश्रेयसाधनत्वं नितरामस्तीति शिवम्।

**सहायकग्रन्थसूची**


- नागेशभट्टः। (२०११)। परमलघुमञ्जूषा। लोकमणिदाहालः (सम्पा.)। वाराणसी : चौखम्बासुरभारतीप्रकाशनम्।
- पतञ्जलिः।(१९२५)। महाभाष्यम् (पस्पशाह्निकम्)। दण्डिस्वामिदामोदराश्रमः (सम्पा. अनु.)। कोलकाताः आद्यापीठम्।
- पतञ्जलिः। (१४१७ बङ्गाब्दः)। महाभाष्यम् (पस्पशाह्निकम्) (तृतीयसंस्करणम्)। संघमित्रासेनगुप्तः दासगुप्तः (सम्पा.)। कलकाता :कल्याणी दासगुप्तः।
- भट्टाचार्यः, रवीन्द्रकुमारः। (२००८)। शब्दतत्त्व। कोलकाताः सदेशः।
- भट्टाचार्यः, रवीन्द्रकुमारः। ( २००९)। शब्दार्थतत्त्व। कोलकाताः सदेशः।
- भर्तृहरिः। (२००७) वाक्यपदीयम् (ब्रह्मकाण्डः) प्रथमखण्डः । विष्णुपदभट्टाचार्यः ( सम्पा.)। कलकाता : पश्चिमवङ्ग-राज्य-पुस्तक –पर्षत्।
- भर्तृहरिः। (२००७) वाक्यपदीयम् (ब्रह्मकाण्डः) द्वितीयखण्डः । विष्णुपदभट्टाचार्यः ( सम्पा.)। कलकाता : पश्चिमवङ्ग-राज्य-पुस्तक –पर्षत्।
- माधवाचार्यः। २०१३। सर्वदर्शनसंग्रहः। पं० उदयनारायणसिंहः (सम्पा.)। बम्बई : खेमराज श्रीकृष्णदासप्रकाशनम् ।
- मिश्रः, वाचस्पतिः। (१४१८ वङ्गाब्दः)। सांख्यतत्त्वकौमुदी। श्रीनारायणचन्द्रगोस्वामी (सम्पा.), कलकाता : संस्कृतपुस्तकभाण्डारः।


[28]महाभारते शा. प. अ. २७०

[29]सर्वदर्शनसंग्रहे पाणिनिदर्शने

# प्रथमन्यायसूत्रव्याख्याने न्यायभाष्यन्यायसूत्रवृत्त्योर्वैलक्षण्यसमीक्षणम्

**डॉ. दीपक-गराइ**
**सहायकाध्यापकः, संस्कृतविभागः, विजयनारायणमहाविद्यालयः**
**इटाचुना, हुगली, पश्चिमबङ्गः**

***प्रबन्धसारः***

*न्यायशास्त्रे प्रमाणप्रमेयादिषोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसाधिगमो भवतीति सूत्रकारेण महर्षिगौतमेन अक्षपादेन वा न्यायसूत्रग्रन्थस्यादावेव प्रथमसूत्रे समुद्घोषितम्। अतो मोक्षप्राप्तये निःश्रेयसाधिगमाय वा प्रमाणप्रमेयादिषोडशपदार्थानां तत्त्वज्ञानमेव न्यायशास्त्रस्य मुख्यं प्रतिपाद्यम्। तत्र 'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयव-तर्कनिर्णयवादजल्पवितण्डा-हेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः' इति न्यायदर्शनस्य तावत् प्रथमं सूत्रम्। वार्त्तिककारेण तात्पर्यकारेण च विग्रहवाक्ये वचनस्य किं स्वरूपं स्याद् इति आलोचयतापि अधिकविचारे न स्वरसः प्रदर्शितः। किन्तु न्यायसूत्रवृत्तौ तु विश्वनाथन्यायपञ्चाननेन विस्तरशो व्याख्या कृता। सूत्रस्य विग्रहवाक्यं तथा भाष्यस्थितवचनपदतात्पर्यं सर्वमेव व्याख्यातं तेन। तथाहि भिन्नसमासे स्वीकृते तु यत्किञ्चित् पदार्थविशेषस्य प्राधान्यात् तत्तत्पदार्थानामेव निःश्रेयसलाभे साधकत्वं स्यात्, न तु सर्वेषां पदार्थानाम्। किन्तु निःश्रेयसलाभे सर्वेषामेव पदार्थनां साधकत्वमस्तीति प्रतिपादयितुमेव प्रस्तुतसूत्रे द्वन्द्वसमासः स्वीकार्यः एव। किञ्च, अविगीतशिष्टाचारविषयत्वाद् वेदबोधितकर्तव्यताकं मङ्गलं ग्रन्थादौ महर्षिगौतमेनाचरितं न वेति न्यायसूत्रग्रन्थे वयं सन्दिहाना एव। सन्देहस्यास्य निराकरणं तु न्यायसूत्रवृत्तिकारेण विश्वनाथन्यायपञ्चाननमहाभागेन कृतं स्वकृतौ न्यायसूत्रवृत्तौ। तथाहि महर्षिणा अक्षपादेन न्यायसूत्रस्यादिमसूत्रे आदावेव प्रमाणशब्दस्योल्लेखात् 'अभ्यर्हितं पूर्वम्' इति न्यायेन तस्य प्रमाणपदार्थस्य मुख्यत्वं ध्वनितम्। तत्र प्रथमसूत्रे प्रमाणशब्दस्य महाभारतस्य विष्णुसहस्रनामस्तोत्रे 'प्रमाणं तु प्राणनिलयः प्राणभृत्प्राणजीवनः, तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः'[1] इति स्थले वर्तमानत्वात्, तेन च माङ्गलिकत्वात् प्रमाणशब्दोच्चारणेनैव मङ्गलमाचरितम्।*

*किञ्च, केषाञ्चन विदुषां मते भाष्यकारेण वात्स्यायनेन न्यायसूत्रभाष्यस्यादौ 'ॐ नमः प्रमाणाय' इत्येवं प्रकारेण मङ्गलमाचरता प्रमाणशब्दस्य मुख्यत्वं प्रतिपादितम्। अतः ईश्वरवाचकत्वादपि तस्य प्राधान्यं ध्वन्यते। अत्रेदं ज्ञेयं यत् महामहोपाध्यायपण्डितफणिभूषणतर्कवागीशमहोदयस्य मते यद्यपि केषुचित् पुस्तकेषु भाष्यारम्भे 'ॐ नमः प्रमाणाय' इत्येवं पाठः प्राप्यते परन्तु 'तद्वचनं भाष्यकारस्यैव' इति कथने प्रामाण्यं नास्ति।[2] परन्तु खीष्टीयदशमशताब्द्यां 'न्यायकन्दली' इति टीकायाः प्रारम्भे श्रीधरभट्टेन लिखितं यत् न्यायभाष्यकारेण पक्षिलस्वामिना नमस्कारपूर्वकं मङ्गलमाचरितं परन्तु भाष्यारम्भे तत्र लिपिबद्धम्।*

**कुञ्चीशब्दाः**— न्यायसूत्रम्, मोक्षः, मङ्गलाचरणम्, निःश्रेयसम्, प्रमाणम्, प्रमेयः चेत्यादयः।

*******************************************************************************

**भूमिका**—न्यायशास्त्रे प्रमाणप्रमेयादिषोडश-पदार्थानां तत्त्वज्ञानान्निःश्रेयसाधिगमो भवतीति सूत्रकारेण महर्षिगौतमेन अक्षपादेन वा न्यायसूत्रग्रन्थस्यादावेव प्रथमसूत्रे समुद्घोषितम्।

---

[1] महा.,अनुशासनपर्व,वि.ना.सह.,श्लो.-११६

[2] न्या.द.(सम्पा.फणिभूषणतर्कवागीशः),पृ-०१

अतो मोक्षप्राप्तये निःश्रेयसाधिगमाय वा प्रमाणप्रमेयादिषोडशपदार्थानां तत्त्वज्ञानमेव न्यायशास्त्रस्य मुख्यं प्रतिपाद्यम्।

**मूलगवेषणाविषयः**— तत्र 'प्रमाणप्रमेयसंशय-प्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्प वितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसा-धिगमः' इति न्यायदर्शनस्य तावत् प्रथमं सूत्रम्। अत्र सूत्रे प्रमाणप्रमेयादिपदानि द्वन्द्वसमासनिष्पन्नानि इति तु भाष्यवार्त्तिकादिषु स्पष्टमेव। अत्र द्वन्द्वसमासस्वीकारे तात्पर्यं तावत् न केवलम् एकस्य पदार्थस्य द्वयोः पदार्थयोर्वा तत्त्वज्ञाने जीवो मोक्षमधिगच्छति किन्तु षोडशानां पदार्थानां तत्त्वज्ञानादेव जीवो मुक्तिमेतीत्येवावबोधयितुं 'सर्वपदार्थप्रधानो द्वन्द्वसमासः' स्वीकृतो वार्त्तिककारादिभिः। किञ्च वार्त्तिककारेण तात्पर्यकारेण च विग्रहवाक्ये वचनस्य किं स्वरूपं स्याद् इति आलोचयतापि अधिकविचारे न स्वरसः प्रदर्शितः। किन्तु *न्यायसूत्रवृत्तौ* तु विश्वनाथन्यायपञ्चाननेन विस्तरशो व्याख्या कृता। सूत्रस्य विग्रहवाक्यं तथा भाष्यस्थितवचनपदतात्पर्यं सर्वमेव व्याख्यातं तेन।

तथाहि भिन्नसमासे स्वीकृते तु यत्किञ्चित् पदार्थविशेषस्य प्राधान्यात् तत्तत्पदार्थानामेव निःश्रेयसलाभे साधकत्वं स्यात्, न तु सर्वेषां पदार्थानाम्। किन्तु निःश्रेयसलाभे सर्वेषामेव पदार्थानां साधकत्वमस्तीति प्रतिपादयितुमेव प्रस्तुतसूत्रे द्वन्द्वसमासः स्वीकार्यः एव। *न्यायवार्त्तिक*कारेणापि वक्तव्यमिदं समर्थयता निगदितं –

'सर्वे एते प्रमाणादयो विज्ञेया इति। अन्यथा हि समासान्तरपरिग्रहाद्विशेषणत्वेनोपयुक्तानां प्रमाणादी-नामविज्ञेयता स्यात्।'[1] इति।

ननु द्वन्द्वसमासस्य भेदे विधानात् प्रस्तुतसूत्रे समासस्यावयवानां प्रमाणप्रमेयादीनां पदार्थात्मकत्वेन अभेदत्वात् कथं द्वन्द्वसमास उपपन्नः? संशयस्यास्य निरसनं तु आचार्यविश्वनाथेन न्यायसूत्रवृत्तौ सम्यक्तया विहितम्। तथाहि समासस्य अवयवानां प्रमाणप्रमेयादीनां पदार्थात्मकत्वेन अभिन्नत्वेऽपि पदार्थतावच्छेदकधर्मरूपेण भेदसम्भवात् द्वन्द्वसमासः सम्भाव्यः। अत्रायमाशयः प्रमाणमिति पदस्यार्थो हि प्रमितिकरणमिति। प्रमितिकरणे च पदार्थता अस्ति। तत्पदार्थतायाः अवच्छेदकत्वं हि 'प्रमितिकरणत्वम्' इति। एवञ्च 'प्रमेयम्' इति पदस्यार्थो हि 'प्रमितिविषयः' इति। प्रमितिविषये चास्ति पदार्थता। अत एव तत्पदार्थतावच्छेदकधर्मो हि 'प्रमितिविषयत्वम्' इति। इदानीं 'प्रमाणम्' 'प्रमेयम्' च इति उभयस्यैव न्यायशास्त्रसम्मतप्रमेयत्वात् तयोर्भेदस्य असत्त्वेऽपि तयोः पदार्थतावच्छेदकधर्मेण प्रमितिकरणत्वेन प्रमिति-विषयत्वेन च वा तयोः भेदसम्भवाद् द्वन्द्वसमासः समुचित एव। तदुक्तं *न्यायसूत्रवृत्तौ* विश्वनाथेन- "अत्र च सर्वपदार्थप्रधानो द्वन्द्वः समासः। यद्यपि भेदे द्वन्द्वविधानादत्र च बहूनां पदार्थानामभेदान्न द्वन्द्वसम्भवः, तथापि पदार्थतावच्छेदकभेदादेव द्वन्द्व इति न दोष इत्यन्यत्र विस्तरः।"[2] इति।

किञ्च, पदार्थतावच्छेदकभेदे द्वन्द्वसमासे स्वीकृतेऽपि एकः संशयः समुदेति। तथाहि 'घटः घटः घटः' इत्यत्र स्वरूपैकशेषे 'घटाः' इति पदनिष्पत्तिर्जायते। अत्र 'घटाः' इति पदे प्रयुक्तबहुवचनेन अनेकघटानां बोधनसम्भवात् तेषाञ्च पदार्थतावच्छेदकधर्मः 'घटत्वम्' इति समानत्वात् एकत्वाद्वा भेदोऽनुपपन्नः। अपि च, स्वरूपैकशेषः इति द्वन्द्वसमासस्य अपवादत्वात् तथा

---

[1] न्या.वा.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-२९

[2] न्या.सू.व.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहनतर्कतीर्थश्च),पृ-३१

उत्सर्गापवादयोः विषयैक्यात् द्वन्द्वसमासविषये स्वरूपैकशेषः प्रवृत्तो भवतीति वक्तुं शक्यते। अर्थात् 'घटाः' इत्यत्र द्वन्द्वसमासः स्वरूपैकशेषेण बाधितो भवति। किन्तु बहुघटस्थले तु 'घटत्वम्' इति पदार्थतावच्छेदकत्वधर्मस्यैक्यात् पदार्थतावच्छेदकभेदस्य अविद्यमानत्वाद् द्वन्द्वसमासस्य प्रवृत्तिरेव न भवति तथा द्वन्द्वसमासस्य अविषयत्वात् तत्र स्वरूपैकशेषस्यापि प्रवृत्तिर्न स्यात्। किन्तु प्रकृतस्थले तु स्वरूपैकशेषस्य विषयः लक्ष्यते, तेनानुमीयते यत् खलु तत्स्थले द्वन्द्वसमासस्य प्रवृत्तिरभूत्। तथा सति घटत्वजातेः पदार्थतावच्छेदकस्यैकनिबन्धनाभेदस्थलेऽपि द्वन्द्वः प्रवृत्तो भवति चेत् पदार्थतावच्छेदकभेदः द्वन्द्वसमासनियामकः इति वक्तुं नालम्। तेन च प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्क निर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रह स्थानानाम् इति स्थले पदार्थतावच्छेदकभेदेनैव द्वन्द्वसमासोऽभूत् इति वक्तुं शक्यते। यतो हि पदार्थतानवच्छेदकभेदो न द्वन्द्वनियामकः। अपि च, यद्युच्यते 'घटाः' इति स्थले स्वरूपैकशेषस्य प्रवृत्तिर्नाभूत्। स्थलेऽस्मिन् एकघटपदोत्तरबहुवचनेन बहुत्वस्य बोधः। अत एव द्वन्द्वसमासस्य पदार्थतावच्छेदकभेदबोधकत्वस्य नानुपपत्तिरिति। अत्रेदं वक्तव्यं यत्- 'सकृदुच्चारितः शब्दः सकृदर्थं गमयति' इति न्यायेन एकघटपदेन बहुघटबोधनासम्भवात् एकघटे च बहुवचनप्रयोज्य-बहुत्वसंख्यायाः बाधात् शाब्दबोधस्य वैकल्यप्रसक्तिः स्यात्। अत एव 'घटाः' इति स्थले जस्-विभक्तिः बहुघटपदप्रकृतिकः इति स्वीकार्यम्। तेन चात्र स्वरूपैकशेषः कल्पनीयः। तथा सत्यपि पूर्वोक्तविप्रतिपत्तिः आपतेत्।

एवंविधसंशयस्य निरसने इदमेव वक्तव्यं यत् द्वन्द्वसमासः क्वचित् पदार्थभेदे क्वचिच्च पदार्थतावच्छेदभेदे भवति। अत एव 'घटाः' इत्यत्र बहुघटस्य पारस्परिकभेदसत्त्वात् (यथा एतद्घटो न तद्घटः, तद्घटो न अमुकघटः इत्येवम्) पदार्थभेदे द्वन्द्वस्य प्रवृत्तिसत्त्वेऽपि तद् अपवादभूतस्वरूपैकशेषेण बाधितो भवति। तथा च, प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्क निर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनि-ग्रहस्थानानाम् इति स्थले पदार्थतावच्छेदकभेदेनैव द्वन्द्वसमासः उपपन्नो निर्बाधः।

ततश्च आचार्यविश्वनाथेन द्वन्द्वसमासस्य व्यासवाक्यं किंविधं स्यादिति विस्तरशो निगदितम्। तेनादौ भाष्यकारस्य तथा सम्प्रदायविदः मतमुपस्थापितं, ततस्तस्य व्याख्यानं विधाय पुनः स्वमतमुपस्थापितं विश्लेषितञ्चापि।

तथाहि भाष्यकारस्य तथा सम्प्रदायविदो मते विग्रहवाक्यमेवं स्यात् 'प्रमाणानि च प्रमेयञ्च संशयश्च प्रयोजनञ्च दृष्टान्तश्च सिद्धान्तश्च अवयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डा च हेत्वाभासाश्च छलञ्च जातयश्च निग्रहस्थानानि चे'ति। तदुक्तं विश्वनाथेन *न्यायसूत्रवृत्तौ*- "...यथाश्रुतभाष्यानु-सारिणः प्रमाणानि च प्रमेयञ्च संशयश्च प्रयोजनञ्च दृष्टान्तश्च सिद्धान्तश्च अवयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितण्डा च हेत्वाभासाश्च छलञ्च जातयश्च निग्रहस्थानानि चेति विग्रहं वर्णयन्ति"[3] इति।

'निर्देशे यथावचनं विग्रहः' इति भाष्यस्थितवचनस्य 'निर्देशः' इति पदस्यार्थः किं स्यादिति विषयेऽस्मिन् भाष्यकारेण वात्स्यायनेन व्याख्यानं न प्रदत्तम्। विषयेऽस्मिन् आचार्यविश्वनाथेन दिग्दर्शनमकारि। तथाहि

[3]न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्र-मोहनतर्कतीर्थश्च), पृ-३१

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

निर्देशपदेन लक्षणसूत्रस्थितवचनं निर्दिष्टम् उत विभागसूत्रस्थितवचनं निर्दिष्टम् उत उभयमेव? अत्रायमाशयः प्रमाणप्रमेयादिपदार्थानां परं यैः सूत्रैः लक्षणं विभागश्च आलोचितः तेषु सूत्रेषु तत्तत्पदार्थानां यद्वचनमुपस्थापितं तद्वचनानुसारमेव व्यासवाक्यं निर्मातव्यम्। यथा प्रमाणविभागसूत्रे[4] 'प्रमाणानि' इति बहुवचनान्ततया प्रयुक्तम्। अत एव व्यासवाक्येऽपि 'प्रमाणानि च' इत्येवं बहुवचनान्ततया एव प्रयोगो विधेयः। एवं प्रमेयविभागसूत्रे[5] 'प्रमेयम्' इति एकवचनान्ततया प्रयुक्तम्। अत एव व्यासवाक्येऽपि 'प्रमेयञ्च' इत्येवम् एकवचनान्ततया प्रयोगः स्यात्। एवं संशयादिपदार्थानां क्षेत्रे तत्तत्पदार्थानां लक्षणविभागसूत्रे यद्वचनेन यत्पदार्थः प्रयुक्तः, व्यासवाक्येऽपि तद्वचनं ग्रहणीयम्। अर्थात् यत्र एकवचनमस्ति तत्रैकवचनं, यत्र द्विवचनमस्ति तत्र द्विवचनं, यत्र च बहुवचनं दृश्यते तत्र बहुवचनमेव करणीयमिति ध्येयम्।

अधुना अत्रायं प्रश्नः उदेति यत् निर्देशपदेन तर्हि किं बोध्यं – लक्षणसूत्रं विभागसूत्रम् उत उभयमेव? अत्र तृतीयपक्षः न युक्तियुक्तः, क्वचित् क्वचित् लक्षणसूत्रे तथा विभागसूत्रे भिन्नभिन्नवचनप्रतिपादनात्। यथा निग्रहस्थानपदार्थस्य लक्षणसूत्रे[6] एकवचनं तथा विभागसूत्रे[7] बहुवचनं प्रचक्षते। नापि द्वितीयपक्षः, तर्कपदार्थस्य केवलं लक्षणसूत्रदृष्टत्वात्। नापि प्रथमपक्षो युक्तः, प्रमाणादिपदार्थानां सम्भवेऽपि जातिनिग्रहस्थानपदार्थयोः विरोधः परिलक्ष्यते, तयोः पदार्थयोः भाष्यानुसारिव्यासवाक्ये बहुवचनग्रहणात् लक्षणसूत्रे च तयोरेकवचनात्।

सर्वं पर्यालोच्य इदमेव वक्तुं शक्यते यत् निर्देशपदेन विभागसूत्रमेव ग्रहणीयम्। तथा सति प्रमाणादिपदार्थानां तर्कपदार्थं व्यतिरिच्य वचनं प्रस्तुतभाष्यानुसारिव्यास-वाक्यवत् स्यात्। किं बहुना, तत्र तर्कपदविषये या समस्या दृश्यते तत्र इयं युक्तिरेव अनुसरणीया। तेन च तस्याः समस्यायाः समाधिरपि स्यात्। तथाहि तत्र सूक्ष्मेक्षिकया दृष्ट्या विचार्यते चेत् इदमेव प्रकाशितं भवति यत् तर्कपदार्थस्य एकसंख्यकत्वात् तत्र पृथग् विभागसूत्रं न्यायसूत्रकारेण न व्यरचि। अपि च, लक्षणसूत्रे तर्कपदार्थस्य ग्रहणात् 'तर्कः' इत्यनेन यथा तर्कपदार्थस्य लक्षणं विहितं तथा तस्य विभागोऽपि सूचितः, तर्कपदोत्तरैकवचनसुप्प्रत्ययस्य ग्रहणात्। अत एव तर्कपदार्थस्य लक्षणसूत्रमेव तस्य विभागसूत्रमिति उररीकरणीयम्। यथा यज्ञदत्तस्य एकमात्रपुत्रः देवदत्तः। तेन देवदत्ते ज्येष्ठत्वं मध्यमत्वं कनिष्ठत्वञ्च आरोपितं भवति। तथैव तर्कपदार्थेऽपि एकत्वादिरूपेण विभागः आरोप्यते व्यपदेशिवद्भावेन। अतो लक्षणसूत्रे तर्कपदस्यैकवचनत्वेऽपि तस्य द्वित्वं बहुत्वं वा सिद्धं भवति व्यपदेशिवद्भावेन। तेन च तर्कपदार्थस्य लक्षणसूत्रं विभागसूत्रमपि इति विज्ञेयम्। अत एव व्यासवाक्ये 'तर्कश्च' इति पदप्रयोगः साधुरेव।

आचार्यफणिभूषणतर्कवागीशमहोदयेनापि विषयेऽस्मिन् भाष्यकारस्य मतं न्यायसूत्रकारविश्वनाथन्यायपञ्चाननवदेव तदीयन्यायदर्शनग्रन्थे सुष्ठु व्याख्यातम्।[8] आचार्यजयन्तभट्टस्यापि विषयेऽस्मिन् समनैवाभियुक्तिः। किञ्च, प्राचीनमतेऽपि स एव भाष्यार्थः इति प्रकाशटीकाकारेण वर्द्धमानोपाध्यायमहोदयेनापि निगदितम्।

---

[4]प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि , सूत्रसंख्या-१/१/३

[5]आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ,सूत्रसंख्या-१/१/३

[6]विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्,न्या.सू.-१/२/१९

[7]तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम्,न्या.सू.-१/२/२०

[8]न्या.द.(सम्पा.फणिभूषणतर्कवागीशः), पृ-२०-२१

ननु प्रथमन्यायसूत्रे कथं प्रमाणपदार्थस्य आदावेवोल्लेख इति तु सूत्रादेव स्पष्टं न भवतीति। तर्हि कथमभ्युपेयमस्माभिरिति जिज्ञासायां तु भाष्यादि एव शरणं भवति। भाष्यनये तु यस्य कस्यापि पदार्थस्य तत्त्वज्ञानं प्रमाणादेव भवति। तदुच्यते- 'मानाधीना मेयसिद्धिरि'[9]ति, किञ्च 'प्रमेयसिद्धिः प्रमाणाद्धि'[10] इति च।

किन्तु न्यायसूत्रवृत्तिकारेण विषयेऽस्मिन् विस्तरश आलोचितम्। तन्मते तु न्यायशास्त्रस्य मुख्यं प्रयोजनं तावन्मोक्षलाभः। मोक्षलाभश्चात्माद्यप-वर्गान्तद्वादशप्रमेयपदार्थानां तत्त्वज्ञानादेव भवति। अत एव प्रस्तुतसूत्रे प्रमेयपदार्थस्यैवादावुल्लेखः करणीय इति चेन्न, तेषां द्वादशप्रमेयपदार्थानां तत्त्वज्ञानं तु प्रमाणपदार्थाधीनम्। अतो प्रमाणपदार्थस्य आदावुल्लेखः समीचीन एव। तदुक्तं वृत्तिकारेण- 'अत्र च यद्यपि मोक्षजनकज्ञान-विषयत्वेन प्रमेयमेवादौ निरूपयितुमर्हं तथापि प्रमाणस्य सकलपदार्थव्यवस्थापकत्वेन प्राधान्यात् प्रथममुद्देशः, ततोऽवसरतो बुभुत्सितप्रमेयस्य ततश्च पदार्थव्यवस्थापनस्य न्यायाधीनतया न्याये निरूपणीयेऽभ्यर्हितयोर्न्यायपूर्वाङ्गयोः संशयप्रयोजनयोः, तत्राभ्यर्हिततया संशयस्य प्रथमम्।'[11] इति।

किञ्च, अविगीतशिष्टाचारविषयत्वाद् वेदबोधितकर्तव्यताकं मङ्गलं ग्रन्थादौ महर्षिगौतमेनाचरितं न वेति न्यायसूत्रग्रन्थे वयं सन्दिहाना एव। सन्देहस्यास्य निराकरणं तु न्यायसूत्रवृत्तिकारेण विश्वनाथन्यायपञ्चाननमहाभागेन कृतं स्वकृतौ *न्यायसूत्रवृत्तौ*। तथाहि महर्षिणा अक्षपादेन न्यायसूत्रस्यादिमसूत्रे आदावेव प्रमाणशब्दस्योल्लेखात् 'अभ्यर्हितं पूर्वम्' इति न्यायेन तस्य प्रमाणपदार्थस्य मुख्यत्वं ध्वनितम्। तत्र प्रथमसूत्रे प्रमाणशब्दस्य महाभारतस्य *विष्णुसहस्रनामस्तोत्रे* 'प्रमाणं तु प्राणनिलयः प्राणभृत्प्राणजीवनः, तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः'[12] इति स्थले वर्तमानत्वात्, तेन च माङ्गलिकत्वात् प्रमाणशब्दोच्चारणेनैव मङ्गलमाचरितम्। तदुक्तं वृत्तिकारेण- 'अत्र केचित्– सूत्रादौ मङ्गलाकरणेन मङ्गलं न प्रामाणिकमित्यत्र सूत्रकृतां तात्पर्यं वर्णयन्ति, तदसत्, कृतस्याप्यनिबन्धनसम्भवात्, विघ्नाभावनिर्णये-नाकरणसम्भवाच्च। वयन्तु 'प्रमाणं प्राणनिलयः'-इति भगवन्नामगणनान्तःपातिप्रमाणशब्दस्यो-च्चारणमेव मङ्गलमिति ब्रूमः'[13] इति।

किञ्च, केषाञ्चन विदुषां मते भाष्यकारेण वात्स्यायनेन न्यायसूत्रभाष्यस्यादौ 'ॐ नमः प्रमाणाय' इत्येवं प्रकारेण मङ्गलमाचरता प्रमाणशब्दस्य मुख्यत्वं प्रतिपादितम्। अतः ईश्वरवाचकत्वादपि तस्य प्राधान्यं ध्वन्यते। अत्रेदं ज्ञेयं यत् महामहोपाध्यायपण्डितफणिभूषणतर्कवागीश-महोदयस्य मते यद्यपि केषुचित् पुस्तकेषु भाष्यारम्भे 'ॐ नमः प्रमाणाय' इत्येवं पाठः प्राप्यते परन्तु 'तद्वचनं भाष्यकारस्यैव' इति कथने प्रामाण्यं नास्ति।[14] परन्तु ख्रीष्टीयदशमशताब्द्यां 'न्यायकन्दली' इति टीकायाः प्रारम्भे श्रीधरभट्टेन लिखितं यत् न्यायभाष्यकारेण पक्षिलस्वामिना नमस्कारपूर्वकं मङ्गलमाचरितं परन्तु भाष्यारम्भे तन्न लिपिबद्धम् इत्यलम् अतिविस्तरेण।

---

[9] श्लोकवार्त्तिकम्

[10] सां.का.-४

[11] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहन-तर्कतीर्थश्च),पृ-३२

[12] महा.,अनुशासनपर्व, वि.ना.सह.,श्लो.-११६

[13] न्या.सू.वृ.,न्या.द.(सम्पा. तारानाथन्यायतर्कतीर्थोऽमरेन्द्रमोहन-तर्कतीर्थश्च), पृ-६०-६१

[14] न्या.द.(सम्पा.फणिभूषणतर्कवागीशः),पृ-०१

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

## सहायकग्रन्थसूची


- अन्नंभट्टः। *तर्कसंग्रहः* (सटीकः अध्यापनासहितश्च) । सम्पा. नारायणचन्द्रगोस्वामी। कोलकाता : संस्कृतपुस्तकभाण्डारः, १४१३ (बङ्गाब्दः)।
- गौतमः। *न्यायदर्शनम्* । अमरेन्द्रमोहनतर्कतीर्थः। नवदेहली : मुन्सीराममनोहरलालपाब्लिशार्स् प्राइभेट् लिमिटेड, १९८५ (pdf) ।
- उदयनाचार्यः। *न्यायकुसुमाञ्जलिः* (हरिहरसंस्कृतटीकया शंकरमिश्रकृताऽऽमोदटीकया च सहिता) । सम्पा.प्रो.हरेरामत्रिपाठी। नवदेहली : राष्ट्रीयसंस्कृतसंस्थानम्, २००९।
- उद्योतकरभारद्वाजः। *न्यायभाष्यवार्तिकम्* । सम्पा० अनन्तलालठाकुरः। नवदेहली: इण्डियन्-काउनसिल्-आफ्-फिलोसफिकाल्-रिसर्च्, १९९७।
- गौतमः। *न्यायसूत्रम्* (वात्स्यायनभाष्यसहितम् उद्योतकरवार्तिकसहितञ्च) । सम्पा० महामहोपाध्यायगङ्गानाथझा। दिल्ली : मोतीलालवनारसीदासः, १९८४ (पुनर्मुद्रणम्)।
- गङ्गेशोपाध्यायः। *तत्त्वचिन्तामणिः* (प्रमालक्षण) । सम्पा० श्रीविश्वबन्धु भट्टाचार्यः, प्रका० स्वामी प्रभानन्दः। कोलकाता : रामकृष्ण मिशन् इन्स्टिटिउट् अव कालचार, २०००।
- गौतमः। *न्याय दर्शन* (प्रथमखण्डः) । सम्पा. फणिभूषणतर्कवागीशः। कोलकाता : पश्चिमबङ्गराज्यपुस्तकपर्षत्,२०१४।
- तदेव। द्वितीयखण्डः । सम्पा. फणिभूषणतर्कवागीशः। कोलकाता : पश्चिमबङ्गराज्यपुस्तकपर्षत्, २०१५।
- तदेव। तृतीयखण्डः । सम्पा. फणिभूषणतर्कवागीशः। कोलकाता : पश्चिमबङ्गराज्यपुस्तकपर्षत्, २०१७।

# तार्किकनये मङ्गलवादविमर्शः

**शान्ति-घोषः**
**अतिथिप्राध्यापकः, वेदान्तविभागः, श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयः**
**कोलकाता-३५**

**प्रबन्धसारः**

*श्रेयस्करं कर्म विघ्नबहुलं भवति। निर्विघ्नेन कार्यं परिसमापितुम् अभिलषन्ति शिष्टाः। तदर्थं मङ्गलाचरणस्य उपक्रमः शिष्टैरेव कृतः। मङ्गलस्य अवश्याचरणीयत्वे श्रुतिमेव समर्थयन्ति केचित्। ग्रन्थारम्भेन सह मङ्गलाचरणस्य अविनाभाव इव कश्चन सम्बन्धः संस्थापितः शिष्टैः। मङ्गलाचरणेन बहुविधं फलं लभ्यते। तद्यथा – स्वाभीष्टकार्यसम्पत्तिः, अभीष्टदेवनत्या भगवदनुग्रहलाभः, भगवच्छरणागत्या आध्यात्मिकोन्नतिः, प्रतिभोत्कर्षश्च। अत एव भगवान् पाणिनिः ग्रन्थादौ सूत्रयामास वृद्धिरादैच् (*अष्टाध्यायी १.१.१*) इति। तत्सूत्रं व्याकुर्वाणः भाष्यकारः भगवान् पतञ्जलिः आह – अदेङ् गुणः (*अष्टाध्यायी १.१.२*) इत्यत्रेव आदैच् वृद्धिः इति कुतो न सूत्रितम् उद्देश्यवाचकपदस्य विधेयवाचकपदात् पूर्वं प्रयोगस्य सम्प्रदायप्रसिद्धत्वात् इति शङ्कित्वा समाधानमाह "एतदेकम् आचार्यस्य मङ्गलार्थं मृष्यताम्" इति। एवं मङ्गलार्थं ब्रह्मपरः वृद्धिशब्दः प्रयुक्तः। ब्रह्मशब्दस्य वृद्धतमत्वरूपः अर्थः व्युत्पत्तिलभ्यः।*

*अयं मङ्गलाचारः वस्तुतः श्रौतः। ऋग्वेदे अग्निमीळे (ऋग्वेदः १.१.१) इति आदौ पठ्यते। तत्र अकारस्य प्रणवप्रथमाक्षरत्वेन विष्णुवाचित्वेन च मङ्गलार्थत्वम्। श्रौतो मङ्गलाचारः इतिहासपुराणादिषु अपि अनुवर्तते। तथाहि विष्णुपुराणे महाभारते च नारायणं नमस्कृत्य इत्यारम्भः। तपस्स्वाध्यायनिरतम् (१.१.१) इति वाल्मीकिरामायणस्य प्रारम्भः। तत्र सर्वत्र मङ्गलवाची शब्दः आदौ प्रयुक्तः।*

*नैयायिका अपि ग्रन्थारम्भे मङ्गलवादं विशदं व्याख्यान्ति। गङ्गेशोपाध्यायेन मङ्गलवादः इत्ययं स्वतन्त्रः ग्रन्थ एव रचितः। परन्तु मङ्गलाचरणस्य फलविषये ते विवदन्ते। तत्र प्राञ्चः मङ्गलेन विघ्नध्वंसः भवति विघ्नध्वंसेन च ग्रन्थः समाप्यते। एवं विघ्नध्वंसः समाप्तिं प्रति द्वारीभूतः अस्ति। विघ्नध्वंस एव मङ्गलस्य फलम् इति नव्यानां मतम्। समाप्तिस्तु ग्रन्थकर्तुः बुद्धिप्रतिभादिकारणकलापेन भवति। एवं प्राचीननव्ययोः मतं बेभिद्यते। तदेव अस्मिन् प्रबन्धे समाकलय्य प्रपञ्चितम्।*

**कुञ्चीशब्दाः** – मङ्गलम्, अन्वयः, व्यतिरेकः, प्रायश्चित्तम्, विश्वजिन्न्यायः चेत्यादयः।

***********************************************************************************

**उपक्रमः –**

"श्रेयांसि बहुविघ्नानि" इति श्रुतेः विघ्नविघाताय ग्रन्थादौ शिष्टाचारानुमितं मङ्गलम् आचर्यते। वाचस्पत्यानुसारेण मङ्गलशब्दार्थो हि - "मङ्गति हितार्थं सर्पति मङ्गति दुरदृष्टमनेन अस्माद्वेति मङ्गलम्" इति। ग्रन्थपरिसमाप्तिं प्रति आपत्स्यमानान् विघ्नान् विदूरीकृत्य ग्रन्थसमाप्तिम् अनुकूलयति मङ्गलम्। वाङ्मनकायैः त्रेधा मङ्गलम् आचर्यते। शिष्टाचारस्य संरक्षणायापि ग्रन्थप्रारम्भे मङ्गलम् आचर्यते। बहुषु ग्रन्थेषु मङ्गलवादः प्रामुख्येन विचारितः। न्यायसिद्धान्तमुक्तावल्लीग्रन्थस्य प्रारम्भे अयं वादः प्रपञ्चितः। कार्यकारणभावम् आश्रित्य अयं वादः प्रस्तूयते।

कार्यकारणभावः सर्वशास्त्रोपयोगी कश्चन वादः[1]। सर्वेषु शास्त्रेषु कार्यकारणभावविषये आलोचना वर्तते। ययोः सामानाधिकरण्यं तयोरेव कार्यकारणभावः इत्ययं नियमो वर्तते। अन्वयव्यतिरेकाभ्यां कार्यकारणभावः निश्चीयते।

---

[1] "प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः" इति। (गौतमसूत्रम् १.२.१)

तत्सत्त्वे तत्सत्ता इति अन्वयसहचारः। यथा - धूमसत्त्वे वह्निसत्ता। तदभावे तदभाव इति व्यतिरेकसहचारः। यथा - धूमाभावे वह्न्यभावः। एवञ्च, धूमः वह्निं प्रति कारणम् इति सिद्ध्यति। अन्वयव्यतिरेकव्यभिचाराभ्यां कार्यकारणभावस्य निषेधोऽपि क्रियते। कारणसत्त्वे कार्यासत्त्वम् इति व्यतिरेकव्यभिचारः। रासभः घटं प्रति न कारणम्। अर्थात् रासभघटयोर्मध्ये कार्यकारणभावः नास्ति यतो हि अत्र व्यभिचारो वर्तते। तथाहि एकस्य रजकस्य गृहे रासभः अस्ति परन्तु घटो नोत्पद्यते। एवं रासभरूपे कारणे सत्यपि घटरूपं कार्यं नोत्पद्यते। यस्य गृहे पुनः रासभो नास्ति तस्य गृहे घट उत्पद्यते। एवं कार्यकारणभावस्य निषेधः अन्वयव्यतिरेकव्यभिचारेण भवति।

**पूर्वपक्षमतम्-**

सम्प्रति अस्यैव कार्यकारणभावस्य पर्यवलोकनं मङ्गलश्लोके[2] क्रियते। मङ्गलं कारणम्, ग्रन्थसमाप्तिः कार्यं फलं वा। अथवा, विघ्नध्वंसः कारणम्, समाप्तिः फलम्। परन्तु मङ्गलं समाप्तिं प्रति कारणं नास्ति इति पूर्वपक्षिणाम् आक्षेपः। यतो हि अत्र अन्वयव्यतिरेकव्यभिचारः अस्ति। तथाहि बाणभट्टस्य कादम्बरीग्रन्थः मङ्गलाचरणेन प्रारब्धः परन्तु समाप्तिं न गतः। एवं कारणरूपे मङ्गले सत्यपि समाप्तिरूपं कार्यं नास्ति। अन्यत्र च किरणावल्ल्याख्यः प्राचीनो ग्रन्थः यत्र मङ्गलाचरणं नैव कृतं परन्तु निर्विघ्नतया ग्रन्थः परिसमाप्तः। एवमत्र कारणरूपमङ्गलाभावेऽपि समाप्तिरूपं कार्यं दृश्यते। एवं विघ्नध्वंसः कारणं स्वीक्रियते चेदपि स दोषः तदवस्थः। तस्मात् मङ्गलं विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणम्।

प्रकृतग्रन्थे न्यायसिद्धान्तमुक्तावल्ल्यां व्यतिरेकव्यभिचारपुरःसरं मङ्गलस्य कारणत्वं निषिध्यते। अयं व्यतिरेकव्यभिचारः अन्वयव्यभिचारस्य उपलक्षकः। उपलक्षणं तु स्वप्रतिपादकत्वे सति स्वेतरप्रतिपादकत्वम्। तथाहि उच्यते विश्वनाथपञ्चाननभट्टाचार्यैः पूर्वपक्षमतप्रतिपादनपुरःसरं – “ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणं, विनापि मङ्गलं नास्तिकादीनां ग्रन्थेषु निर्विघ्नपरिसमाप्तिदर्शनात्” इति। ननु इति अव्ययम् आक्षेपार्थं प्रयुज्यते अत्र। अर्थात् ज्ञातव्यम् अधुना पूर्वपक्षिणः अस्मिन् विषये आक्षेपं कुर्वन्ति।

पूर्वपक्षिणां मुख्यम् अनुमानं- “मङ्गलम् अयुक्तं निष्फलत्वात् जलताडनादिवत्” इति। अनेन अनुमानेन ते मङ्गलस्य निष्फलत्वं प्रतिपादयितुम् इच्छन्ति। परन्तु सिद्धान्तिभिः उच्यते अत्र स्वरूपासिद्धिः[3] इति दोषः अस्ति। यतो हि निष्फलत्वरूपहेतुः पक्षे मङ्गले नास्ति। प्रत्येकं कर्मणः द्विविधं फलं भवति सामान्यफलं विशेषफलं चेति। तथाहि भोजनेन तृप्तिरूपं फलम् उत्पद्यते। एवं भोजनं फलविशेषं जनयति इति तु सत्यम्। परन्तु भोजने फलविशेषाभावोऽपि वर्तते। यतो हि अन्येन केनचित् कर्मणा यत् फलं प्राप्यते तत्फलं भोजनद्वारा न प्राप्यते। एवं भोजनं निष्फलं सर्वमपि कर्म निष्फलम्। अत एव निष्फलत्वं नाम फलसामान्याभाववत्त्वम् इति। विशेषाभावकूटद्वारा सामान्याभावः सिद्ध्यति। पूर्वोक्तम् अनुमानं प्रतिष्ठापयितुं पुनरनुमानं वदति - “मङ्गलं निष्फलं फलविशेषाभावकूटवत्त्वात्” इति। अत्रापि स्वरूपासिद्धिदोषः अस्ति इति सिद्धान्तिनाम् आघोषः। यतो हि फलविशेषाभावकूटवत्त्वं मङ्गले

---

[2] “नूतनजलधररुचये गोपवधूटीदुकूलचौराय। तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय॥” इति। (कारिकावली १)

[3] “स्वरूपासिद्धः यथा- शब्दः अनित्यः, चाक्षुषत्वात्, रूपवत् इति। अत्र चाक्षुषत्वं पक्षे नास्ति, शब्दस्य श्रावणत्वात्” इति। (तर्कसंग्रहः, हेत्वाभासप्रकरणम्, पृष्ठसंख्या- ११९)

नास्ति। मङ्गले फलविशेषवत्त्वम् अस्ति। मङ्गलस्य समाप्तिः विघ्नध्वंसश्च फलम् अस्ति। पूर्वपक्षिणः तेषां मङ्गलम् अयुक्तम् इति मतं प्रतिष्ठापयितुं पुनः अनुमानं प्रदर्शयन्ति। तथाहि अनुमानं - "मङ्गलं समाप्तिफलकत्वाभाववत् व्यभिचारात्" इति पूर्वपक्षिणाम् अनुमानवाक्यम्। पूर्वपक्षिभिः नास्तिकैः पूर्वमेव मङ्गलं समाप्तिं प्रति कारणम् इत्यत्र व्यभिचारः प्रदर्शितः। मङ्गलरूपकारणाभावेऽपि समाप्तिरूपफल-दर्शनात् कार्यकारणभावे व्यभिचारः प्रदर्शितः। एवं समाप्तिः विघ्नध्वंसो वा मङ्गलस्य फलं नास्ति। अर्थात् मङ्गलं फलविशेषाभावकूटवत्। तेन मङ्गलम् अयुक्तं निष्फलत्वात् इति पूर्वपक्षिणाम् अनुमानं सिद्ध्यति। एवञ्च पूर्वपक्षिणां मतं प्रतिष्ठापितम्।

**सिद्धान्तमतम्-**

साम्प्रतं पूर्वपक्षिणां मतं निराचिकीर्षुः सिद्धान्ती स्वमतं प्रस्तोतुकामः स्वाभीष्टम् अनुमानवाक्यं पठति। तथाहि सिद्धान्तिनाम् अनुमानं - "मङ्गलं सफलम् अविगीतशिष्टाचारविषयत्वात् दर्शादिवत्" इति। मङ्गलम् अविगीतम् अनिन्दितम् इत्यर्थः। अपि च शिष्टाः मङ्गलम् आचरन्ति। अविगीतत्वं शिष्टाचारविषयत्वं च मङ्गले अस्ति। शिष्टत्वं चात्र फलसाधनतांशे भ्रान्तिरहितत्वम् इति। ये स्पष्टं जानन्ति यद् अस्य कर्मणः इदं फलं त एव शिष्टाः। शिष्टाः निष्फलं किमपि नाचरन्ति। मङ्गलं च शिष्टैः बाल्मीकिव्यासादिभिः सर्वैः स्वशास्त्रस्य प्रारम्भे आचरितम्। एवम् अविगीतशिष्टाचारविषयत्वेन हेतुना मङ्गलस्य सफलत्वम् उक्तं सिद्धान्तिभिः। किं फलं तर्हि मङ्गलस्य इति प्रश्नः सुतरां समुदेति। सिद्धान्तिभिस्तदा अनुमानं पठ्यते - "मङ्गलं समाप्तिफलकं समाप्त्यन्याफलकत्वे सति सफलत्वात्" इति। अस्मिन् अनुमाने हेतौ दलद्वयम् अस्ति। तत्र समाप्त्यन्याफलकत्वम् इति विशेषणदलम्, सफलत्वम् इति च विशेष्यदलम्। अत्र अनुमाने विशेष्यासिद्धिरिति दोषः अस्ति इति पूर्वपक्षिभिः शङ्कितम्। परन्तु मङ्गलं सफलम् अविगीतशिष्टाचारविषयत्वात् इत्यनेन अनुमानेन मङ्गलस्य सफलत्वे सिद्धे विशेष्यासिद्धिदोषस्यापि निवारणं जातम्। ननु मङ्गलस्य स्वर्गप्राप्तिरेव फलं भवतु विश्वजिन्न्यायेन[4]। परन्तु सम्भवति दृष्टफलकत्वे अदृष्टफलकल्पनायाः अन्याय्यत्वम् इत्यस्ति नियमः। दृष्टादृष्टफलयोः सम्भवितदृष्टफलस्य बलीयस्त्वम् इति न्यायात् आदौ दृष्टफलं कल्पनीयं भवति। यत्र च दृष्टफलं नास्ति तत्र अदृष्टफलकल्पनाया अवकाशः। अत एव उपस्थितत्वात् ग्रन्थसमाप्तिरेव फलं मङ्गलस्य इति प्राचीननैयायिकानाम् अभिप्रायः।

**दोषः तदवस्थः -**

सिद्धान्तिभिः समाप्तिरेव मङ्गलाचरणस्य फलम् इति स्वानुमानेन प्रदर्शितम्। परन्तु एतावतापि सिद्धान्तिभिः व्यभिचारदोषस्तु न वारितः। मङ्गले कृते अपि उदयनाचार्यप्रणीतायां किरणावल्यां समाप्तेः अदर्शनात् मङ्गलाभावे अपि बाणभट्टप्रणीतकादम्बर्याः समाप्तिदर्शनात् अन्वयव्यतिरेकव्यभिचारः तदवस्थः। व्यभिचारदोषस्तु वारणीय एव।

**सिद्धान्ते समाधानम् -**

सिद्धान्तिभिः समाधानरूपेण उच्यते इत्थं च यत्र मङ्गलं न दृश्यते तत्रापि जन्मान्तरीयं तत्कल्प्यते। यत्र च सत्यपि मङ्गले समाप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नः विघ्नप्राचूर्यं वा बोध्यम् इति। नास्तिकादिभिः ग्रन्थारम्भे मङ्गलं न कृतं परन्तु तेषां ग्रन्थः समाप्तः। जन्मान्तरीयं मङ्गलं तत्र अनुसन्धेयम्। यत्र च मङ्गलम्

---

[4] विश्वजिदधिकरणे (जै.सू. ३.५.७) हि विश्वजिता यजेतेत्यत्र फलस्याश्रवणात्, फलमन्तरेण च विधिश्रुतेरनुपपत्तेरवश्यं फले कल्पयितव्ये सर्वाभिलषितत्वेन स्वर्गः फलमित्युक्तम्। तदुक्तम् – "स स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वात्" (जै.सू. ४.३.१५) इति। (मीमांसान्यायप्रकाशः, पृष्ठसंख्या - १२४)

 ISSN : 2583-2271
Vol. - 4, No. 1: 2024

आचरितं परन्तु ग्रन्थः न समाप्तः तत्र बलवत्तरो विघ्नः विघ्नप्राचूर्यं वा अस्ति।

**पूर्वपक्षिणाम् आक्षेपः –**

अयमत्र आक्षेपः यत् मङ्गलं समाप्तिं प्रति कारणम् इति भवद्भिः उक्तम्। मङ्गलं तु आचरितम् अतः समाप्तिरपि भवेदेव। तत्र विघ्नप्राचूर्यं बलवत्तरो विघ्नो वा अस्तु नाम।

**समाधानम् -**

मङ्गलं साक्षात् समाप्तिं न जनयति अपि तु विघ्नध्वंसद्वारा समाप्तिं जनयति। यथा दण्डः साक्षात् न घटं जनयति अपि तु दण्डेन आदौ भ्रमिः जन्यते परञ्च घट उत्पद्यते। एवमेव अत्रापि बोध्यम्। आदौ मङ्गलाचरणेन विघ्नध्वंसो भवति अनन्तरं च विघ्ने वारिते सति ग्रन्थः समाप्यते। अत एव यत्र बलवत्तरो विघ्नः तिष्ठति तत्र मङ्गलेन विघ्नध्वंस एव न जात इति मन्तव्यं तर्हि का कथा समाप्तेः। तस्माद् यत्र बलवत्तरो विघ्नो वर्तते तत्र प्रचूरं मङ्गलम् आचरणीयम्। तथाहि प्राचीनमतप्रतिपादन-धुरीणैः विश्वनाथपञ्चाननभट्टाचार्यैः स्वग्रन्थे उक्तं – “प्रचूरस्यैव अस्य बलवत्तरविघ्ननिवारणे कारणत्वम्” इति। अत एव मङ्गलं स्वसामर्थ्यानुसारं विघ्नं निवारयति, सम्पूर्णे विघ्ने निवारिते सति ग्रन्थः समाप्तिमुपैति। कादम्बरीग्रन्थे यावन्तः विघ्ना आसन् तावन्ति मङ्गलानि न आचरितानि। अतः तत्र विघ्नध्वंस एव न जात इति मन्तव्यम्। ग्रन्थसमाप्तिरूपं फलं दृष्ट्वैव कारणरूपस्य मङ्गलस्य परिमाणविषये ऊह्यते। एकेन मङ्गलेन ग्रन्थः समाप्तः चेत् एकमपि प्रचूरम् अस्ति। यथा मृत्तिकया घटः निर्मीयते इति विचिन्त्य यदि कोऽपि अत्यल्पां मृत्तिकाम् आनयति तेन किं घटस्य निर्माणं भवति। अत एव प्रचूरमृत्तिकाया घटं प्रति कारणत्वम्। अन्यदुदाहरणं रुटिकया तृप्तिः क्षुन्निवृत्तिर्वा भवति इति ज्ञायते सर्वैः। परन्तु यः दशरुटिकां खादति तस्य एकया रुटिकया तृप्तिः कथं जायेत। अत एव सापेक्षदृष्ट्या एतत्सर्वं वक्तव्यम्। सिद्धान्तिनाम् इदमेव अन्तिमं समाधानं यत् प्रचूरमङ्गलरूपस्य कारणस्य अभावात् कादम्बर्यादौ समाप्तिरूपं कार्यं नास्ति। एवं जन्मान्तरीयमङ्गलात् नास्तिकानां ग्रन्थसमाप्तिः। प्रचूरमङ्गलाभावात् च कादम्बर्यादीनां ग्रन्थानाम् असमाप्तिरिति सिद्धान्तिनां समाधानं सर्वैः अङ्गीकार्यमेव। एवं तज्जन्यत्वे सति तज्जन्यजनकत्वात् विघ्नध्वंसो व्यापारः, व्यापारजनकम् असाधारणं कारणं करणं तच्च मङ्गलम्।

**अर्वाचीनमतम् -**

नव्यानां मते मङ्गलाचरणस्य किं फलम् इत्युच्यते। उक्तं च मुक्तावल्ल्यां- “नव्यास्तु मङ्गलस्य विघ्नध्वंस एव फलम्” इति। नव्यनैयायिकानां मते विघ्नध्वंस एव मङ्गलस्य फलम्। तेषां मते असाधारणं कारणं करणम्। अतः मङ्गलं करणम्। विघ्नध्वंसश्च फलम्। एवं मङ्गलस्य विघ्नध्वंस एव फलं समाप्तिश्च बुद्धिप्रतिभादिकारणसमूहेन एव भवति।

**प्राचीनानामाक्षेपः -**

विगलिताशेषविघ्नेन केनचित् पुण्यवता जनेन मङ्गलम् आचरितं ग्रन्थश्च परिसमाप्तः। यदि मङ्गलस्य विघ्नध्वंस एव फलं स्यात् तर्हि विघ्नविरहवता पुरुषेण कृतं मङ्गलं तु निष्फलम् एव।

**नव्यानां समाधानम् –**

तादृशस्थले मङ्गलस्य निष्फलत्वापत्तिः अस्मदभीष्टा एव। तस्यायमर्थः स्वतःसिद्धविघ्नविरहवता कृतस्य मङ्गलस्य निष्फलत्वं नव्यानाम् अभीष्टम्। सर्वेषां विघ्नविषयकं ज्ञानम् अस्ति। अत एव विघ्नरहितेन जनेन यद्यपि ज्ञायते यत्तस्य ग्रन्थः निर्विघ्नेन समाप्तिमीयात् तथापि सः विघ्नशङ्क्या मङ्गलम् आचरति। विघ्नस्य शङ्का अपि च निश्चयः यत्र अस्ति तत्रापि मङ्गलम् आचरणीयम् इति शिष्टानाम् अनुशासनम्। एवञ्च, मङ्गलाचरणे शिष्टाचारः अपि कारणम्।

**श्रुत्यप्रामाण्यनिरासः –**

न च तस्य निष्फलत्वे इत्यादिना वाक्येन विश्वनाथपञ्चाननभट्टाचार्यः श्रुतिं समर्थयति। मङ्गलस्य निष्फलत्वे तद्बोधकश्रुतीनाम् अप्रामाण्यम् इति न वाच्यम् इत्यर्वाचीनमतम्। विघ्नविरहवता कृतं मङ्गलं निष्फलम् इति नवीनैः स्वीकृतम्। निष्फलार्थप्रतिपादकं वाक्यम् अप्रमाणम् इत्यस्ति न्यायः। यतः श्रुत्या मङ्गलस्य आचरणीयत्वं बोधितम् तस्मात् श्रुतेरपि अप्रामाण्यम् इति न आशंकनीयम्। तदर्थं नवीनाः समादधते 'सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात्' इति। विघ्नाः सन्ति चेदेव मङ्गलेन तन्नाशो विधीयते इति हि वेदोपदेशः। तत्रायं दृष्टान्तः केनचित् पुरुषेण काचित् गौः स्पृष्टा तदनन्तरं सा गौः मृता, अनन्तरं सः पुरुषः पापभयेन प्रायश्चित्तकर्म आचरति। यद्यपि तस्य पापम् एव नास्ति तथापि सः पापभ्रमेण तथाविधं प्रायश्चित्तं[5] कर्म आचरति। अतः तस्य प्रायश्चित्तकर्मणः निष्फलत्वेऽपि तद्बोधकवेदाप्रामाण्यम् इति न वाच्यम्। गोहत्याजन्यः अधर्मः अस्ति चेदेव प्रायश्चित्तं सफलम्। यदि गौः स्वकारणेन जरारोगादिना मृता स्यात् तर्हि तस्य पुरुषस्य पापम् एव न भवति। तस्मात् यद्यपि सः पापभ्रमेण प्रायश्चित्तं कृतवान् तथापि तस्य प्रायश्चित्तं निष्फलम् एव। परन्तु तद्बोधकश्रुत्यप्रामाण्यं कदापि न आशंकनीयम्। अधर्मे सत्येव प्रायश्चित्तेन तन्नाशो भवति इति श्रुत्युपदेशः। तस्मात् श्रुतिः सर्वदा प्रमाणरूपा इति एव स्वीकर्तव्यम्।

**स्वमतसंशोधनम् –**

नव्याः स्वमतं संशोध्य व्याचक्षते यत् मङ्गलं च विघ्नध्वंसविशेषे कारणं, विघ्नध्वंसविशेषे च विनायकस्तवपाठादिः इति। विघ्नध्वंसं प्रति बहूनि कारणानि सन्ति तन्मध्ये मङ्गलम् अपि एकं प्रधानं च कारणम्। विघ्नध्वंसः भोगेन, प्रायश्चित्तकर्माचरणेनापि भवति। "सर्वे विघ्नाः शमं यान्ति गणेशस्तवपाठतः" इति वचनात् ज्ञायते विनायकस्तवपाठेनापि विघ्नध्वंसो भवति। अत एव यत्र मङ्गलं नास्ति तत्रापि विघ्नध्वंसो भवति। अत एव यत्र मङ्गलं नास्ति तत्रापि विघ्नध्वंसो भवति एव, अतः तत्र व्यतिरेकव्यभिचारः अस्ति। अस्माकं प्रकृतग्रन्थे यन्मङ्गलम् आचरितं तत् पारिभाषिकं मङ्गलम्। मङ्गलं नाम इष्टस्मरणम्। स्मरणं च ज्ञानरूपम्। इदं ज्ञानरूपं मङ्गलम् आत्मनि तिष्ठति। परन्तु स्तवपाठः शब्दरूपः। लोकव्यवहारदृष्ट्या इदमपि मङ्गलम्। स्तवपाठेनापि विघ्नध्वंसः भवति। परन्तु स्तवपाठरूपं मङ्गलं पारिभाषिकं नास्ति। अत्र मङ्गलपदेन ज्ञानरूपं मङ्गलम् एव ग्राह्यम्। अतः मङ्गलाभावेऽपि यत्र विघ्नध्वंसः जातः तत्र व्यतिरेकव्यभिचारः अस्ति एव। अत एव समाधानरूपेण उच्यते यत् अत्र विशेषकार्यकारणभावः अवगन्तव्यः। मङ्गलं विघ्नविशेषं प्रति कारणम् इति ज्ञेयम्। तस्यायम् अर्थः मङ्गलजन्यविघ्नध्वंसं प्रति मङ्गलं कारणम् इति। एवमेव विनायकस्तवपाठजन्यविघ्नध्वंसं प्रति विनायकस्तवपाठः कारणम्। एवञ्च ज्ञातं यत् विघ्नध्वंसं प्रति यथा मङ्गलं कारणं तथैव विनायकस्तवपाठादिरपि कारणम्।

भोगेनापि विघ्नध्वंसो भवति। सुखदुःखान्यतरसाक्षात्कारो भोगः। यदा दुःखभोगः तदा दूरितध्वंसः, यदा च सुखं भुक्तं तदा पुण्यं नष्टम्। एवं भोगेन यत्र विघ्नध्वंसः तत्र मङ्गलं नास्ति स्तवपाठोऽपि नास्ति परन्तु विघ्नध्वंसस्तु जात एव। अतः विघ्नध्वंसं प्रति भोगः अपि कारणम्। अर्थात् भोगजन्यविघ्नध्वंसं प्रति भोगः कारणम्। एवं व्यभिचारस्य वारणम् अत्र जातम्।

---

[5] "प्रायश्चित्तानि पापक्षयसाधनानि चान्द्रायणादीनि" इति।
(वेदान्तसारः, पृष्ठसंख्या- ३०)

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

क्वचिच्च प्रायश्चित्तेनापि विघ्नध्वंसो भवति। अत्रापि पूर्वोक्तः व्यभिचारः अस्ति। परन्तु सः व्यभिचारः अपि पूर्वोक्तयुक्त्या वारितः। अर्थात् प्रायश्चित्तजन्यविघ्नध्वंसं प्रति प्रायश्चित्तं कारणम्। एतत् सर्वं विविच्य न्यायसिद्धान्तमुक्तावलीकारेण उक्तं – 'मङ्गलं विघ्नध्वंसविशेषे कारणम्, विघ्नध्वंसविशेषे च विनायकस्तवपाठादिः' इति।

तथैव समाप्तिं प्रति न केवलं विघ्नध्वंसः कारणम् अपि तु विघ्नध्वंसस्य तथा विघ्नात्यन्ताभावस्यापि कारणत्वम् अस्ति। अत एवोक्तं न्यायसिद्धान्तमुक्तावलीकारेण – 'क्वचिच्च विघ्नात्यन्ताभाव एव समाप्तिसाधनं, प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वात्' इति। विघ्नः समाप्तिं प्रति प्रतिबन्धकः। एवं विघ्नात्यन्ताभावः, विघ्नप्रागभावः, विघ्नध्वंसाभावः अपि।

नवीनानां मते नास्तिकादीनां ग्रन्थे यत्र मङ्गलं नास्ति तत्र विघ्नध्वंसः समाप्तिर्वा नास्ति। परन्तु केचन नास्तिकग्रन्थाः मङ्गलं विनापि समाप्तिं गताः तत्र कारणरूपेण जन्मान्तरीयं मङ्गलम् अस्ति इति तैः कल्पितम्। अधुना इदमपि वक्तुं शक्यते यत् तत्र विघ्नात्यन्ताभावोऽपि कारणम् इति। अर्थात् कारणरूपस्य मङ्गलस्य अभावेऽपि विघ्नात्यन्ताभावरूपं कारणं तत्र अस्ति। अतः अस्मिन् स्थले जन्मान्तरीयमङ्गलकल्पना नावश्यकी। अत एव विघ्नध्वंसे वा समाप्तिः विघ्नात्यन्ताभावेऽपि समाप्तिः इति नवीनमतम्।

**उपसंहारः –**

एवं प्राचीननव्ययोः मतम् एकत्र समाकलय्य प्रबन्धः रचितः। द्वयोः मतपार्थक्यमपि विशदं व्याख्यातम्। तत्र इदं साररूपेण वक्तुं युज्यते विघ्नाभावेऽपि विघ्नशङ्क्या वा मङ्गलम् आचरणीयम्। यथा फलशून्यत्वेऽपि अपि नित्यकर्माणि प्रत्यवायोत्पत्तिशंकया अनुष्ठीयन्ते। एवमेव स्वतःसिद्धविघ्नविरहवता अपि शिष्टाचारसंरक्षणाय मङ्गलं समाचरणीयम् इति शिवम्।

**सहायकग्रन्थसूची**


- अन्नंभट्टः। (२०१९)। तर्कसंग्रहः। आचार्यः, श्रीकृष्णवल्लभः (व्याख्याकारः)। वाराणसी : चौखम्बा संस्कृत सीरीज आफिस।
- भट्टाचार्यः, श्रीविश्वनाथपञ्चाननः। (१९७८)। न्यायसिद्धान्तमुक्तावली ('बालप्रिया' हिन्दीव्याख्योपेता)। मुसलगॉवकरः, शास्त्री, श्रीगजाननः (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।
- मिश्रः, श्रीकेशवः। (२००५)। तर्कभाषा ('माधुरी' हिन्दीव्याख्योपेता)। मुसलगॉवकरः, शास्त्री, श्रीगजाननः (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।
- भट्टाचार्यः, श्रीविश्वनाथपञ्चाननः। (१९५५)। कारिकावली (सिद्धान्तमुक्तावलीसहिता)। शास्त्री, जीवरामः, (सम्पा.)। मुम्बई : निर्णयसागरमुद्रणालयः।
- आचार्यः, माधवः। सर्वदर्शनसंग्रहः। ऋषि, शर्मा, प्रो. उमाशङ्करः (भाष्यकारः), वाराणसी : चौखम्बा विद्याभवन।
- मिश्रः, वाचस्पतिः। न्यायवार्तिकतात्पर्यटीका। वाराणसी : चौखम्बा संस्कृत भवन।
- महर्षिः, गौतमः। न्यायसूत्रम्। झा, डॉ. महेशः (सम्पा.), वाराणसी : चौखम्बा संस्कृत सीरीज आफिस।
- भट्टः, जयन्तः। न्यायमञ्जरी। शर्मा, सूर्यनारायणः (सम्पा.)। वाराणसी : चौखम्बा संस्कृत सीरिज आफिस।

- धिताल, डॉ. विश्वनाथः, तर्कसंग्रहसर्वस्वम्। वाराणसी : श्रीदक्षिणामूर्ति मठ प्रकाशन।
- भट्टाचार्यः, विश्वनाथपञ्चाननः। भाषापरिच्छेदः (सिद्धान्तमुक्तावलीसहितः)। ब्रह्मचारी, श्रीनिरञ्जनस्वरूपः (सम्पा.)। कलिकाता : संस्कृत-पुस्तक-भाण्डारः।
- उपाध्यायः, श्रीगङ्गेशः। (१९७९)। मङ्गलवादः (प्रभाख्यटीकया संयोजितः)। शास्त्री, श्रीगौरीनाथः (सम्पा.)। कोलकाता : दि एशियाटिक सोसाइटि।

# अद्वैतस्य मूलसिद्धान्तानां स्थापने नव्यन्यायशास्त्रस्य प्रभावविचारः

**मिलन-दत्तः**
***शोधच्छात्रः*, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**बी-४, कुतुबसांस्थानिकक्षेत्रम् ,नवदेहली – ११००१६**

**प्रबन्धसारः**

*अद्वैतम् इत्यस्य द्विधा इतं द्वितं, तदेव द्वैतं, न विद्यते द्वैतं यत्रेति व्युत्पत्त्या, द्वितीयाभावोपलक्षितं ब्रह्म इत्यर्थः "एकमेवाद्वितीयम्" इति श्रुतेः। अथवा द्वयोर्भावः द्विता, द्वितैव द्वैतं भेदः, न द्वैतमद्वैतं भेदाभाव ऐक्यमिति यावत्। सजातीय-विजातीय-स्वगतभेदत्रयरहितेन ब्रह्मणा सह जीवात्मन एकत्वनिरूपकसिद्धान्तोऽद्वैतवादःइति निष्कर्षार्थः। ब्रह्मसूत्रस्य शङ्करभाष्यं शारीरकभाष्यमित्युच्यते। एतन्मते अध्यासस्य लक्षणम् अतस्मिंस्तद्बुद्धिरध्यासः। ब्रह्म पारमार्थिकसत्ता उच्यते। अद्वैतनये प्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपसंहारिभेदेन प्रमाणं षड्विधम्। किन्तु न्यायनये प्रत्यक्षानुमानोपमानशब्दभेदेन प्रमाणं चतुर्विधम्। गौडादिगौडान्तमद्वैतवाद इति प्रथा। गौडपादकारिकामारभ्य गौडब्रह्मानन्दीयपर्यन्तं विततः अद्वैतग्रन्थराशिः इत्यभिप्रायः। ब्रह्मानन्दसरस्वतीप्रणीतायाः ब्रह्मानन्दीयापराख्यायाः लघुचन्द्रिकाव्याख्यायाः उपजीव्यग्रन्थः अद्वैतसिद्धिः नव्यन्यायमर्यादया विरचितः अद्वैतग्रन्थः न्यायामृतखण्डनतत्परः। अद्वैतसिद्धिप्रभृतिषु ग्रन्थेषु अद्वैतस्य सिद्धान्ताः नव्यन्यायोक्तदिशा एव प्रतिपादिताः। इदानी तृतीयाध्यायोक्तानां वेदान्तस्य मुख्यसिद्धान्तानां स्थापने नव्यन्यायस्य प्रभावः कथमासीत् इत्यस्मिन् विषये चर्चा क्रियते।*

**कुञ्चीशब्दाः-** अद्वैतः, न्यायः, ब्रह्मः, अध्यासः, प्रमाणम् चेत्यादयः।

*******************************************************************************

**उपोद्घातः-**

'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्' इत्यस्ति प्रसिद्धिः। भारतीयशास्त्राणां समेषामपि उपकारकः न्यायः। न्यायः आन्वीक्षिकी इत्यपि कथ्यते। कौटिल्यमते सांख्यं योगः लोकायतं चेति एतत्त्रयम् आन्वीक्षिकी भवति। लोकायतं न्यायशास्त्रं ब्रह्मगार्ग्योक्तं शास्त्रम्। तर्कविद्या आन्वीक्षिक्यां कथमन्तर्भवति? तर्कविद्या इति पदे तर्कः अनुमानम्। अतः यया विद्यया अनुमानं सुष्ठु प्रतिपाद्यते सा तर्कविद्या। अनुमानं सांख्ये मीमांसायां गौतमीयन्याये काणादवैशेषिके च सुष्ठु प्रतिपाद्यते। अतः तर्कविद्या कणादस्य गौतमस्य चापि। अतः तदुभयं न्यायः इति कथ्यते नैयायिकैः। ब्रह्मसूत्रादिषु यदा तार्किकः इति उल्लेखः क्रियते तदा तार्किकपदेन सांख्या एव बोध्यन्ते, न तु नैयायिकाः।

इत्थं नव्यन्यायस्य अध्ययनेन न्यायदर्शनस्य वैशेषिकदर्शनस्य च गूढरहस्यान् अवबोद्धुं न केवलं वयं समर्थाः भवामः, अपि तु व्याकरण-ज्योतिष-साहित्यादिशास्त्राणाम् अवबोधनक्षमता अपि स्वारस्येन प्राप्तुं शक्नुमः। नव्यन्यायस्याध्ययनेन सर्वप्रकारकाज्ञानस्य विनाशो भवति, बुद्धिश्च निर्मला भवति। तदध्ययनं च संस्कृतपदानां व्यवहारशक्तिं सूते, शास्त्रान्तराभ्यासयोग्यतया युनक्ति। अतः तर्कशास्त्रे कृतपरिश्रमः छात्रः सर्वप्रकारेण उपकारी भवति। विश्वगुणादर्शचम्पूशास्त्रे सत्यमेवोक्तं यत् -

**"मोहं रुणद्धि विमलीकुरुते च बुद्धिं**
**सूते च संस्कृतपदव्यवहारशक्तिम्।**
**शास्त्रान्तराभ्यासनयोग्यतया युनक्ति**

**तर्कश्रमो न कुरुते कमिहोपकारम्।।"**[1]

इयम् आन्वीक्षिकी न्यायविद्या सुधीजनानां सर्वविधप्रयोजनानि साधयति। सर्वदर्शनानां प्रतिष्ठितो विद्वान् श्रीवाचस्पतिमिश्रः न्यायभाष्यस्य व्याख्यायां कथयति – 'भाष्यकारास्तु नास्त्येतत् प्रेक्षावतां प्रयोजनम्, यत्रान्वीक्षिकी न निमित्तं भवति'।

प्रत्यक्ष-शब्दप्रमाणाभ्यां ज्ञातविषयस्य पुनः विषयस्य ईक्षणं (परीक्षणं) क्रियते तदेव अन्वीक्षाशब्देन उच्यते। यस्मिन् शास्त्रे अनेन प्रकारेण सर्वविषयाणाम् अन्वीक्षां कृत्वा तत्त्वनिर्धारणं क्रियते तच्छास्त्रम् आन्वीक्षिकी इत्युच्यते।

वस्तुसिद्धिः स्थापनं वा सर्वदा न्यायाधीनं भवति। उच्यते "लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः"। लक्षणं हि वस्तुनः स्वरूपं निर्धारयति प्रमाणं च प्रत्यक्षानुमानादिकं तस्यैव वस्तुनः सत्त्वासत्त्वासन्देहे प्रामाणिकसत्तासाधनेन विरुद्धज्ञानं निवर्तयत् सार्थकं भवति। इदानीं किं नाम लक्षणम् इति प्रश्ने उच्यते **'लक्षणं तु असाधारणधर्मवचनं लक्षणम्'**[2] इति। असाधारणत्वं नाम **'लक्ष्यतावच्छेदकसमनियतत्वम्'**[3]। समनियतत्वं च व्यापकत्वे सति व्याप्यत्वम्। व्यापकत्वं नाम स्वसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेद कधर्मवत्त्वम्। ययोः समनियतत्वं स्वीक्रियते तयोः व्याप्यत्वव्यापकत्वोभयधर्माक्रान्तत्वमपि स्वीक्रियते इति सिद्धान्तः। तथा च लक्ष्यतावच्छेदकव्याप्यत्वे सति लक्ष्यतावच्छेदकव्यापकत्वधर्मत्वं लक्षणमिति लक्षणलक्षणं सम्पन्नं भवति। यथा हि सास्नादिमत्त्वं गोर्लक्षणं निर्दुष्टं दोषसामान्याभावात्। लक्षणस्य हि त्रयो दोषाः प्रसिद्धाः अव्याप्त्यतिव्याप्त्यसम्भवाख्याः। एतद्दोषत्रयरहितो धर्मो लक्षणम्।

**अध्यासप्रतिपादने न्यायोत्तेजकत्वम्-**

शङ्करभगवत्पादकृतस्य शारीरक-मीमांसाभाष्यस्य सूचनासन्दर्भे विद्यमानः "युष्मदस्मत्प्रत्ययगोचरयोः विषयविषयिणोः" इत्यारभ्य "आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ताः आरभ्यन्ते" इत्यत्र परिसमाप्यमानः, शरीरेण विरमितोऽपि अन्तःसारगम्भीरः रमणीयोऽयं ग्रन्थभागः अध्यासभाष्यमिति निगद्यते। अत्र ग्रन्थे जिज्ञासासूत्रार्थान्यथानुपपत्त्या सिद्धमात्मानात्माध्यासम् उपपाद्य सर्वव्यवहाराणामध्यासमूलकत्वं व्यवस्थाप्य वेदान्तैरुपदिश्यमानस्य आत्मैकत्वविज्ञानस्य सर्वानर्थहेतुभूताध्यासोच्छेदार्थत्वरूपप्रयोजनं समर्थयन् व्याचिख्यासितस्य वेदान्तमीमांसाशास्त्रस्य आदिमं सूत्रमवतारयति भाष्यकारः। अद्वैतसिद्धान्तस्य प्रतिष्ठायाः आधारभूतः अयं ग्रन्थः। अत्र प्राचीनाचार्यैः लक्षणभाष्यं सम्भावनाभाष्यं प्रमाणभाष्यमिति त्रेधा विभागः कृतः। तत्र पञ्चपादिकामारभ्य विवरणेन तत्त्वदीपनेन च घटितः एको व्याख्याग्रन्थः विवरणप्रस्थानमिति प्रसिद्धः। एवमेव भामतीमारभ्य कल्पतरुपरिमलाभ्यां संवलितः अपरो ग्रन्थः भामतीप्रस्थानमिति चाख्यायते इत्येतत्सर्वं नात्यन्तममपरिचितमविदुषामपि। तदनन्तरं रत्नप्रभा ब्रह्मविद्याभरणम् न्यायनिर्णयः इत्यादयः टीकाः समुत्पन्नाः।

यद्यपि अध्यासविषये बहवः वादाः वर्तन्ते, तथापि सर्वत्रैव अन्यत्र अन्यधर्माध्यासो न व्यभिचरति। तस्मादध्यासस्य सारसमर्पणात्मकं लक्षणं भवति – **'अतस्मिंस्तद्बुद्धिः'**[4] इति। अत्र तावत् संशयः **'पुत्रभार्यादिषु विकलेषु सकलेषु वा अहमेव**

---

[1] विश्वागुणादर्शचम्पुः तार्किकवर्णनम् श्लो.स.५५६

[2] तर्कभाषा पृ.७

[3] तर्कसंग्रहः दीपिकाढीका पृ.१२

[4] ब्रह्मसूत्रशङ्करभाष्यम् पृ.३

**विकलः सकलो वा इति बाह्यधर्मानध्यस्यति'**[5] इति भाष्यवचनम्। यद्यपि स्वशरीरगतानां स्थूल-कृशत्वादिधर्माणाम् आत्मनि अध्यासः कथञ्चित् शक्यः कल्पयितुं परन्तु पुत्रभार्यादि अत्यन्तात्मभिन्नत्वेन स्पष्टं-

**प्रतीयमानानां स्वात्मनि कथमध्यासः इति संशयः।**
**उच्यते मम शरीरमितिवन्मम पुत्रो, मे भार्या इति।।**

**'स्मृतिरूपः परत्र पूर्वदृष्टावभासः'**[6] तत्र भामतीरीत्या अवभास इत्येव लक्षणम्। मिथ्याज्ञानमित्यर्थः। इदानीमवसन्नोऽवमतो वा भास इति योगार्थः। रूढ्यर्थमादाय विस्तृतं लक्षणं परत्रेत्यादि। पूर्वदृष्टस्यावभास पूर्वदृष्टावभासः। पूर्वदृष्टमित्यनेन पूर्वदर्शनमात्रमपेक्ष्यते न वस्तुसत्तेति सूच्यते। तेन च आरोपस्य अनृतत्वं लभ्यते। आरोपाधिष्ठानं परत्रेत्यनेनोच्यते। प्रत्यभिज्ञायामतिव्याप्तिवारणाय स्मृतिरूप इति। असन्निहितविषय इत्यर्थः। असन्निहितविषयकत्वे सति पूर्वदृष्टावभासकत्वस्य स्मृतौ सत्त्वात् तत्रातिव्याप्तिः स्याद् अतः परत्र इति। एवञ्च असन्निहितस्य परत्र प्रतीतिरध्यास इति लक्षणम्। असन्निहितत्वञ्च आरोप्यस्य अधिष्ठाने परमार्थतोऽसत्त्वम्। अधिष्ठानसमसत्ताकत्वाभाववद्विषयकज्ञानमध्यास इति निष्कर्षः।

अत्र असन्निहितविषयकत्वोक्त्या सत्ख्याति-निरासः, असतो देहादेर्ज्ञानविषयत्वस्य स्वीकारात्। सत्ख्यातिवादिनो हि इत्थम् आक्षिपन्ति – देहेन्द्रियादीनां यदि प्रकाशमानत्वं तर्हि सत्त्वमेवायातम्। सत्ता नाम न जातिरर्थक्रियाकारिता वा। सत्तायामपि सत्तान्तराभ्युपगमे अनवस्थापातात्। तथा च देहादयः सन्तः प्रकाशमानत्वाद् आत्मवत्। तथा च अनृतविषयकत्वमध्यासस्य यदुक्तं सत्यानृते मिथुनीकृत्य इति तदसङ्गतमिति। अत्रोच्यते । प्रकाशमानत्वरूपहेतुः मरुमरीचिकोदके व्यभिचरितः। तत्र प्रकाशमानत्वसत्त्वे अपि अबाध्यत्वरूपसत्ताभावात्। यदि तत्रापि प्रकाशमानत्वात् सत्त्वमभ्युपगम्येत तदा तज्ज्ञानेन प्रवृत्तिस्तत्पानेन पिपासाशान्तिश्च स्यात्। तस्मादारोपितस्य प्रकाशेऽपि वस्तुसत्त्वम् अभ्युपगन्तुमशक्यम्। न च सलिलस्य स्वरूपतः सत्त्वात्तस्य भ्रमविषयित्वमुपपद्यते। देहेन्द्रियादीनाम् तु स्वरूपतः अपि असत्त्वात् कथमारोपविषयत्वमिति शङ्कायां तोयात्मनाऽसतां मरीचीनां तोयात्मतया अनुभवगोचरत्वम् अस्ति इति असतः अपि आरोपविषयत्वस्य अङ्गीकर्तव्यत्वात्। ननु मरीच्यादीनां तोयात्मना असत्त्वं नाम तोयात्मनाभावः। तथा च भाव एव भावान्तरात्मना अभावस्वरूपेण तु भाव इत्युभयविधस्यापि तस्य भावत्वेन भावव्यतिरेकेण अभावान्तरस्य अभावेन सद्रूपत्वात् अनुभवगोचरत्वं युक्तम्। देहादिप्रपञ्चस्य तु असत्त्वात् कथमनुभवगोचरत्वं कथं वा चिदात्मनि आरोपः। यत्तु असत्ख्यातिवादिनोच्यते – देहादेरसतः समस्तसामर्थ्याभावेन ज्ञानविषयत्वे सामर्थ्याभावेऽपि ज्ञानमेव स्वसमानाकारप्रत्ययसामर्थ्येन असद्विषयकभानरूपं भवति। या इयम् असत्प्रकाशनशक्तिः सा एव अविद्या इति, तन्न। या इयम् असत्प्रकाशनशक्तिः विज्ञानस्य तस्य तस्याशक्याभावात्। असदेव शक्यमिति चेत् किमेतत् कार्यमुत ज्ञाप्यम् नाद्यम्। असतः कार्यत्वासम्भवात् नापि ज्ञाप्यम्। तद्धि किं शक्याश्रयज्ञानादतिरिक्तज्ञानेन ज्ञाप्यमुत तेनैव वा? नाद्यः ज्ञानान्तरानुपलब्धेः। तदुपलब्धौ अपि तत्रापि तादृक्शक्तेः सत्त्वेन तत् शक्यस्य ज्ञाप्यत्वे तज्ज्ञापकज्ञानान्तरापेक्षायां तत्र तत्रापि एवम् इति अनवस्थापातात्। तेनैव ज्ञानेन ज्ञाप्यं चेत् तदपि न सम्भवति। असत्प्रत्यययोः संबन्धाभावात्।

---

[5] तदेव पृ.३

[6] तदेव पृ.१

इदानीं तोयाभावात्मकेषु मरीचिषु तोयात्मकत्वं भ्रमविषयीकृतम् इत्युच्यते। तत्र तोयात्मकत्वं किं सत् उत असत् किं वा सदसत् आहोस्विद् अनिर्वचनीयम्? न आद्यः। त्वया मरीचीनां तोयाभावस्वरूपत्वोक्त्या
तोयाभावस्वरूपत्वानुपपत्तेः। न द्वितीयः, मरीचीनां तोयात्मत्वम् असदित्युच्यमानं किं मरीचिस्वरूपमेव इति उच्यते, किं वा वस्त्वन्तरमथवा तुच्छमिति। नाद्यः मरीचिस्वरूपस्यासत्त्वाभावात्। न द्वितीयः मरीचिषु तोयाकार प्रत्यये मरीचयस्तोयं चेति द्वे एव भासेते। तत्र वस्त्वन्तरं यदि मरीचयः तदा मरीचय इति प्रतीतिः स्याद् न तोयमिति। यदि गङ्गातोयम् तदा गङ्गायां तोयमिति स्यात्, न पुनरिह तोयमिति। नापि तुच्छम्। अलीकस्य अपरोक्षानुभवगोचरत्वा-सम्भवात्। सदसदिति तु विरुद्धम्। तस्मादनिर्वचनीयमेव देहादिकं भ्रमविषयः। तथा च सत्त्वसाधकतयोक्तः प्रकाशमानत्वहेतुः मरुमरीचिकोदके व्यभिचरितः।

**प्रमाणेषु नव्यन्यायस्य प्रभावः -**

लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरिति नियमः। तत्र लक्षणस्वरूपं लक्ष्यतावच्छेदकसमनियता-साधारणः धर्म इति नैयायिकमतम्। तच्च लक्षणं यावल्लक्ष्यभावि व्यावर्तकं स्वरूपलक्षणम्। अयावल्लक्ष्यभावि व्यावर्तकम् तटस्थलक्षणम् इति द्विधा विभज्यते। 'सत्यं ज्ञानम् आनन्द' इति ब्रह्मणः स्वरूपलक्षणम् इत्युक्त्वा शङ्कते – लक्ष्यवृत्तिः धर्मः एव लक्षणम्। यदि स्वरूपमेव लक्षणं तर्हि स्वस्य स्ववृत्तित्वम् अनुपपन्नम् इति। तत्रोच्यते - अभेदेऽपि भेदं परिकल्प्य स्ववृत्तित्वमिति। आनन्दादयः ब्रह्मणः अपृथक्त्वेऽपि पृथगिव अवभासन्ते इति साम्प्रदायिकाः। तथा जगज्जन्मस्थितिकारणत्वम् इति यतो वा इमानि भूतानि जायन्ते इति श्रुतिनिर्णितं ब्रह्मणः तटस्थं लक्षणम् इति वेदान्तिभिरङ्गीक्रियते। ब्रह्मसाक्षात्कारे जगतः मिथ्यात्वेन निवृत्तौ ब्रह्मणि तत्कारणमपि निवृत्तम्। नैयायिकानामपि इदं तटस्थलक्षणमभिमतमिति प्रतीयते। अत एव गन्धवत्त्वं पृथिव्याः लक्षणम् इति तटस्थलक्षणम् उक्त्वा प्रलयकाले पृथिवीपरमाणुषु उत्पत्तिक्षणविनष्टे घटे च गन्धस्याभावाद् अव्याप्तिमुक्त्वा गन्धसमानाधिकरण-द्रव्यत्वापरजातिमत्त्वम् इति लक्षणपरिष्कारः तैरङ्गीक्रियते।

अद्वैतवेदान्तशास्त्रस्य प्रमाणेषु न्यायवैशेषिक-दर्शनस्य कियान् प्रभावः अस्ति तदिदानीं चिन्त्यते। प्रथमतः। स्मृतेः प्रमात्वमभ्युपगच्छतां नैयायिकानां मतम् अवलम्ब्यैव अनधिगत-अबाधितार्थविषयज्ञानत्वं प्रमात्वमिति प्रपञ्चितम्। स्मृतेरधिगतार्थविषयत्वात् प्रामाण्यं नास्ति इति अभिप्रायः। वस्तुपरिच्छेदाय व्यवहाराय च प्रमाणमपेक्ष्यते। इदं द्वयमपि स्मृतौ पूर्वानुभवेनैव सिद्धमिति अतः स्मृतेरनुवादस्य च प्रामाण्यं नेच्छन्ति भाट्टाः। वेदान्तिनां लक्षणं द्वयमिदम् अनधिगतम् इति पदेन निरस्तम्। अयं घट अयं घट इति धारावाहिक बुद्धिस्थले तु विषयभेदाभ्युपगमे एव ज्ञानभेदो वक्तुं शक्यते। विषयस्य चैकत्वे ज्ञानस्यापि एकत्वमेव। अर्थेनैव विशेषो हि निराकारतया धियाम् इति। एवमेव सविकल्पकनिर्विकल्पकभेदस्तु अद्वैतिभिः स्वीक्रियते। परन्तु सन्निकृष्टविषयं शब्दजन्यमपि ज्ञानम् अस्माभिः प्रत्यक्षमिति उच्यते यथा त्वं सुखी इति ज्ञानम्। तेन स्वगतसुखज्ञानं जायते। तस्य ज्ञानं प्रत्यक्षमिति स्वीक्रियते। यथा दशमस्त्वमसि इति वक्तृवाक्यजन्यमपि ज्ञानं दशमोऽहम् इति च श्रोतृज्ञानं वाक्यजन्यमपि सन्निकृष्टमित्यतो हेतोः तस्य प्रत्यक्षत्वं स्वीक्रियते अस्माभिः। तथैव तत्त्वमसि वाक्यजन्यं ज्ञानम्। इन्द्रियाजन्यमपि प्रत्यक्षशब्दजन्यमपि ज्ञानं प्रत्यक्षमिति तत्र स्वीक्रियते विवरणकारैः। विशेषणविशेष्यसम्बन्धावगाहि ज्ञानं सविकल्पकम्

सम्बन्धानवगाहिज्ञानं निर्विकल्पकम् इति यदुच्यते सर्वमपि तत् अस्माभिः स्वीक्रियते। तद्वस्तुतः नैयायिकप्रभावितमेव इति अस्माभिः अद्वैतिभिः उक्तम्। किञ्च अन्यत्रापि सन्निकर्षस्वीकारविषयेऽपि। षोढा सन्निकर्षाः नैयायिकैः स्वीकृताः। अद्वैतिनस्तु तन्न स्वीकुर्वन्ति। चैतन्याभिव्याञ्जकवृत्तिजनने संयोगादीनां सन्निकर्षाणां विनियोगमिच्छन्तो वेदान्तिनः समवायस्य नित्यसम्बन्धस्य तिरस्कारेण तत्स्थाने तादात्म्यम् अभिषिञ्चन्ति। तत्र अद्वैतिनां मते संयोगः, संयुक्ततादात्म्यम्, आवश्यकं चेत् संयुक्ततादात्म्यतादात्म्यम् इति सन्निकर्षः स्वीक्रियते। कुतः तत्र समवायसम्बन्धः वेदान्तिभिः न स्वीक्रियते इति चेत् नित्यसम्बन्धः समवायः इत्युच्यते। यदि तद्भिन्नं किमपि नित्यं स्यात् तर्हि तत्र सिद्धान्तविरोधः प्रसज्येत। अतः नित्यसम्बन्धरूपः समवायः अद्वैतिभिः नाङ्गीक्रियते। तत्स्थाने तादात्म्यमिति स्वीक्रियते। स्वरूपसम्बन्धविशिष्टे घटे रूपं तादात्म्यसम्बन्धेन उत स्वरूपसम्बन्धेन वर्तते इति संशयः। अत एव घटे घटज्ञानं संयोगसन्निकर्षेण जायते। घटगतरूपज्ञानं केन जायते इत्यत्र, संयुक्ततादात्म्यसम्बन्धेन सन्निकर्षेण यथा चक्षुः संयुक्तः घटः तत्र तादात्म्यसम्बन्धिरूपं वर्तते।

घटत्वम् अस्ति। कुतः इति चेत् अयं घट इति अनुभवे घटत्वप्रकारक-घटविशेष्यकज्ञानं भवतीत्यत्र हेतोः घटत्वरूपः धर्मः स्वीक्रियते। तस्य धर्मस्य जातित्वम् अद्वैतिभिः नाङ्गीक्रियते। कुतः इति चेत् – **'नित्यमेकम् अनेकानुगतं सामान्यम्'**[7]। सामान्यमेव जातिः, तत् नित्यम् । किन्तु अद्वैतमते तावत् ब्रह्माभिन्नं सर्वमनित्यम्। ब्रह्मभिन्नानां घटत्वादीनां नित्यत्वं स्वीक्रियते चेत् अद्वैतहानिः। सामान्यम् अनेकानुगतं परन्तु अनेकसमवेतत्वम् न, समवायसम्बन्धस्य अनभ्युपगमात्। अतः वेदान्तिनां मते जातिः नास्ति। घटत्वादि धर्मः अस्ति। सदा तस्य धर्मस्य जातित्वम् न स्वीक्रियते। एवं सर्वत्रापि तत्र घटज्ञानं तावत् संयुक्ततादात्म्यसम्बन्धेन एव वक्तुं शक्यते। तत्र घटगतरुपत्वज्ञानं तु संयुक्ततादात्म्येन वा वक्तुं शक्यते इत्यतः सन्निकर्षविषयेऽपि अभिप्रायभेदोऽस्ति।

एवमन्यदपि उच्यते अनुमानविषये। तत्र अनुमाने **'परामर्शजन्यं ज्ञानमनुमितिः'**[8] इति नैयायिकाः। वेदान्तिनस्तु व्याप्तिजन्यं ज्ञानमनुमितिः। तत्र परामर्शस्य आवश्यकता नास्ति। अनुमितौ पक्षज्ञानमावश्यकम्। पक्षे हेतुरस्ति इति ज्ञानमावश्यकम्, व्याप्तिज्ञानं च आवश्यकम्। एतत् सर्वं परामर्शं विना एव सम्भवति। पक्षः पर्वतो दृश्यते। तस्मिन् पर्वते धूमोऽस्ति इति प्रत्यक्षेणैव दृश्यते। तेन धूमस्य पर्वतादि वृत्तित्वरूपपक्षधर्मतायाः ज्ञानमागतम्। ततः व्याप्तिज्ञानं यत्र धूमः तत्र वह्निः। तेन च पर्वतो वह्निमान् इति अनुमितिः। अतः मध्ये व्याप्तिविशिष्टपक्षधर्मताज्ञानं नापेक्षते इति वेदान्तिनः। किञ्च तत्रापि नैयायिकैः त्रिविधं लिङ्गम् अङ्गीक्रियते। अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि च। परन्तु वेदान्तिभिः अन्वयीरूपम् एकमेव अनुमानमङ्गीक्रियते। कुतः इति चेत् किं नाम केवलान्वयित्वम्? अत्यन्ताभावप्रतियोगित्वम्। प्रमेयतायाम् अत्यन्ताभावप्रतियोगित्वम् अस्ति इति तैरुच्यते। अद्वैतिनां मते तु ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वमेव प्रमेयत्वादीनाम्। प्रमेयत्वं ब्रह्मणि नास्ति। अतः प्रमेयत्वादीनां ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वमेव न तु अप्रतियोगित्वम् इत्यतः तत्र केवलान्वयिरूपं किमपि नास्ति इत्यतो हेतोः केवलान्वयिरूपम् अनुमानम् वेदान्तिभिः नाङ्गीक्रियते। किञ्च तत्र धूमेन हेतुना पर्वते वह्नौ साध्ये व्यतिरेकानुमानस्य

[7] तर्कसंग्रहः पृ.१६७

[8] तदेव पृ.८७

आवश्यकता एव नास्ति। यत्र वह्न्यभावः तत्र धूमाभावः इति व्यतिरेकव्याप्तिग्रहणे न किमपि प्रयोजनम् इत्यतः व्यतिरेकरूपानुमानम् न स्वीक्रियते। अतः अन्वयरूपमेकमेव अनुमानम् इति अद्वैतवेदान्तिनाम् निश्चयः। वेदान्तिनस्तु श्रुतिरूपस्य आगमप्रमाणस्य प्राबल्यमङ्गीकुर्वन्ति। श्रुत्यविरोधप्रमाणान्तराणि अनुमानादीनि तै अभ्युपगम्यते। वेदान्तवाक्यमीमांसा तद्विरोधितर्को प्रकरणात् प्रस्तूयते इति उक्तम् आचार्यैः। अतः नैयायिकैः अङ्गीकृतः पारिभाषिकशब्दाः अव्याप्त्यादयः तथैव अत्र वेदान्तशास्त्रेऽपि स्वीक्रियन्ते। तथा अनुमानप्रमाणानुबन्धतया तैः लक्षणकरणपूर्वकं व्यवहृताः। पक्षसपक्षविपक्षरूपाः हेत्वाभासादयोऽपि अत्र शास्त्रे अभ्युपगम्यन्ते। लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरिति न्यायः। तत्र लक्षणस्वरूपं यावल्लक्ष्यभावि स्वरूपलक्षणम् अयावल्लक्ष्यभावि तटस्थलक्षणमिति द्विधा विभज्यते। इदं लक्षणं तत्र तटस्थलक्षणम् इतियेव सूचितम्। अतएव प्रलयकाले परमाणुषु गन्धाभावात् गन्धवत्त्वरूपं लक्षणं तत्र अव्याप्तं तथा उत्पन्नविनष्टे घटे गन्धाभावात् तत्रापि अव्याप्तिः इति कृत्वा तद्वारणायैव गन्धसमानाधिकरणद्रव्यत्वम् इति लक्षणपरिष्कारः अत एव तैः कृतः। एवम् एतादृशलक्षणभेदः तावत् तटस्थलक्षणम्, स्वरूपलक्षणं च इति अद्वैतिभिः स्वीक्रियते। सत्यं ज्ञानम् आनन्दः इति ब्रह्मणः स्वरूपलक्ष्यवृत्तिधर्मः। यदि स्वरूपलक्षणमित्युच्यते तस्य स्ववृत्तित्वं सम्भवति वा इति सन्देहः स्यात्। ब्रह्म तावत् ज्ञानमेव ।सत्यमेव ब्रह्म। आनन्द एव ब्रह्म। तस्य आनन्दस्य सत्यस्य वा ज्ञानस्य वा ब्रह्मवृत्तित्वं नास्ति। अतः लक्ष्यवृत्तित्वाभावः तस्य लक्षणत्वं कथं स्यात् इति सन्देहे सति उच्यते वस्तुतः आनन्दादयः ब्रह्मणः अपृथक्त्वेऽपि पृथगिव अवभासन्ते इति कल्पितं भेदमादायैव तत्र स्वस्य स्ववृत्तित्वं प्रतिपाद्यते। एवं तत्र तदा प्रमाणलक्षणमपि तर्कमतप्रभावितम् इत्युक्तम्।

प्रमात्वं तावद् अनधिगताबाधितार्थविषयक-ज्ञानत्वम् इति प्रतिपादितम्। किन्तु प्रमालक्षणे दोषमाविष्कुर्वद्भिः नैयायिकैः पूर्वपक्षित्वेनात्रायम् आक्षेपः समुपस्थाप्यते यद् अद्वैतसिद्धान्ते ब्रह्मैव केवलं सद् वस्तु। तस्मिन् च ब्रह्मणि परिदृश्यमानोऽयं जगत्प्रपञ्चोऽध्यस्तः। अध्यस्तमात्रस्य च विषयस्य मिथ्यात्वात् सर्वस्य जगतो मिथ्यात्वेन ज्ञाननाश्यत्वेन च बाधितत्वम्। तथाहि यथा शुक्तिरूपाधिष्ठानज्ञानेन रजतादिभ्रमज्ञानं बाध्यते तथा ब्रह्मरूपाधिष्ठानज्ञानेन ब्रह्मातिरिक्तानां सर्वेषामपि व्यावहारिकज्ञानानां बाधितार्थविषयकत्वात् व्यावहारिक-घटादिज्ञानानां कथं प्रमात्वं तत्तज्ज्ञानानामबाधितार्थ-विषयकज्ञानत्वाभावात्। ब्रह्मातिरिक्तानां सर्वेषामपि विषयाणामद्वैतमते मिथ्यात्वेन बाधितत्वात् तत्तद्विषयाणां सर्वेषामपि ज्ञानानां बाधितविषयकत्वात् तत्र तत्र प्रमालक्षणं अव्याप्तमिति। तथात्वेऽद्वैतिभिरुच्यते –

ब्रह्मसाक्षात्कारानन्तरं हि घटादीनां बाधः। ब्रह्म हि सर्वस्याधिष्ठानमिति तदधिष्ठानसाक्षात्कारानन्तरं हि सोपादानकार्यनिवृत्तिः। अधिष्ठानसाक्षात्कारस्य एवाध्यस्तनिवर्तकत्वाद् ब्रह्मणश्च घटाद्यधिष्ठानत्वाद् ब्रह्मसाक्षात्कारे सत्येव घटादीनां बाधः। तथा चेयं श्रुतिः –**'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्'**[9] इति। किञ्च**'ब्रह्मवेद ब्रह्मैव भवति'**[10] इति श्रुतेश्च ब्रह्मसाक्षात्कारवतः पुरुषस्य क्रियाकारकफलरूपस्य प्रपञ्चजातस्य ब्रह्मरूपत्वात् न हि केनापि इन्द्रियेण कोऽपि विषयो ज्ञातुं शक्यते। तदानी सर्वस्यापि जगत्प्रपञ्चस्य ब्रह्मात्मनावस्थानेन क्रियाकारकफलव्यवहाराभावात्

[9] वृ.उ., २-४-१४

[10] मु.उ., ३-२-९

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

तस्याविद्यमानत्वेन घटादिज्ञानमेव नास्तीति घटादिज्ञानानां प्रमात्वविचारप्रसङ्ग एव नापद्यते।

ब्रह्मज्ञानात्पूर्वं संसारदशायां तु सर्वेषां घटादिवस्तुनां व्यावहारिकसत्ताभ्युपगमात् तेषां बाधो नैव भवति। घटादीनां नाशेऽपि तदुपादानस्याज्ञानस्य सत्त्वात् न बाधः। तथाहि श्रुतिः –**"यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति"**[11] इति। यदाज्ञानवशात् ब्रह्मणि नानात्वं दृश्यते तदा जीवः अहं कर्ता ,अबाधितपदेन अहंभोक्ता,इदं कर्म इतिभिन्नमिव पश्यति। तेन प्रमालक्षणेसंसारदशायाम-बाधितत्वं विवक्षितम्। अबाधितत्वञ्चब्रह्मज्ञानेतरज्ञाना-बाध्यत्वम्। ब्रह्मज्ञानातिरिक्तेन केनचिज्ज्ञानेन घटादेः विषयस्य बाधो न भवतीति सिद्धं घटादिज्ञानस्याबाधितार्थविषयकत्वम् ,तेन च घटादिप्रमायां नाव्याप्तिः। उक्तञ्च-

**"देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः।**
**लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात्।।"**[12]

इति।

यथा - गौरोऽहम्, श्यामोऽहम्, ब्राह्मणोऽहमित्येवं-देहात्मप्रत्ययो ब्रह्मसाक्षात्कारात् प्रागेव प्रमात्वेन व्यवह्रियते तथैव लौकिकंक्रियाकारकफलादिविषयकं ज्ञानमपि प्रमात्वेन व्यवह्रियते। तस्माद्व्यावहारिकदृष्ट्या घटादिज्ञानानां प्रमात्वमक्षतमेव।

## सहायकग्रन्थसूची


- अन्नंभट्टः। (२०२२) । तर्कसंग्रहः। श्रीकृष्णवल्लभाचार्यः (सम्पा.)। वाराणसी : चौखम्बा विद्याभवन।
- उपनिषद्। (१९९९) । स्वामीलोकेश्वरानन्दः (प्रथमः, द्वितीयः, तृतीयः) (सम्पा.)। कोलकाता : आनन्दपावलिशार्स प्राइभेढ लिमिढेड।
- केशवमिश्रः। (२०१९)। तर्कभाषा प्रभमखण्डम्। श्रीगङ्गाधरकरन्यायाचार्यः (सम्पा.)। कोलकाता : महावोधि बुक एजेन्सि।
- गङ्गेशोपाध्यायः। (१९७४) । तत्त्वचिन्तामणिः । श्रीकामाख्यानाथतर्कवागीशः (सम्पा.)। दिल्ली : मोतिलालबनारसीदासः।
- महर्षिगौतमः। (२०१८)। न्यायदर्शनम् । सम्पा. फणिभूषणतर्कवीगीशः (सम्पा.)। कोलकाता : पश्चिमवङ्गराज्यपुस्तकपरिषद।
- ब्रह्मसूत्रशङ्करभाष्यम्। (२००८)। वासुदेवशर्मणा (सम्पा.)। वाराणसी : चौखम्बा विद्याभवन।
- स्वामीमधुसूदनसरस्वती। (२०००)। अद्वैतसिद्धिः। स्वामिविशुद्धानन्दगिरिः(सम्पा.)। पाहाडीवाजार,कनखल,हरिद्वार : श्रीगोकुलधाम पुजारीगली।
- ब्रह्मसूत्रशङ्करभाष्यम्। (२००८)। वासुदेवशर्मणा (सम्पा.)। वाराणसी : चौखम्बा विद्याभवन।
- श्रीधर्मराजाध्वरीन्द्रः। (२०१९)। वेदान्तपरिभाषा। श्रीगजाननशास्त्री (सम्पा.)। वाराणसी : चौखम्बा विद्याभवन।


[11] वृ.उ.२-४-१४

[12] वेदान्तपरिभाषा प्रत्यक्षपरिच्छेदे

# न्यायनये ईश्वरस्वरूपविचारः

**दीपक-मण्डलः**

**शोधच्छात्रः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

**नवदेहली**

**प्रबन्धसारः**

*न्यायाभिमतेश्वरस्य दर्शनान्तरदृष्ट्या पर्यालोचनाय प्रथमतो न्यायाभिमतेश्वरस्य स्वरूपं निर्वाच्यम्। तत्र न्यायकुसुमाञ्जलिकाराणां श्रीमदुदयनाचार्याणां न्यायदर्शनाभिमतेश्वरविषयकं स्वरूपनिर्वचनं समीचीनतामधिगच्छति, श्रीमतोदयनाचार्येण न्यायकुसुमाञ्जलौ- "इह यं कमपि पुरुषार्थमर्थमानाः शुद्धबुद्धस्वभाव इत्यौपनिषदाः, आदिविद्वान् सिद्ध इति कापिलाः, क्लेशकर्मविपाकाशयैरपरामृष्टो निर्माणकायमधिष्ठाय सम्प्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः, लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति पाशुपताः, शिव इति शैवाः, पुरुषोत्तम इति वैष्णवाः, पितामह इति पौराणिकाः, यज्ञपुरुष इति याज्ञिकाः, सर्वज्ञ इति सौगताः, निरावरण इति दिगम्बराः, उपास्यत्वेन देशित इति मीमांसकाः, लोकव्यवहारसिद्ध इति चार्वाकाः, यावदुक्तोपपन्न इति नैयायिकाः"। महर्षिणा गौतमेन संक्षिप्तैस्त्रिभिः सूत्रैरीश्वरविषयकः सिद्धान्तो वर्णितः। तत्र तैः प्रमाणमुपदर्श्यते यत्-* ***"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयव-तर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञाना-न्निःश्रेयसाधिगमः"*** *इति प्रथमसूत्रे नास्तीश्वरस्योल्लेखो मुक्तिकारणीभूततत्त्वज्ञानविषयतया।* ***"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः"*** *इति मोक्षक्रमोपदर्शकसूत्रेऽपि कारणाभावात् कार्याभाव इति रीत्या मिथ्याज्ञानदोषप्रवृत्तिजन्मनां समुच्छेदादनायासेनैव मोक्षः सम्पद्यते न हि तत्र परमेश्वरानुग्रहस्य काचिदप्यावश्यकता। ईश्वरो यद्यात्मकल्प इति पक्षः स्वीक्रियते तर्हि नैतद्धि सम्भाव्यते यतो हि* ***"इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्"*** *इति सूत्रे इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लक्षणभूताः गुणाः समुद्दिष्टाः परन्तु नैतेऽपि परमेश्वरे सम्भाव्यन्ते। भाष्यकारो वात्स्यायनः स्वरूपमीश्वरस्य स्वल्पेनैव निर्वचनेन स्पष्टयति। तत्र च* ***"गुणविशिष्टमात्मान्तरमीश्वरः"*** *इति कृत्वेश्वरस्य लक्षणं निरुच्यते। गुणपदेन च सर्वज्ञत्वादिकमुपादीयते। अयमात्मकल्पः आत्मसमानजातीयः सर्वज्ञत्वादिभिर्गुणैर्विभूषितः इत्येवं परमेश्वरस्य लक्षणमभिधायाग्रे तस्य स्वरूपं निरूप्यते। सर्वमुपरि परमेश्वरविषये प्रतिपादितं तत्र दीधितिकृतामनेकाः विप्रतिपत्तयो विद्यन्ते। रघुनाथशिरोमणिराकाशस्यापीश्वरात्मकत्वमङ्गीक्रियते। न्यायवार्तिकस्य तात्पर्यटीकाकारो वाचस्पतिमिश्रः अपि अत्रानुमानमेकं प्रस्तुवन्ति। उदयनाचार्यो न्यायकुसुमाञ्जलौ परमेश्वरसाधकान्यनेकान्यनुमानानि प्रस्तौति। न्यायदर्शनाभिमतोऽयमीश्वरो जीवात्मसजातीयः नित्यज्ञाननित्येच्छानित्यकृतिविशिष्टः संख्यापरिमाणपृथक्त्वसंयोग-विभागाख्यैः पञ्चसामान्यगुणैश्च विशिष्टः। जीवात्मसजातीयतयाऽस्य विभुत्वं स्वीक्रियते।*

**कुञ्चीशब्दाः-** अनुमानम्, परमेश्वरः, कारणत्वम्, जन्यत्वम्, सकर्तृकम्, परिमाणम्, विभूत्वं चेत्यादयः।

*************************************************************************************

न्यायाभिमतेश्वरस्य दर्शनान्तरदृष्ट्या पर्यालोचनाय प्रथमतो न्यायाभिमतेश्वरस्य स्वरूपं निर्वाच्यम्। तत्र न्यायकुसुमाञ्जलिकाराणां श्रीमदुदयनाचार्याणां न्यायदर्शनाभिमतेश्वरविषयकं स्वरूपनिर्वचनं समीचीनतामधिगच्छति, श्रीमतोदयनाचार्येण न्यायकुसुमाञ्जलौ- "इह यं कमपि पुरुषार्थमर्थमानाः शुद्धबुद्धस्वभाव इत्यौपनिषदाः, आदिविद्वान् सिद्ध इति कापिलाः, क्लेशकर्मविपाकाशयैरपरामृष्टो निर्माणकायमधिष्ठाय सम्प्रदायप्रद्योतकोऽनुग्राहक-श्चेति पातञ्जलाः, लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति पाशुपताः, शिव इति शैवाः, पुरुषोत्तम इति वैष्णवाः, पितामह इति पौराणिकाः, यज्ञपुरुष

इति याज्ञिकाः, सर्वज्ञ इति सौगताः, निरावरण इति दिगम्बराः, उपास्यत्वेन देशित इति मीमांसकाः, लोकव्यवहारसिद्ध इति चार्वाकाः, यावदुक्तोपपन्न इति नैयायिकाः”[1]।

एवं रीत्याऽन्यान्यदर्शनानुसारमीश्वरनिर्वचनं कुर्वता न्यायदर्शनाभिमतमीश्वरस्वरूपं वर्णयतोच्यते “यावदुक्तोपपन्न इति नैयायिकाः” इति। टीकाकृद्भिरस्य पदस्य समासं वर्णयतोच्यते- **“यावदुक्तेषु यदुपपन्नं युक्तिमत् सर्वज्ञत्वादि तेनोपपन्नः सम्पन्न इति मध्यमपदलोपिसमासस्तत्पुरुषः। यावदुक्तेषु उपपन्नः प्रामाणिको धर्मो यस्येति बहुव्रीहिर्वा”[2]** अर्थात् ये गुणाः सर्व एतेऽन्येषु दर्शनेषु प्रतिपादिताः परमेश्वरीयगुणत्वेन, तेषु सर्वेषु यद् यद् युक्तिपुरस्सरमुपपन्नं भवति ते सर्वे गुणाः नैयायिकैरीश्वरे स्वीक्रियन्ते।

वस्तुतः समग्रमपि दर्शनशास्त्रं युक्तिभिः तत्त्वप्रतिपादनमेव। कस्यचिदपि दर्शनस्य कश्चिदपि सिद्धान्तः तर्कमनादृत्य नैव स्थितः। अस्तु नाम कानिचन दर्शनानि शास्त्रस्यैव परमं प्रामाण्यमङ्गीकुर्वन्तु परन्तु न हि तर्कस्य तैरप्यनादरः क्रियते। तत्रान्यैः दार्शनिकैर्ये ये गुणाः परमेश्वरीयत्वेन निर्दिष्टा अधिकांशतः सर्वेऽपि युक्त्याऽवश्यमेव सिद्धिमेष्यन्ति। किन्तु समेषां दर्शनानां समेषां जनानाञ्च विचारदृष्टिरन्या भवति। अत एवानेकेषां दर्शनानां सिद्धान्तानाञ्च जनिरभूत्। अतः यावदुक्तोपपन्न इति शब्देन नैयायिकदृष्ट्या यावताम् युक्तीनामौचित्यं ताभिर्यावदुपपद्यते तावत् सर्वैः नैयायिकैरीश्वरीय-गुणत्वेनाङ्गीक्रियते। एतदेव न्यायाभिमतेश्वरस्य निष्कृष्टं स्वरूपम्। तदेष सिद्धान्तो न्यायसूत्रप्रणेतृगोतमादारभ्य इदानीन्तननैयायिक-विचारानालोच्य निर्णीयते। तत्रापि केषाञ्चित् सिद्धान्तानां वैमत्यं विद्यते।

**महर्षिगौतमानुसारमीश्वरस्वरूपम्**

महर्षिणा गौतमेन संक्षिप्तैस्त्रिभिः सूत्रैरीश्वरविषयकः सिद्धान्तो वर्णितः[3]। ईश्वरस्य नातिस्पष्टं स्वरूपं दृष्टिपथमायाति प्रथमेन तावत् सूत्रेण पुरुषकर्मणां सत्यपि प्रयासविशेषे वैफल्यदर्शनात् परमेश्वरोऽपि कारणम्। पुरुषोऽयं समीहमानो नावश्यं कर्मफलमाप्नोति, किन्तु कदाचिदसफलतामप्याप्नोति, अतोऽनुमीयते यत् पुरुषस्य कर्मफलाराधनं पराधीनं, यदधीनमस्ति पुरुषस्य कर्मफलाराधनं स ईश्वरः। अपरेण सूत्रेणाशङ्क्यते पुरुषकर्माभावेऽपि फलनिष्पत्तेरभावात् फलनिष्पत्तिर्न परमेश्वराधीना। तृतीयेन च सूत्रेण पुरुषकर्मसापेक्षस्य परमेश्वरस्य कारणत्वमुपपाद्यते, तेनैव चास्या आशङ्कायाः समाधानमपि क्रियते। एभिस्त्रिभिरेव नातिस्पष्टैः सूत्रैरीश्वरो निरुच्यते न्यायसूत्रनामके न्यायदर्शनादिग्रन्थे। तत्र तैः प्रमाणमुपदर्श्यते यत्- **“प्रमाणप्रमेयसंशय-प्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्प-वितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्वज्ञाना-न्निःश्रेयसाधिगमः”[4]** इति प्रथमसूत्रे नास्तीश्वरस्योल्लेखो मुक्तिकारणीभूततत्त्वज्ञान-विषयतया। **“दुःखजन्मप्रवृत्ति-दोषमिथ्याज्ञाना-नामुत्तरोत्तरापाये तदनन्तरापायाद-पवर्गः”[5]** इति मोक्षक्रमोपदर्शकसूत्रेऽपि कारणाभावात् कार्याभाव

---

[1] न्या. कुसु. पृ. ११

[2] न्या. कु., पृ. १७

[3] ईश्वरः कारणम् पुरुषकर्मफल्यदर्शनात् (४-१-१९) न, पुरुषकर्माभावेऽपि फलानिष्पत्तेः (४-१-२०) तत्कारितत्वादहेतुः (4/1/21) न्यायसूत्र

[4] न्या. सू. १-१-१

[5] तदेव १-१-२

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

इति रीत्या मिथ्याज्ञानदोषप्रवृत्तिजन्मनां समुच्छेदाद् अनायासेनैव मोक्षः सम्पद्यते न हि तत्र परमेश्वरानुग्रहस्य काचिदपि आवश्यकता। ईश्वरो यद्यात्मकल्प इति पक्षः स्वीक्रियते तर्हि नैतद्धि सम्भाव्यते यतो हि **"इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्"**[6] इति सूत्र इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लक्षणभूताः गुणाः समुद्दिष्टाः परन्तु नैतेऽपि परमेश्वरे सम्भाव्यन्ते। अतः स्पष्टीभवति यद् गोतम आत्मपरमात्मनोः भेदं निरुच्य परमात्मनः अस्तित्वं साधयितुं युक्तिं न प्रास्तौत् इति। वेदानामपि प्रामाण्यं नैयायिकैरर्वाचीनैरीश्वरोच्चरितत्वेन स्वीक्रियते परन्तु नेदमपि न्यायसूत्रे प्रतिपाद्यते- **"मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्"**[7] इति सूत्रेणाप्तप्रामाण्याद् वेदानां प्रामाण्यं व्यवस्थापितं किन्तु परमात्मना प्रणीतत्वादस्य प्रामाण्यं नैव व्यवस्थापितम्। न्यायसूत्रस्य पूर्वमुल्लिखितेषु सूत्रेषु त्रिषु परमेश्वरसाधकेषु परमेश्वरस्यास्तित्वं साध्यते खण्ड्यते वा नेदं स्पष्टीभवति। निष्कर्षश्चैवमायाति यत् सूत्ररूपे न्यायदर्शने परमेश्वरस्य किञ्चित् महत्त्वपूर्णस्थानं नासीत्, यत्किञ्चिदर्वाचीनैः दार्शनिकैः नैयायिकैः व्यवस्थाप्यते सर्वमपि तत्प्राचीने न्यायदर्शने संशयास्पदमेवासीत्।

किन्तु तार्किकदृष्ट्या विविच्यमाने नेदं मतं समीचीनतामधिगच्छति। प्रमाणानि तत्रेमानि- यद्यपि प्रमाणप्रमेयादिसूत्रे नास्तीश्वरस्य समुल्लेखो मुक्तिकारणत्वेन परन्तु सूत्रेऽस्मिन् नापेक्षित ईश्वरस्योल्लेखः। अत्र सूत्रे प्रमेयतयैव यथाऽऽत्मशरीरादीनां प्रमाविषयाणां परिग्रहो भवति तथैवेश्वरस्यापि परिग्रहः शक्यः। यच्चोपस्थाप्यते यत् नास्ति दुःखजन्मप्रवृत्तिसूत्रोपदर्शिते मोक्षक्रमे परमेश्वरानुग्रहस्यावश्यकता। तद्धि साधु। परन्तु नैतदीश्वरास्तित्वबाधकमस्ति। यदीश्वरानुग्रहस्य स्यात् काचिदावश्यकता मोक्षक्रमे तर्हि कर्तुमकर्तुमन्यथाकर्तुं समर्थः परमकारुणिकः स ईश्वरः सर्वानेव जीवान् मोक्षपदं कथं नैव प्रापयेत्? अतो नैयायिकैरीश्वरानुग्रहस्य अवश्यकता मोक्षक्रमे नैव प्रतिपाद्यते जीवश्च स्वकर्मरज्जुबद्धः स्वाचरणानुष्ठाने स्वतन्त्रः क्रमशः मोक्षमवाप्नोति। ईश्वरस्य तु न किमपि प्रेमास्पदं स्वकीयपरकीयेत्यादिबुद्धिविषयीभूतञ्च येन सः पक्षपातेन कमपि जनमनुगृह्णीयात्। यच्चोपस्थाप्यते वेदानां प्रामाण्यं महर्षिणा गौतमेन न हीश्वरप्रणीतत्वादङ्गीक्रियते।

यद्यप्याप्तोच्चरितत्वेनैवास्ति वेदानां प्रामाण्यं किन्तु **"ईश्वरप्रणीताः वेदाः"**[8] इति दिङ्मात्रमपि नोपदर्श्यते। एवमस्य न्यायदर्शनस्यास्तिकत्वेऽपि ऋषिप्रणीतत्वाद्वेदानां प्रामाण्यस्वीकारो न युज्यते। अपि च, न्यायसूत्रकृता गोतमेन महर्षिणा द्वितीयेऽध्याये प्रथमे पादे वेदानां प्रामाण्यविषये पूर्वपक्षमुपस्थापयता- **"तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः"**[9] इति सूत्रेण अनृतव्याघात-पुनरुक्तदोषेभ्यो वेदानां प्रामाण्यं नास्तीत्येवमाक्षिप्यते। तत्र यदि गोतमेन महर्षिणा वेदानां प्रामाण्यमृषि-प्रणीतत्वात् स्वीक्रियते, तदा नहि नैकानामृषीणां वाक्येषु वेदेषु पुनरुक्तिरूपेणैकार्थत्वेन प्रामाण्यं नास्तीत्येवमाक्षिप्तुं शक्यते यतो ह्येककर्तृकेष्वेव वाक्येषु एकार्थवत्त्वं पुनरुक्तिदोषमापादयति। अन्यच्च "ऋषियो मन्त्रद्रष्टारः" इत्यादिवचनैः मन्त्रद्रष्टत्वमेवर्षीणां स्वीक्रियते अतः कथङ्कारमेवं कल्पयितुं शक्यं

[6] तदेव १-१-१०

[7] तदेव २-१-६८

[8] सा. त. कौ., पृ. १७६

[9] न्या. सू. २-१-५७

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

यन्न्यायदर्शनेन वेदानां ऋषिप्रणीतत्वं स्वीक्रियते। पूर्वोक्त्या युक्त्या वस्तुतो वेदानामेककर्तृकत्वं स्वीकार्यमेव, एककर्तृकत्वे च स्वीकृते वेदानामीश्वरप्रणीतत्वमङ्गीकार्यमेव। अतः गौतमेन वेदानां प्रामाण्यमीश्वरप्रणीतत्वात् स्वीक्रियत इति स्पष्टीभवति।

ईश्वरः कारणमित्यादित्रिषु सूत्रेषु परमेश्वरसाधकत्वमेव स्वीकरणीयम्। यतो हि परम्परया सूत्रतात्पर्यं भाष्यानुसारमेव स्फोरणीयं भवति। प्राचीनभारतीयपरम्परायां सूत्रभाष्यादिक्रमेणैव ग्रन्थानामाशयः क्रमशः स्फुटीक्रियमाण आसीत्। केचिच्च विद्वांसः स्वयमेव मूलग्रन्थं निर्माय टीकाग्रन्थमपि प्रणिन्युः। पूर्वोक्त्या युक्त्या वेदानामीश्वरप्रणीतत्वादेव प्रामाण्यमिति तु स्पष्टमेव। अतः स्पष्टीभवति यन्न्यायसूत्रकारो गोतमोऽवश्यमेव परमेश्वरमङ्गीकरोति। यद्यपि न हि गोतमोऽधिकमीश्वरविषये विवेचनं करोति तत्र गोतमानुसारमीश्वरः कीदृशोऽङ्गीक्रियते? तदैतदेव वक्तुं शक्यते यद्गोतमेन परमेश्वरः वेदानां प्रणेता, जीवकर्मफलप्रदाता च स्वीक्रियते। ईश्वरस्य जीवकर्मफलप्रदातृत्वे स्वीकृते सर्वज्ञत्वमप्यस्य स्वीकार्यं भविष्यति जीवानां जीवकृतकर्मणाञ्चानन्त्यात् तेषां परिज्ञानाय। परिज्ञानं विना च नह्यस्य जीवकृतकर्मफलप्रदातृत्वं घटते। एवंविधयाऽयमीश्वरो जीवकर्मणां नियन्तेति सिद्ध्यति। एकश्चायम्। अन्ये के के गुणाः परमेश्वरे गोतमेनाङ्गीक्रियन्ते इति निर्णेतुं शक्यते। अर्वाचीनाः नैयायिकाः यथेश्वरस्य क्षित्यादिकर्तृत्वं स्वीकुर्वन्ति तथाऽयं स्वीकरोति न वा स्वीकरोति स्पष्टं नास्तीदम्। खद्योते लिखितं विद्यते-

**"तथा चेश्वरः केवलं नियन्तैवेति न्यायमतं प्रतिभाति, भाष्यकारोऽप्यग्रे ईश्वरो द्रष्टा बोद्धा सर्वज्ञातेत्येवोक्तवान् न पुनः कर्ता स्रष्टेति"[10]।**

**वात्स्यायनानुसारमीश्वरः**

भाष्यकारो वात्स्यायनः स्वरूपमीश्वरस्य स्वल्पेनेव निर्वचनेन स्पष्टयति। तत्र च **"गुणविशिष्टमात्मान्तरमीश्वरः"[11]** इति कृत्वेश्वरस्य लक्षणं निरुच्यते। गुणपदेन च सर्वज्ञत्वादिकमुपादीयते। अयमात्मकल्पः आत्मसमानजातीयः सर्वज्ञत्वादिभिः गुणैर्विभूषितः। इत्येवं परमेश्वरस्य लक्षणमभिधायाग्रे तस्य स्वरूपं निरूप्यते। सोऽयमीश्वरोऽधर्ममिथ्याज्ञान-प्रमादरहितः स्वीक्रियतेऽन्यथा जीवैरीश्वरस्य सामान्यं स्यात्, जीवकोटावेवायमप्यागच्छेत्। अधर्ममिथ्याज्ञान-प्रमादसहितः सन् तत्फलभूतेन सुखदुःखादिनाऽवश्यमेव लिप्येत। ईश्वरत्वञ्च व्याहन्येत। अतोऽधर्ममिथ्याज्ञान-प्रमादराहित्यमीश्वरेऽङ्गीक्रियते। अत्र ईश्वरस्याधर्ममिथ्या-ज्ञानप्रमादराहित्येऽनुमानमपि प्रमाणं तथाहि लौकिकोऽनुभवः कारणस्य सत्त्वे कार्यस्योत्पाद आवश्यकः। अधर्म-मिथ्याज्ञान-प्रमादानां सुखदुःखादि-कारणानां सत्त्वे सुखदुःखाद्युत्पाद आवश्यकः। सुखदुःखाद्युपलब्धिर्न भवतीत्यतो ज्ञायते यत् कारणस्यापि अधर्ममिथ्याज्ञानादेः सत्त्वं नास्ति। एवं कार्याभावेन सुखादुःखाद्यभावेन कारणाभावोऽधर्ममिथ्या-ज्ञानप्रमादाद्यभावोऽनुमीयते।

---

[10] न्या. भा. खद्योत व्याख्या, पृ. ६८०

[11] गुणविशिष्टमात्मान्तरमीश्वरः। तस्यात्मकल्पात् कल्पान्तरानुपपत्तिः। अधर्ममिथ्याज्ञानप्रमादहान्या धर्मज्ञानसमाधिसम्पदा च विशिष्टमात्मान्तरमीश्वरः। तस्य च धर्मसमाधिफलमष्टविधैश्वर्यम्। सङ्कल्पानुविधायी चास्य धर्मः। प्रत्यात्मवृत्तीन् धर्माधर्मसञ्चयान् पृथिव्यादीनि च भूतानि प्रवर्तयति, एकञ्च स्वकृताभ्यागमस्यालोपेन निर्माणप्राकाम्यमीश्वरस्य स्वकृतकर्मफलं वेदितव्यम्। आप्तकल्पश्चायं यथा पिताऽपत्यानां तथा पितृभूत ईश्वरो भूतानाम्, न वात्मकल्पादन्यः कल्पः सम्भवति न तावदस्य बुद्धिं विना कश्चिद्धर्मो लिङ्गभूतः शक्य उपपादयितुम्। आगमाच्च खलु द्रष्टा, बोद्धा सर्वज्ञाता इति। न्या. भा. ४-१-२१

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

धर्मज्ञानसमाधिसम्पदा विशिष्टः इति वात्स्यायनमतम्। धर्मज्ञानसमाधिसम्पद्वैशिष्ट्यञ्चाणिमागरिमाद्यष्टविधैश्वर्यसम्पादकम्। एवं प्रतिभाति यद्वात्स्यायन ईश्वरत्वं जन्यमेव मनुते। अयमीश्वरः आगमात् द्रष्टा, बोद्धा, सर्वज्ञातेत्युच्यते, अपत्यानां पितेव जीवानां पितृभूतः परमेश्वरः आप्तकल्पः। कृपया जीवाननुगृह्णन् वेदानुपदिशति। पितृवत् प्रमाणभूतः न हि पिता पुत्रमसन्मार्गे प्रवर्तयितुमुपदिशति किन्तु सन्मार्गे प्रवर्तयितुमेव उपदिशति। वात्स्यायनानुसारमीश्वर एवंविधः आत्मसाधकैः बुद्ध्यादिभिश्चावश्यमेव युक्तः आत्मलिङ्गैः आत्मसाधकैः बुद्धीच्छादिभिरविशिष्ट ईश्वरस्तु न हि केनचिदपि प्रत्यक्षतोऽनुमानेनागमेन वाऽतीतमज्ञेयं शक्यत उपपादयितुं- **"बुद्ध्यादिभिश्चात्मलिङ्गैर्निरुपाख्यमीश्वरं प्रत्यक्षानुमानागमविषयातीतं कः शक्यत उपपायितुम्"**[12]।

**वात्स्यायनाभिमतेश्वरस्वरूपविषये परवर्तिनैयायिकानां विप्रतिपत्तयः, तेषां दृष्ट्येश्वरस्वरूपम्**

अत्र वास्त्स्यायनाभिमते परमेश्वरस्वरूपे वात्स्यायनादर्वाचीनानां नैयायिकानां नैकाः विप्रतिपत्तयोऽजायन्त। वात्स्यायनो यादृशमीश्वरस्य स्वरूपं निर्वक्ति तत्र मन्ये किञ्चित् पूर्वाग्रहयुक्तेन मनसा निर्वक्ति। यथा धर्मज्ञानसमाधिविशिष्टत्वमीश्वरस्य वात्स्यायनः स्वीकरोति, अधर्ममिथ्याज्ञानप्रमादराहित्यञ्च स्वीकरोति। एवमेवास्य परमेश्वरस्यैश्वर्यं धर्मसमाधिजन्यमित्यङ्गीकरोति। धर्मस्य फलभूतमणि-माद्यष्टविधमैश्वर्यं जगन्निर्माणकारणम्। एतत्सर्वं पूर्वाग्रहगृहीतेन मनसा विलिख्यते वात्स्यायनेन। अतः परवर्तिभिः नैयायिकैरुद्योतकरवाचस्पतिमिश्रप्रभृतिभिरत्र मतभेदः प्रदर्श्यते। उद्योतकरः पृच्छति यदस्य परमेश्वरस्यैश्वर्यं नित्यं वाऽनित्यं वा? यद्यस्यैश्वर्यमनित्यमिति पक्षस्तदाऽनित्यस्यैश्वर्यस्य कारणं किञ्चित् प्रतिवक्तव्यम्। यस्यैश्वर्यमनित्यं तस्य कारणभेदो भवति, एवं सत्यन्येषामपि तादृशमैश्वर्यं प्रसक्तं भवति। सति चैवमीश्वरस्यानेकत्वं प्रतिपादितं- **"तदीश्वरस्यैश्वर्यं किं तन्नित्यमनित्यमिति? यद्यनित्यं तस्य कारणं वाच्यं यस्य चानित्यमैश्वर्यं तस्य कारणभेदो भवत्यणिमादेः, एवमन्येषामपीत्यनेनानीश्वरः प्रसज्यत इति"**[13]।

यदि च परमेश्वरस्यैश्वर्यं नित्यमिति पक्षस्तदा धर्मवैयर्थ्यमवश्यं स्यात्, धर्मवैयर्थ्यस्वीकारे च न्यायभाष्यकृतां "तस्य च धर्मसमाधिफलमणिमाद्यष्टविधैश्वर्यम्" इति वचनमसङ्गतं भवति। अतस्तात्पर्यटीकाकृतो वाचस्पतिमिश्राः भाष्यवचनमेतत् स्पष्टत एवायुक्तमित्युद्घोषयन्ति यत्- **"तत ईश्वरस्यैश्वर्यं स्वकृतकर्मफलं वेदितव्यमित्युक्तं भाष्यमिति भावः"**[14]।

वस्तुतो यथेश्वरेऽधर्मराहित्यमङ्गीक्रियते तथैव धर्मराहित्यमप्यङ्गीकर्तव्यम्। यतो ह्यधर्मस्य फलमस्ति दुःखं, धर्मस्य च सुखं -

**"सुखं तु जगतामेव काम्यं धर्मेण जायते।**
**अधर्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसाम्॥"**[15]

ईश्वरे दुःखाभावात् कार्यस्याभावात् कारणाभावोऽ धर्मराहित्यमनुमीयते, सिद्ध्यतीश्वरे अधर्मस्याभावः। तथैव धर्मस्य फलमस्ति सुखं, परमेश्वरे सुखाभावात् धर्मराहित्यमपीश्वरे पूर्वया युक्त्यैव सिद्ध्यति। अत उद्योतकरेण प्रतिपादितं यत्- **"न चेश्वरे धर्मोऽस्तीत्यचोद्यमेतत्"**[16]।

---

[12] न्या.भा. ४-१-२१

[13] न्या.वा. ता. टी. (न्या. द.), पृ. ९५०

[14] न्या.वा.ता.टी., पृ. ९५०

[15] कारिकावली १४५ का.

[16] न्या. वा., पृ. १५०

उद्योतकरानुसारमयमीश्वरोऽशरीरी। एतच्चैवं समुपस्थाप्यते अस्तु नामायं शरीरी किन्तु प्रश्नोऽयं सञ्जायते शरीरमस्य नित्यं वाऽनित्यं वेति? यदि अनित्यमीश्वरस्य शरीरमिति पक्षस्तदाऽनित्यस्य शरीरस्यादृष्टजन्यत्वात् शरीरकारणीभूतयोः धर्माधर्मयोरपि सत्त्वमङ्गीकर्तव्यं भविष्यति। ईश्वरीयशरीरस्यापि धर्माधर्मात्मकादृष्ट-जन्यतया शरीरस्य धर्माधर्मात्मकादृष्टतन्त्रत्वात् परमेश्वरस्याप्यदृष्टवशीभूतत्वं स्वीकार्यम्। ईश्वरस्य चादृष्टवशीभूतत्वं कुतोऽयमीश्वरः स्यात्? अनीश्वरत्वमस्य प्रसक्तं भवति। यदि च नित्यमीश्वरस्य शरीरमिति पक्षस्तदा शरीरस्यानित्यस्यैव दर्शनात् दृष्टविपरीतं नित्यं शरीरं कल्पितं भवति। ईश्वरस्य बुद्धिमत्त्वप्रतिपादनायेश्वरस्य नित्यशरीरं दृष्टविपरीतं स्वीकरणीयं भवति तदपेक्षया नित्या बुद्धिरेव परमेश्वरे स्वीकरणीयेति सिद्धान्तिनाम्।

एवमीश्वरस्य द्रव्यत्वात् संख्यापरिमाणपृथक्त्व-संयोगविभागानां सामान्यगुणानां सत्त्वं नित्यायाः बुद्धेश्च सत्त्वं परमेश्वरे विद्यत इति सिद्धान्तयति न्यायवार्तिककारः। बुद्धेर्नित्यत्वे च किमस्ति प्रमाणम्? यतो हि लोके बुद्धेरनित्यत्वमेव श्रूयते। तत्रोहां कुर्वन्नुद्योतकर उपस्थापयति यदस्येश्वरस्य बुद्धियोग आवश्यकः कर्तृत्वात्। सा च बुद्धिर्यद्यनित्या स्यात्तदा प्रत्यर्थनियताः बुद्धिभेदाः, शरीरादिकारणसन्निधाने सत्येव तस्याः उत्पादो युज्यते, बुद्धेः प्रत्यर्थनियतायाः शरीरादिकारणासन्नि-धानेऽनुत्पादात्। इयं परमेश्वरबुद्धिस्तु न प्रत्यर्थनियता युगपदेवानेककार्यसम्पादनशीलत्वात् तथाहि लोकेऽनेकस्य स्थावरभेदस्य युगपदुत्पादो दृश्यते। सोऽयमनेकः स्थावरभेदः परमेश्वरबुद्धिजन्यः। अतः परमेश्वरीयबुद्धेर्न प्रत्यर्थनियतत्वं सम्भावनीयम्। प्रत्यर्थनियमस्यासम्भवाच्चास्य बुद्धेर्नित्यत्वं स्वीकार्यम् ऐक्यञ्च। इयमीश्वरीया बुद्धिर्नित्या एका च सर्वार्थविषयिणी अतीतानागतवर्तमानविषया प्रत्यक्षात्मिका- **"सा च बुद्धिः सर्वार्थाऽतीतानागतवर्तमानविषया प्रत्यक्षा"**[17]**।** ज्ञानस्य च नित्यत्वान्नेश्वरे संस्कारस्य सत्त्वमङ्गीक्रियते। एवमीश्वरे पञ्च सामान्यगुणाः बुद्धिश्चैते षड्गुणा अवतिष्ठन्त इति सिद्धान्तयत्युद्योतकरः - **"तत्र हि नित्या बुद्धिः संख्यादयश्च सामान्यगुणाः षड्गुणा आकाशवदीश्वरे इति।"**[18]

अग्रे च स्पष्टमेवोद्घोषयति यदीश्वरे एते षडेव गुणा अवतिष्ठन्त इति। परन्तु वस्तुतः ईश्वरे न हि केवलं षण्णां गुणानां सत्त्वमुद्योतकरोऽङ्गीकरोति। यतो हीश्वरस्य कर्तृत्वं स्वीक्रियते वार्तिककृता। कर्तृत्वं चेश्वरस्य सम्पादयितुमीश्वरे बुद्धियोगमिव इच्छायोगः कृतियोगश्च स्वीकरणीयः। खद्योतेऽप्येतदेव प्रतिपाद्यते। यदस्य यथा बुद्धियोगोऽभ्युपेयते तथैव कृतियोगः इच्छायोगश्चाङ्गीकर्तव्यौ। तावपि कर्तृत्वसाधना-न्तर्भूतौ ज्ञानचिकीर्षाप्रयत्नसमवाय-लक्षणत्वात् कर्तृत्वस्य- **"ते च गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धय एवेति वार्तिकम्। तत्र तात्पर्यम्- बुद्धिवदिच्छाप्रयत्नावप्यस्य नित्यौ तत्कर्तृत्वसाधनान्तर्गतौ मन्तव्यौ। ज्ञानचिकीर्षाप्रयत्नसमवायलक्षणत्वात् कर्तृत्वस्य।"**[19] अन्यथा भगवतः कर्तृत्वं स्वीकुर्वतापि न्यायवार्तिककृता कथङ्कारमीश्वरे षडेव गुणा आकाशवदित्युद्घोषयितुं शक्यते। यद्यपि केवलया ज्ञानशक्त्याऽपि कर्तृत्वं शक्यमङ्गीकर्तुं यथा च श्रीधरभट्टः न्यायकन्दल्यामङ्गीकरोति। तथाप्युद्योतकरमते कृतीच्छायोग ईश्वरे स्वीक्रियते।

---

[17] न्या. वा., पृ. ९५२

[18] न्या. वा., पृ. ९५१

[19] खद्योत, पृ. ६८३

उद्योतकरेण परमेश्वरेऽन्येषां जीवात्मगुणानां सत्त्वं निराकुर्वता इच्छायाः सत्त्वं स्वीक्रियते।

तात्पर्यटीकाकृतां वाचस्पतिमिश्राणां तात्पर्यपरि-शुद्धिकृतामुदयनाचार्याणामप्यस्मिन्नेव परमेश्वरस्वरूपे सम्प्रतिपत्तिः। नास्मिन्नीश्वरस्वरूपे काचिद्विप्रतिपत्तिरेभिः समुपस्थाप्यते। न्यायमञ्जरीकृतां जयन्तभट्टानामप्यत्रैव सम्मतिः। नव्यनैयायिकेष्वप्रतिमो रघुनाथशिरोमणिः परमेश्वरस्यास्मिन्निर्वचने किञ्चित् परिष्करणं विद्यते। पश्यामस्तदीयं मतम्।

**दीधितिकृदभिमतमीश्वरस्वरूपम्**

सर्वमुपरि परमेश्वरविषये प्रतिपादितं तत्र दीधितिकृतामनेकाः विप्रतिपत्तयो विद्यन्ते। पूर्वोक्तेषु प्रतिपादितेषु परमेश्वरधर्मेषु कश्चिद्धर्मो नाङ्गीक्रियते किञ्चिच्चाधिकमपि स्वीक्रियते। तदेवानुपदमत्र प्रदर्श्यते।

दीधितिकारो दिक्कालयोः सत्तां न हीश्वरादतिरिक्तां मनुते। ईश्वरातिरिक्तस्य कालस्य, ईश्वरातिरिक्तायाः दिशश्चास्वीकारेऽपि न हि काचिदुपपत्तिर्दिग्व्यवहारस्य कालव्यवहारस्य च। तत्तन्निमित्तविशेषसमवधानवशाद् ईश्वरादेव तत्तद्व्यवहाराणामुपपत्तिः सम्भवति- **“दिक्कालौ नेश्वरादतिरिच्येते मानाभावात्। तत्तन्निमित्तविशेष-समवधानवशादीश्वरादेव तत्तत्कार्यविशेषाणामुपपत्तेः। परेषामेकैकस्माद्दिगादेरिव विलक्षणानां प्राच्यादि-व्यवहाराणाम्।”**[20] यथा दिशः एकत्वेऽपि प्राची, प्रतीची, अवाची, उदीची इत्यादयोः विलक्षणा व्यवहारा उपाधिभेदेन सञ्जायन्ते। एवमेव कालस्यैकत्वेऽपि स्वजन्यविभागप्रागभावावच्छिन्नकर्मात्मकेन, पूर्वसंयो-गावच्छिन्नविभागात्मकेन, पूर्वसंयोगनाशावच्छिन्नविभागा-त्मकेन, पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावा-त्मकेन, उत्तरसंयोगावच्छिन्नकर्मात्मकेन वा उपाधिना क्षणव्यवहारो भवति। अन्यान्योपाधिभेदेन च दिन-पक्ष-प्रहर-मासादिव्यवहारो भवति। तथैव कालदिशोरीश्व-रात्मकत्वेऽपि व्यवहारा एते सम्भवन्ति। परापरत्वबुद्धिकारणत्वेन कालस्य, दूरान्तिकादिबुद्धि-कारणत्वेन च दिशः स्वीकरणस्य नास्ति काचिदावश्यकता परापरत्वबुद्धेः दूरान्तिकादिबुद्धेश्च परमेश्वरात्मककाल-दिशोरेव सम्भवात्। अतः कालदिशोरीश्वरभिन्नत्वं नाङ्गीकरणीयम्।

एवमेव रघुनाथशिरोमणिराकाशस्यापि ईश्वरात्मकत्वमङ्गीकरोति। रघुनाथस्य कथनमस्ति यन्निमित्तकारणत्वेन स्वीकृतस्येश्वरस्य शब्दसमवायि-करणत्वं स्वीकरणीयं- **“शब्दनिमित्तकारणत्वेन क्लृप्तस्येश्वरस्यैव शब्दसमवायिकारणत्वम्”**[21]**।** अयमाशयो दीधितिकृताम् - यत् शब्दं प्रति परमेश्वरस्य निमित्तकारणत्वं स्वीक्रियत एव नैयायिकेन, तस्यैव परमेश्वरस्य शब्दसमवायिकारणत्वमपि स्वीकरणीयम्। शब्दस्यापि भावकार्यत्वं विद्यते। शब्दं प्रति च यदि जीवात्मनः समवायिकारणत्वं स्वीक्रियते तदा जीवात्मनामानन्त्यात् कस्य जीवात्मनः शब्दसमवायिकारणत्वं स्वीकरणीयम्? अत ईश्वरस्यैव शब्दसमवायिकारणत्वम्- **“अस्मदादेश्च शब्दसमवायिकारणत्वे अहं सुखादिमानितिवदहं शब्दवानिति प्रतीत्यापत्तेः”**[22]**।** अन्याः युक्तयोऽपि विद्यन्ते परमेश्वरस्य शब्दसमवायिकारणत्वस्वीकारे-प्रथमेयं युक्तिरस्ति यत् परमेश्वरस्य शब्दं प्रति निमित्तकारणताऽस्ति, यदि परमेश्वरस्य शब्दं प्रति समवायिकारणत्वं

[20] प. त. नि., पृ. ३

[21] प. त. नि., पृ. ५

[22] तदेव

स्वीक्रियते तदा केवलं परमेश्वरस्य शब्दसमवायित्वमात्रं कल्पनीयं भवति, जीवात्मनः शब्दसमवायिकारणत्वे कल्पनीये जीवात्मनां शब्दं प्रति निमित्तकारणताऽपि नास्ति, अतः कारणत्वं शब्दसमवायित्वमुभयमपि कल्पनीयं भवति। अतः परमेश्वरस्य शब्दसमवायिकारणत्वे स्वीक्रियमाणे लाघवम्। यदि च "शब्दः जीवात्मजन्यः तदीयादृष्टजन्यत्वात् सुखादिवत्" तथाहि सुखं जीवात्मजन्यं भवति जीवात्मीयादृष्टजन्यमपि भवति इति अनुमानेन आत्मनां शब्दकारणत्वं संसाध्यते, तर्हि नैतच्छक्यं - यतोहि अदृष्टस्य शब्दजनकत्वेऽपि अदृष्टाश्रयस्य शब्दजनकत्वे नास्ति किञ्चित् प्रमाणम्, नास्ति कश्चिदनुकूलस्तर्कोऽत्र यत् यददृष्टजन्यं भवति तत् तददृष्टाश्रयजन्यमपि भवति। अतः जीवात्मनां शब्दसमवायिकारणत्वस्वीकारे शब्दसमवायित्वं शब्दकारणत्वमुभयमपि कल्पनीयं भवति। द्वितीया युक्तिरस्ति-यदि जीवात्मनां शब्दसमवायिकारणत्वं स्वीक्रियते तदा यथाऽहं सुखादिमान् इति मानसं प्रत्यक्षं भवति तथैवाहं शब्दवान् इत्यपि मानसप्रत्यक्षं भवेत्। न भवति "अहं शब्दवान्" इत्याकारकः मानसिकः साक्षात्कारः। अतोऽवगम्यते यन्नास्ति शब्दस्यात्मविशेषगुणत्वं, सति चैवं न हि जीवात्मनां शब्दसमवायिकारणत्वं कल्पयितुं शक्यते। अतः शब्दसमवायिकारणत्वं परमेश्वरस्यैवाङ्गीकर्तव्यम्। रीत्या चानया श्रोत्रमपि कर्णशष्कुल्यवच्छिन ईश्वर एव- **"श्रोत्रमपि कर्णशष्कुल्यवच्छिन्न ईश्वर एव। यथा परेषां तथाविधमाकाशम्"[23]।** यथा चान्ये नैयायिकाः कर्णशष्कुल्यवच्छिन्नमाकाशपदार्थं श्रोत्रं मन्यन्ते तथैव रघुनाथः परमेश्वरं कर्णशष्कुल्यवच्छिन्नं श्रोत्रमिति मनुते। अनेन प्रकारेण दीधितिकारः ईश्वरस्यैव दिक्कालाकाशात्मकत्वं स्वीकरोति।

**ईश्वरस्य सत्त्वे किं प्रमाणम्?**

प्रश्नेऽस्मिन् बहून्युत्तराणि प्रस्तूयन्ते दार्शनिकैः। अन्यैः कैश्चित् प्रतिपाद्यते यत् शास्त्रस्यैव प्रामाण्यमस्ति परमेश्वरास्तित्वसमर्थनाय। अत्र न्यायदर्शने नवीनानां सरणिमुपस्थापयति अनुमानस्य च परमेश्वरास्तित्वे प्रमाणतयोल्लेख कृतः। तत्रेश्वरसाधकान्यनेकानि अनुमानानि प्रस्तूयन्ते। गौतमेन न्यायसूत्रे उक्तम्- **"ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्"[24]** इति सूत्रेणेश्वरसाधकमनुमानमेव प्रदर्श्यते। भाष्यकारो वात्स्यायनश्च- **"पुरुषोऽयं समीहमानो नावश्यं समीहाफलं प्राप्नोति तेनानुमीयते पराधीनं पुरुषस्य कर्मफलाराधनमिति यदधीनं स ईश्वरः"[25]।**

न्यायवार्तिककार उद्योतकर ईश्वरसाधनाय स्पष्टतोऽनेकान्यनुमानानि प्रस्तौति-

प्रधानपरमाण्वदृष्टानि प्राक् प्रवृत्तेः बुद्धिमत्कारणाधिष्ठितानि प्रवर्तन्तेऽचेतनत्वात् वास्यादिवत्। यथा अचेतनम् वास्यादि बुद्धिमता तक्ष्णाऽधिष्ठितमेव प्रवर्ततेऽचेतनत्वात् स्वयमेव न तस्य प्रवृत्तिर्भवति। अचेतनस्य प्रधानस्य (सांख्यदर्शनाभिमतायाः प्रकृतेः), परमाणूनाम्, अदृष्टस्य च प्रवृत्तिर्न चेतनमधिष्ठातारं विना सम्भवति, अतः केनचिदधिष्ठात्रा भाव्यं, यश्चाधिष्ठाता स एवेश्वरः। रीत्या चानया प्रधानपरमाण्वदृष्टानामधिष्ठायकतया ईश्वरसिद्धिर्भवति। यदि चाधिष्ठातारं विना प्रधानपरमाण्वदृष्टानां प्रवृत्तिर्भवतीति स्वीक्रियते तदा सततमेव प्रवृत्तैरेभिर्भाव्यम्- **"परमाणवः प्रवर्तन्त इति सततं प्रवृत्त्या भवितव्यम्।"[26]** न हि सततं प्रवर्तन्ते प्रधानपरमाण्वदृष्टानि। अतोऽवश्यं चेतनेन केनचिदधिष्ठायकेन भवितव्यम्। अत्रायमाशय उद्योतकरस्य यत् यद्यचेतनं

---

[23] तदेव

[24] न्या. सू. ४-१-१९

[25] न्या. सू. ४-१-१९ भाष्ये

[26] न्या. वा. , पृ. १४५

चेतनानधिष्ठितं प्रवर्तते चेत् तदा कदाचित् प्रवृत्तिः कदाचिच्च निवृत्तिर्नैव सम्भवति भवति च कदाचित् प्रधानपरमाण्वदृष्टानां प्रवृत्तिः कदाचिच्च निवृत्तिः।

न्यायवार्तिकस्य तात्पर्यटीकाकारो वाचस्पतिमिश्रः अपि अत्रानुमानमेकं प्रस्तौति। यद्विवादाध्यासिताः तनुतरुमहीधरादयः उपादानाभिज्ञचेतनकर्तृकाः उत्पत्तिमत्वात्, अचेतनोपादानत्वाद्वा। यदुत्पत्तिमदचेतनोपादानं वा भवति तत्सर्वमुपादानाभिज्ञपूर्वकं भवति यथा प्रासादादि। तथा च विवादाध्यासिताः तनुतरुमहीधराद्योऽपि विद्यन्तेऽर्थात् उत्पत्तिमन्तः अचेतनोपादानवन्तश्च विद्यन्ते। अत एतेषामपि उपादानाभिज्ञपूर्वकत्वं सिद्धं भवति। अत्र वाचस्पतिमिश्रः स्पष्टयति यल्लोके त्रिविधाः भावाः भवन्ति केचन प्रसिद्धचेतनकर्तृकाः यथा प्रासाद-अट्टालिका-गोपुर-तोरणादयः। केचन च प्रसिद्धतद्विपर्ययाः यथा परमाण्वाकाशादयः केचन च संदिग्धचेतनकर्तृकाः यथा तनुतरुमहीधरादयः। तेषु संदिग्धचेतनकर्तृकेषु तनुतरुमहीधरेषु चेतनकर्तृकत्वं साध्यते। एतेषां चेतनकर्तृकत्वे सिद्धे सति यच्चेतनकर्तृकत्वं तनुतरुमहीधरादीनां स चेतन एवेश्वर इति भवतीश्वरसिद्धिः। इदमेवानुमानं नैयायिकैरर्वाचीनैः क्षित्यादिकं सकर्तृकं कार्यत्वादित्यादिविधया प्रस्तूयते।

उदयनाचार्यो न्यायकुसुमाञ्जलौ परमेश्वरसाधका-न्यनेकान्यनुमानानि प्रस्तौति। ग्रन्थोऽयं परमेश्वरसिद्धौ प्रमाणानामेवोपस्थापकः। अत्र प्रथमे स्तबकेऽदृष्टं साधयित्वा तदधिष्ठातृतया परमेश्वरस्य साधनं क्रियते। अनुमानमिदं न्यायवार्तिकेऽपि प्रदत्तमस्ति। अयमत्र विस्तरतः साधयति यत् परलोकार्थिनां यागादौ प्रवृत्तिर्भवति, सेयं प्रवृत्तिर्नैव व्यर्था भवितुमर्हति, नैव च दुःखमात्रफला भवितुं शक्नोति, तस्याः यागादौ प्रवृत्तेश्च न हि किञ्चिद्दृष्टं फलं प्रतीयते। यदि वदेद्भवान् यदयं विप्रलम्भ एव लोकानां तर्हि नैतदपि शक्यं यतोहि को नाम एवं लोकोत्तरो यः केवलं परप्रतारणार्थमेव नानाविधक्लेशहेतुभूतैः कर्मभिरात्मानमवसादयेत्। अतो यागादौ परलोकार्थिनां प्रवृत्तेः साफल्यमावश्यकम्। यागादौ प्रवृत्तेः साफल्यस्वीकारे न हि त्वरितमेव फलप्रदायकत्वमङ्गीकर्तुं शक्यते। पूर्वमेव ध्वस्तञ्च कर्म कर्मातिशयं विना न हि फलप्रदानसामर्थ्यं धारयति। अतः कश्चिद्व्यापारोऽवश्यमभ्युपेयः स च व्यापार एवापूर्वपदेन अदृष्टपदेन वोद्युष्यते। तदधिष्ठातृतया चेश्वरसिद्धिर्भवति। तत्र अयं क्रमः धर्माधर्मात्मकालौकिकपरलोकसाधने यो विप्रतिपन्नस्तं प्रति प्रथमं धर्माधर्मात्मकालौकिक-परलोकसाधनस्य साधनम्। सिद्धे चादृष्टे (धर्माधर्मात्मके) अचेतनस्य कारणस्य चेतनाधिष्ठानेनैव कार्यजनकत्वात्तदधिष्ठायकतयेश्वरसिद्धिः।

तत्साधकप्रमाणाभावादिति विप्रतिपत्तिं समादधानः श्रीमदुदयनाचार्योऽष्टौ हेतूननुमानाय प्रदर्शयति। ते च हेतव सन्ति-

**"कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः।**
**वाक्यात्संख्याविशेषाच्च साध्यो**
**विश्वविदव्ययः॥"**[27]

यथा- कार्यत्वम्, आयोजनं, धृत्यादिः, पदं, प्रत्ययः, श्रुतिः, वाक्यं, संख्याविशेषश्च। एतैरष्टभिर्हेतुभिः परमेश्वरः साध्यते। एतैः हेतुभिः अनुमानानि चैवं सिद्ध्यन्ति।

१. क्षित्यादिकं सकर्तृकं कार्यत्वात् घटवत्। अनुमानमिदं क्षित्यादेः सकर्तृकत्वं साधयति सः कर्ता एवेश्वरः। उपादानगोचरापरोक्षज्ञानचिकीर्षा-कृतिमत्त्वमेव कर्तृत्वम्। अस्मदादीनाञ्चैतादृशं कर्तृत्वं नैव सम्भवति। अतोऽवगम्यते यत् क्षित्यादेः

[27] न्या. कु. प्र. स्त. का.

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

कर्ताऽस्मदादिभिर्विलक्षणः स एव चेश्वरः इति भवतीश्वरसिद्धिः।

**२.** सर्गाद्यकालीनद्व्यणुकारम्भकपरमाणुद्वय-संयोगजनकं कर्म चेतनप्रयत्नपूर्वकं कर्मत्वादस्मदादिशरीरक्रियावत्। आयोजनपदार्थश्च कर्मैव। एतादृशेनानुमानेन द्व्यणुकारम्भकपरमाणु-द्वयसंयोगजनकस्य कर्मणः चेतनप्रयत्नपूर्वकत्वे सिद्धे यत्प्रयत्नपूर्वकं तत्कर्म स एवेश्वर इतीश्वरसिद्धिर्भवति।

**३.** धृत्यादिरित्यत्रादिपदेन विनाशो बोध्यते। तथा चात्रानुमानद्वयं बोध्यते तथाहि ब्रह्माण्डादि पतनप्रतिबन्धकीभूतप्रयत्नवद्धिष्ठितं धृतिमत्त्वात् वियति विहङ्गमधृतकाष्ठवत्। ब्रह्माण्डस्य धृतिः सिद्धैव। धृतिपदार्थश्च गुरुत्ववतां पतनाभावः। विनाशहेतुकञ्चानुमानमिदम्-ब्रह्माण्डादि प्रयत्नवद्विनाश्यं विनाशित्वात् पाट्यमानपटवत्। अत्र यत्प्रयत्नवदधिष्ठितं ब्रह्माण्डादि, यत्प्रयत्नवद्विनाश्यञ्च स एवेश्वरः इति भवतीश्वरसिद्धिः।

**४.** पदं नाम व्यवहारः। तथाहि पटादिसम्प्रदायव्यवहारः स्वतन्त्रपुरुषप्रयोज्यः व्यवहारत्वात् आधुनिकलिप्यादिव्यवहारवत्। सर्गादौ च पटादिसम्प्रदायप्रवर्तकत्वं न हि जीवात्मनां सम्भवति तदानीं जीवात्मनां शरीराद्यभावात्। स च पटादिसम्प्रदायव्यवहारप्रवर्तकः स्वतन्त्रः पुरुषः परमेश्वरः इति परमेश्वरसिद्धिः।

**५.** प्रत्ययपदार्थः प्रामाण्यम्। प्रामाण्यञ्च कारणगुणाधीनं भवति, अप्रामाण्यञ्च कारणदोषाधीनं भवति। वेदानामपि प्रामाण्यं कारणगुणजन्यं भविष्यति। शब्दजनितप्रमात्मकज्ञानस्य कारणीभूतो गुणोऽस्ति वक्तरि पुरुषे विद्यमानं वाक्यार्थविषयकं यथार्थज्ञानम्। अनयैव रीत्या लोके शब्दस्य प्रामाण्यं दृश्यते। वेदात्मकानां शब्दानामपि प्रामाण्यस्यैषैव रीतिरादर्त्तव्या यतो हि यावदयं विश्वासो न भवति यद्वेदवक्तुः वेदार्थस्य यथार्थं ज्ञानमस्ति तावत् वेदानां प्रामाण्यस्य सम्भावनाऽपि नास्ति। तथा च वेदजन्यज्ञानं कारणगुणजन्यं प्रमात्वात् प्रत्यक्षादिप्रमावत् इत्यनुमानेन वेदजन्यज्ञानेऽपि विद्यमानं प्रामाण्यं कारणगुणजन्यमित्यनुमीयते। सर्वज्ञं पुरुषं परित्यज्य न हि कस्मिंश्चित् साधारणे मनुष्ये वेदार्थविषयकज्ञानस्य विश्वासो कर्तुं शक्यते। वेदरूपशब्दप्रामाण्योपयुक्तो यथार्थज्ञानात्मको गुणो यस्मिन् पुरुषेऽस्ति स पुरुषः परमेश्वर एवेति परमेश्वरसिद्धिः।

**६.** श्रुतिर्नाम वेदः। तथा च वेदः पौरुषेयः वेदत्वात् आयुर्वेदवत् अनुमानेनानेन वेदस्य पौरुषेयत्वं साध्यते। पौरुषेयत्वञ्च पुरुषप्रणीतत्वं यत्पुरुषप्रणीतत्वं वेदानां स पुरुष एवेश्वर इतीश्वरसिद्धिः।

**७.** सर्वाण्यपि वाक्यानि पुरुषनिर्मितानि भवन्ति वेदानामपि वाक्यरूपत्वम्। अतो वेदानां पुरुषनिर्मितत्वं भाव्यम्। तथा चानुमानप्रयोगः वेदः पौरुषेयः वाक्यत्वात् भारतादिवत् इति। नह्यस्मदादीनां वेदरचयितृत्वमतो वेदानां रचयिता पुरुष एव परमेश्वर इति परमेश्वरसिद्धिः।

**८.** जन्यपरिमाणं त्रिविधं भवति परिमाणजन्यं, प्रचयजन्यं, संख्याजन्यञ्च –

**“संख्यातः परिमाणाच्च प्रचयादपि जायते।**
**अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतम्॥”**[28]

तथाहि घटादीनां परिमाणं कपालपरिमाणजन्यं भवति, तूलकादीनां परिमाणं शिथिलावयवसंयोगात्मकेन प्रचयेन जन्यते।

[28] कारिकावली का. १११

द्व्यणुकपरिमाणं प्रचयजन्यं नास्ति, परिमाणजन्यमपि नास्ति यतो हि द्व्यणुकपरिमाणं परमाणुपरिमाणजन्यमेव भवितुमर्हति। परन्तु यदि परमाणुपरिमाणजन्यं स्यात्तदा द्व्यणुकपरिमाणम् अणुतरं स्यात् परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाण-जनकत्वनियमात्। अतो द्व्यणुकपरिमाणस्य संख्याजन्यत्वं सिद्ध्यति। तथाहि अनुमानप्रयोगः- द्व्यणुकपरिमाणं संख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वात्। यन्नैवं तन्नैवमिति व्यतिरेको दृष्टान्तः। संख्याजन्यत्वे च सिद्धे संख्यायाः (द्वित्वस्य) अपेक्षाबुद्धिजन्यत्वात् यस्येयमपेक्षाबुद्धिः स एवेश्वरः इतीश्वरसिद्धिः। एतेष्वनुमानेषु प्रथमं द्वितीयं तृतीयमष्टमञ्चानुमानं जगन्निर्मातृतयैवेश्वरं साधयति। चतुर्थेन सम्प्रदायप्रवर्तकतयेश्वरः साध्यते। पञ्चमेन, षष्ठेन, सप्तमेन चानुमानेन वेदजनकत्वेनेश्वरस्य सिद्धिर्भवति। अदृष्टाधिष्ठायकतया चेश्वरसिद्धिः प्रथममेवोक्ता। मुख्यतो नैयायिकाः त्रिभिः प्रकारैरीश्वरं साधयन्ति – १. जगन्निर्मातृतया, २. अदृष्टाधिष्ठातृतया, ३. वेदप्रणेतृतया च।

एतान्येवानुमानानि परवर्तिभिः गङ्गेशादिभिः आचार्याः परिष्कृताः।

यद्यपि भगवतः सत्तायां वेदा एव परमप्रमाणभूताः- **“विश्वतश्चक्षुरुत” “विश्वस्य कर्ता भुवनस्य गोप्ता”** इत्यादिभिः श्रुतिभिरीश्वरस्य सत्ता स्पष्टतः साध्यते। परन्तु वेदानां प्रामाण्यमीश्वरप्रणीतत्वादेव, परमेश्वरासिद्धौ कुतो वेदानां प्रामाण्यं सिद्धं भवेत्। अतः प्रथमतोऽनुमानेनेश्वरः स्वीकृतो नैयायिकैः। अनन्तरञ्च श्रुतयोऽपि तस्मिन् परमेश्वरे प्रमाणीभूताः स्वीकृताः।

परमेश्वरस्य विश्वकर्तृत्वे सिद्धे सति सर्वज्ञत्वादिकमपि तस्य सिद्धो भवति उपादान-गोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वस्यैव कर्तृत्वात्। अनन्तानामुपादानानां परमाणूनां परिज्ञानाय च सर्वज्ञत्वमस्यावश्यकं भवति। ज्ञाने सत्यपि न हि चिकीर्षां विना कुलालो घटं कर्तुं शक्नोति तथैव विश्वकर्तृत्वसम्पादनाय अनन्तोपादानविषयिणी चिकीर्षाऽपि परमेश्वरेऽवश्यं स्वीकार्या तथा च सर्वविषयिणीच्छापि स्वीक्रियते। ज्ञानेच्छाभ्यां सत्त्वेऽपि न हि कृतिं विना घटोत्पत्तिः सम्भाव्यते दृष्टानुरूपञ्चात्र कल्पयितव्यम्। तथा चेश्वरे कृतिसत्त्वमावश्यकम्। अनन्तोपादानविषयकत्वाच्च कृतेरपि सर्वविषयत्वमावश्यकम्। ईश्वरस्य द्रव्यत्वाच्च संख्यादिसामान्यगुणानां पञ्चानामप्यङ्गीकारोऽस्मिन्। आत्मकल्पत्वाच्च विभुत्वं सिद्धं भवति।

वारमेकं श्रूयते यत्- श्रीउदयनाचार्यः श्रीजगन्नाथस्य आहोस्वित् श्रीबदरीनाथस्य दर्शनं कर्तुकामस्तत्रैवाऽऽश्रमं गतवान्। तत्र च मन्दिरस्यावरुद्धं द्वारं विलोक्य क्रुद्धो भूत्वा प्रोवाच -

**“ऐश्वर्यमदमत्तोऽसि मामवज्ञाय वर्तसे।**
**समागतेषु बौद्धेषु मदधीना तव स्थितिः”।।**

एतेनोदयनाचार्यकथनेन भगवन्तं परमेश्वरं श्रीबदरीनाथम्प्रति श्रीजगन्नाथम्प्रति वा श्रीउदयनाचार्यस्य परमा भक्तिर्निष्ठा वा सूचिता भवति। तादृशीं भक्तिं निष्ठां वा समाश्रित्यैव श्रीउदयनो ब्रूते यद् बौद्धेषु समागतेषु तावत्कालीना त्वदीया स्थितिरस्तित्वञ्चोभयमेव मदधीनमिति।

इदमेव च जातं, यदा सर्वमपि भारतं वर्षं बौद्धैः समाक्रान्तमभूत्, नास्तिक-बौद्धवर्गश्च तदीयधर्मश्च सर्वतोभावेन सर्वत्र भारते वर्षे प्रसृतो विस्तृतश्च जातः। एवम्भूतायां परिस्थितौ ‘समागतेषु बौद्धेषु मदधीना तव स्थितिः’ इति पूर्ववक्तृत्वकलानुसारं भगवतो जगन्नाथस्य बदरीनाथस्य वाऽस्तित्वं पुनरक्षुण्णं व्यवस्थापितवान्, संस्थापितवांश्च।

बौद्धैः सह शास्त्रीयचर्चायां जायमानायां श्रीउदयनाचार्यस्तर्कयुक्तिप्रमाणान्याश्रित्यैव

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

तांस्तान् नास्तिकप्रभृतीन् बौद्धान् बहुवारं पराजितवान्।

एवमेवाऽनेकवारं शास्त्रीयविचारचर्चावसरेषु समुपस्थितेषु बहोः कालात् प्रचलितायाम् 'ईश्वरोऽस्ति न वेति' विचारचर्चायामस्तीति विधिकोटिमभ्युपगच्छतः श्रीउदयनाचार्यस्य नास्तीति निषेधकोट्यवलम्बिभिः बौद्धैरेकदा लम्बायमानो विचारः समजीजनत्।

'अस्ति चेन्नास्तिको हतः' इत्यादि वदन्नुदयनाचार्यः-

**"नेश्वरो जन्मिनां हेतुरुत्पत्तिविकलत्वतः।**
**गगनाम्भोजवत्सर्वमन्यथया युगपद्भवेत्।।"**

**निष्कर्षः**

न्यायदर्शनाभिमतोऽयमीश्वरो जीवात्म-सजातीयः नित्यज्ञान-नित्येच्छा-नित्यकृतिविशिष्टः संख्यापरिमाण-पृथक्त्वसंयोगविभागाख्यैः पञ्चसामान्यगुणैश्च विशिष्टः। जीवात्मसजातीय-तयाऽस्य विभुत्वं स्वीक्रियते। ईश्वरस्य जीवात्मसाजात्येन परवर्तिभिर्नैयायिकैरात्मनो द्वैविध्यं प्रदर्श्यते। तस्मिन्नीश्वरे संख्या त्वेकत्वात्मिका। आत्मत्वादीश्वरस्य परिमाणं परममहदाख्यम्। पृथक्त्वमप्येकमेव। अस्य ज्ञानं नित्यमेकं प्रत्यक्षात्मकं सर्वविषयकञ्च। वस्तुतः परमेश्वरीयज्ञानं प्रत्यक्षानुमित्युपमितिशाब्देभ्यो विलक्षणमेव तथाहि प्रत्यक्षात्मकं ज्ञानमिन्द्रियार्थसन्निकर्षजन्यं भवति, अनुमित्यात्मकं ज्ञानं व्याप्तिज्ञानजन्यं भवति, उपमितिः सादृश्यज्ञानजन्या भवति, शाब्दबोधश्च पदज्ञानजन्यो भवति ईश्वरीयज्ञानस्य चाजन्यत्वादेभ्यो वैलक्षण्यम्। तस्य च नित्यत्वात् न हि केनचिदपि जन्यत्वमस्ति। परन्तु ज्ञानाकरणकत्वात्मकप्रत्यक्षसाधर्म्यादीश्वरीयज्ञानस्य लाक्षणिकः प्रत्यक्षत्वव्यवहारो भवति। प्रत्यक्षात्मकं ज्ञानं प्रति न हि कस्यचिदपि ज्ञानान्तरस्य करणता सम्भवति किन्त्विन्द्रियार्थसन्निकर्षस्य करणता भवति। तथैव परमेश्वरीये ज्ञानेऽपि ज्ञानस्य करणता न सम्भवति। एतदेव प्रत्यक्षसाधर्म्यं परमेश्वरीये ज्ञाने। ईश्वरस्य चक्षुराद्यभवात् न हि वास्तविकं प्रत्यक्षत्वं तदीयज्ञानस्य सम्भवति। अयमीश्वरोऽशरीरी, जगतः सर्जकः। जीवकृतं धर्माधर्मात्मकं कर्मायमीश्वरोऽधितिष्ठति इति शम्।

**सहायकग्रन्थसूची**


- न्यायकुसुमाञ्जलिः (हरिदासीय) कुसुमाञ्जलिपरिमलसहितः। उदयनाचार्यः, चौखम्बा विद्याभवन, वाराणसी १९७८, द्वि. सं.।
- न्यायकुसुमाञ्जलिः (गद्यपद्यात्मक) हिन्दीव्याख्यासहितः, उदयनाचार्य, सं.सं.वि.वि., वाराणसी, १९७३।
- न्यायकुसुमाञ्जलिः, गद्यपद्यात्मकः, प्रकाशबोधिनी आदि चतुष्टीकासहितः, उदयनाचार्यः, चौखम्बा सं.सी.वाराणसी, १९५७, द्वि. सं.।
- न्यायदर्शनम् (भाष्यवार्तिकतात्पर्यटीकावृत्ति-सहितम्), गोतम, कलकत्ता, १९८५
- न्यायभाष्यम् (खद्योतसहितम्) वात्स्यायनः, विद्याविलास प्रेस, वाराणसी, १९२६।
- न्यायभूषणम् (न्यायसारव्याख्यात्मकः) भासर्वज्ञः, षड्दर्शनप्रकाशन, वाराणसी, १९६८।
- न्यायसिद्धान्तमुक्तावली (दिनकरीरामरुद्रीसहिता) विश्वनाथपञ्चाननः, चौखम्बा विद्या भवन, वाराणसी, १९८२ पुनर्मुद्रिता।
- पदार्थतत्त्वनिरूपणम्, रघुनाथशिरोमणिः, कलकत्ता, १९७६। रघुदेवन्यायालङ्कारटीका-सहितम्। संस्कृतबङ्गलासंस्करणम्।
- साङ्ख्यतत्त्वकौमुदी, वाचस्पतिमिश्रः, निर्णयसागर प्रेस, मुम्बई, १९४०।

MANĪṢĀ - *A Research Journal of Sanskrit* ISSN : 2583-2271
***Sabang Sajanikanta Mahavidyalaya*** Vol. - 4, No. 1: 2024

# न्यायवैशेषिकनये बुद्धिस्वरूपविमर्शः

**गीताराणी-महार्ण्णा**

**शोधच्छात्रा, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः,**

**बी-४, कुतुबसांस्थानिकक्षेत्रम् ,नवदेहली – ११००१६**

**प्रबन्धसारः**

*इह खलु जगति धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टये मोक्षस्यैव प्राधान्यात् संसारदुःखवासनादिनिवृत्तिरूपत्वात् सांसारिकदुःखवासनानां चासह्यत्वात् न्यायदर्शनानुसारेण मोक्षप्रयोजकीभूतज्ञानानां सिद्ध्यर्थं तादृशज्ञानविज्ञेयपदार्थसमूहनिरूपणार्थं प्रेक्षावत्प्रवृत्त्यर्थं च - **"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयव-तर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रह-स्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"** इति परमकारुणिको भगवान् मुनिः अक्षपादगौतम आदावसूत्रयत्। तथा च प्रतिपादितं मणिकारेण श्रीमता गङ्गेशोपाध्यायेन तत्त्वचिन्तामणिग्रन्थस्य प्रामाण्यवादप्रकरणे- "अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेषु अभ्यर्हिततमामान्वीक्षिकी परमकारुणिको मुनिः प्रणिनाय"। तत्र आन्वीक्षिकीशास्त्रं न्यायशास्त्रम्। अनुमानञ्चान्वीक्षा, प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा। तया प्रवर्तते इयं न्यायविद्या इति आन्वीक्षिकीव्यपदेशो भवति। न्यायदर्शने द्वादशप्रमेये बुद्धिरन्यतमा। ज्ञानञ्च न्यायवैशेषिकनये बुद्धिपदेन व्यपदिश्यते। चतुर्विंशतिगुणेषु ज्ञानस्य बुद्धिपदेन व्यपदेशस्तर्कसंग्रहे स्पष्टः। न्यायशास्त्रे बुद्धिः ज्ञानस्य पर्यायवाची शब्दो भवति - "बुद्धिरुपलब्धिज्ञानमित्यनर्थान्तरम्" । प्रशस्तपादेनापि- "बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इति पर्याया" इति महर्षिगौतमवत् समुल्लिखितम्। तर्कसंग्रहकारेणान्नंभट्टेन- "सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्" इति बुद्धेर्लक्षणं न्यरूपि। अन्नंभट्टेन स्मृत्यनुभवपदाभ्यां ज्ञानद्वैविध्यं प्रदर्श्य तत्र यथार्थायथार्थभेदेन अनुभवस्य द्वैविध्यमपि प्रतिपाद्य यथार्थस्य प्रमात्वं प्रतिपादितम्। यथार्थानुभवश्च 'तद्वति तत्प्रकारकानुभवः' इति।*

**कुञ्चीशब्दाः** - निःश्रेयसं, बुद्धिः, ज्ञानम्, अविद्या, विद्या, प्रमा चेत्यादयः।

*******************************************************************************

इह खलु जगति धर्मार्थकाममोक्षाख्यपुरुषार्थ-चतुष्टये मोक्षस्यैव प्राधान्यात् संसारदुःखवासनादि-निवृत्तिरूपत्वात् सांसारिकदुःखवासनानां च असह्यत्वात् न्यायदर्शनानुसारेण मोक्षप्रयोजकी-भूतज्ञानानां सिद्ध्यर्थं तादृशज्ञानविज्ञेयपदार्थसमूह-निरूपणार्थं प्रेक्षावत्प्रवृत्त्यर्थं च **"प्रमाणप्रमेयसंशय-प्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्प-वितण्डाहेत्वाभासच्छलजातिनिग्रह-स्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"**[1] इति परमकारुणिको भगवान् मुनिः अक्षपादगौतम आदावसूत्रयत्। तथा च प्रतिपादितं मणिकारेण श्रीमता गङ्गेशोपाध्यायेन तत्त्वचिन्तामणिग्रन्थस्य प्रामाण्यवाद-प्रकरणे- "अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुर-ष्टादशविद्यास्थानेषु अभ्यर्हिततमामान्वीक्षिकी परमकारुणिको मुनिः प्रणिनाय"[2]। तत्र आन्वीक्षिकीशास्त्रं न्यायशास्त्रम्। अनुमानञ्चान्वीक्षा, प्रत्यक्षागमाभ्यामीक्षितस्य अन्वीक्षणमन्वीक्षा। तया प्रवर्तते इयं न्यायविद्या इति आन्वीक्षिकीव्यपदेशो भवति। न्यायप्रयोज्यानुमानं परार्थानुमानं न्यायशब्देनोच्यते नीयते विवक्षितार्थसिद्धिरनेनेति व्युत्पत्तेः।

न्यायदर्शने द्वादशप्रमेये बुद्धिरन्यतमा। ज्ञानञ्च न्यायवैशेषिकनये बुद्धिपदेन व्यपदिश्यते। चतुर्विंशतिगुणेषु ज्ञानस्य बुद्धिपदेन

[1] न्या.सू.-१-१-१

[2] प्रा.वा.पृ.सं.-७

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

व्यपदेशस्तर्कसंग्रहे स्पष्टः। न्यायशास्त्रे बुद्धिः ज्ञानस्य पर्यायवाची शब्दो भवति - "बुद्धिरुपलब्धिज्ञानमित्यनर्थान्तरम्"[3]। नैयायिकाः आत्मनः विशेषगुणः बुद्धिरिति वदन्ति। अत्र न्यायवैशेषिकमतं - सूत्रकारः गौतमः उपलब्धिज्ञानयोः पर्यायः बुद्धिरिति मनुते। जयन्तभट्टस्यायमभिप्रायः यत् बुद्धेः व्यवच्छेदकधर्मत्वात् बुद्धेः लक्षणमपि भवति। पर्यायेष्वपि लक्षणत्वं तिष्ठति[4]। केशवमिश्रः वदति यत् - "अर्थप्रकाशो बुद्धिः"[5]। अन्नंभट्टः कथयति यत्- "सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्"[6]।

शिवादित्यः आत्माश्रयप्रकाशकत्वेन बुद्धेर्ज्ञानं भवति इत्यवोचत्। जिनवर्धनानुसारेण अज्ञानरूपान्धकारस्य दीपतुल्यप्रकाशकस्य नाम बुद्धिरिति व्यवस्थापितम्। अनुव्यवसायगम्यज्ञानं बुद्धिरिति तर्कदीपिकाकारः। अत्र सर्वप्रथमम् इन्द्रियेण सह विषयस्य संयोगः तदनन्तरमयं घटः इत्याकारकं ज्ञानमात्मना सह सम्बद्धं भवति, तदनन्तरं घटज्ञानवानहमित्याकारकमनुव्यवसायात्मकं ज्ञानं भवति। इदमेव न्यायशास्त्रे प्रतिपादितम्- "बुद्धित्वसामान्यवती आत्माश्रयः प्रकाशो बुद्धिः। अज्ञानान्धकारतिरस्कारकारकः सकलपदार्थस्यार्थप्रका-शकः प्रदीप इव देदीप्यमानः यः प्रकाशः सा बुद्धिः जानामीत्यनुव्यवसायगम्यज्ञानत्वम्"[7]।

बुद्धेर्नामान्तरं ज्ञानमुपलब्धिरिति। ज्ञाधातोः, बुधधातोः उपपूर्वकलभ्धातोश्च समानार्थः। एतेन बुद्धेः पर्यायशब्दा यावन्तो वर्तन्ते तत्रार्थान्तरत्वं नास्तीति बोध्यम्। ज्ञानस्य पर्यायशब्दानां बहुत्वेऽपि कथं "बुद्धिरुपलब्धिर्ज्ञानमि"ति साक्षादुक्तं न त्वपरे तत्पर्यायशब्दा इति चेत् ? अत्रोच्यते बुद्धिरुपलब्धिर्ज्ञानमिति न्यायनये अभिन्नमपि सांख्यनये परस्परं भिन्नम्। सांख्यानां मते मूलप्रकृतेः प्रथमपरिणामबुद्धिश्चान्तःकरणनाम्ना सिद्धा जडरूपा। ज्ञानं बुद्धेः परिणामविशेषः। तस्माद्बुद्धेर्धर्मरूपं तत्। अतो नात्मधर्मः, आत्मनोऽपरिणामित्वात्। आत्मनोऽकर्तृत्वं नित्यत्वं स्वरूपत्वञ्च सांख्यसम्मतम्। बुद्धावात्मप्रतिविम्बितत्वाद् बुद्धिस्थज्ञानेन सहात्मनो योऽवान्तरसम्बन्धः सा एवात्मोपलब्धिरित्युच्यते।

गौतमेन चेदं सांख्यमतं "बुद्धिरुपलब्धिर्ज्ञानमित्य-नर्थान्तरमि"त्यनेन सूत्रेण खण्डितं, स्वमतमपि प्रतिष्ठापितम्। बुद्धौ ज्ञानोत्पत्तिस्वीकारे तस्याश्चेतनत्वापत्तिः। तया च प्रतिजीवदेहं बुद्ध्यात्मनोः चेतनत्वप्रसङ्गः। तथा सति बुद्धिरूपचेतनकर्तृकज्ञात-विषयमात्मा ज्ञातुं न समर्थो भवेत्। अपि चैकस्मिन् शरीरे चेतनपदार्थद्वयस्य मतभेदप्रयुक्ता बहवोऽनर्थाः स्युः। तस्मात् शरीरव्यतिरिक्त एकश्चेतनपदार्थोऽङ्गीकार्यः।

सांख्यनये बुद्धौ यज्ज्ञानं जन्यते तच्च तस्याः परिणामविशेषरूपं, न तु चैतन्यपदार्थरूपम्। चैतन्यपदार्थो नित्यः, स च पुरुषस्वरूपः। बुद्धौ चैतन्यरूपपुरुषस्य प्रतिविम्बवशात् साऽचेतनापि चेतनवत् प्रतिभातीति चेत्? एतदपि न मनोरमं, निराकारस्य निर्विकारस्य चात्मनः प्रतिविम्बासम्भवात् ।

प्रशस्तपादेनापि- "बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इति पर्याया"[8] इति महर्षिगौतमवत् समुल्लिखितम्। तर्कसंग्रहकारेणान्नंभट्टेन- "सर्वव्यवहारहेतुर्गुणो

---

[3] न्या. सू. १-१-१५

[4] पर्यायप्रयोगस्यैव लक्षणक्षमत्वात्। - न्यायमञ्जरी

[5] तर्कभाषा-केशवमिश्रः।

[6] तर्कसंग्रहः

[7] तर्कसंग्रहः

[8] न्या. क. सं. प्र. पा. भा., पृ. ४१०।

बुद्धिर्ज्ञानम्”[9] इति बुद्धेर्लक्षणं न्यरूपि। बुद्धिः सर्वव्यवहारहेतुरित्यनेन तस्या असाधारणकारणत्वं प्रतिपादितम्। सर्वविधव्यवहारपदेन हानोपादानोपेक्षा-शब्दप्रयोगादिव्यवहारो बोद्धव्यः। उपादानहानोपेक्षादि-व्यवहारः कमपि पदार्थं विषयीकृत्य भवति । कस्यापि पदार्थस्य व्यवहारस्तदा सम्भवति यदा स व्यवहर्तुर्ज्ञानविषयो भवति, न त्वन्यथा। अत्र व्यवहारपदेन शब्दप्रयोगरूपमर्थं वदन्ति टीकाकाराः। ‘सर्वव्यवहारहेतुर्गुण’ इति वस्तुतो बुद्धेर्न लक्षणं निर्विकल्पकज्ञानेऽव्याप्तेः, निर्विकल्पकज्ञानस्य व्यवहारहेतुत्वाभावात्, तस्य च संसर्गताप्रकारता-विशेष्यताऽनवगाहिज्ञानत्वात्, सविकल्पकज्ञानेन जगद्व्यवहारसिद्धत्वात्। अत इदं बुद्धेः परिचायकमात्रम्। किन्तु ज्ञानं बुद्धिरिति प्रकृते लक्षणम्।

वैशेषिकदर्शने बुद्धेः भेदद्वयम्-अविद्या विद्या च। अविद्यायाः चत्वारः भेदाः - संशयः, विपर्ययः, अनध्यवसायः स्वप्नश्च। विद्याऽपि चतुर्विधा-प्रत्यक्षलैङ्गिकस्मृति-आर्षभेदात्। विश्वनाथः अन्नंभट्टश्च बुद्धेः भेदद्वयं निदर्शितवान्। यथा-स्मृतिः अनुभवश्च ।

स्मृतिः –

न्यायवार्त्तिके तु प्रत्यक्षबुद्धिनिरोधे तदनुसन्धानविषयस्मृतिरिति व्यपदिष्टम्। यथा मातुः स्मरतीत्यादौ स्मृधात्वर्थः। संस्कारमात्रजन्यं ज्ञानं स्मृतिरिति[10] अन्नंभट्टेनोक्तम्। तथा च एकमात्रसंस्काररूपादसाधारणकारणात् यज्ज्ञानमुत्पद्यते सा एव स्मृतिरित्यर्थः फलितः। यज्ज्ञानं नोपेक्षात्मकं तादृशज्ञानादात्मनि भावनाख्यसंस्कारो जायते। पश्चाच्च कदाचित् केनाप्युद्बोधकेनास्य संस्कारस्योद्बोधे पूर्वानुभूतवस्तुनः स्मृतिर्जायते। सोऽयं देवदत्त इति प्रत्यभिज्ञा ‘अयमि’त्यंशे इन्द्रियसन्निकर्षजनिताऽपि स इत्यंशे संस्कारजनिता। तथा च संस्कारजन्यज्ञानं स्मृतिरित्युक्तौ प्रत्यभिज्ञायामतिव्याप्तिः। तेन च मात्रपदोपादानेन प्रत्यभिज्ञायां नातिव्याप्तिः, प्रत्यभिज्ञायाश्चक्षुर्जन्यत्वात्। केचित् स्मृतिलक्षणे “मात्रपदाभावेऽपि न ‘सोऽयं देवदत्त’ इत्यादौ प्रत्यभिज्ञायामतिव्याप्ति”रिति स्वीकुर्वन्ति। तत्र संस्कारजनिततत्तास्मृतेरेव हेतुत्वात्[11]। गङ्गेशोपाध्यायेन अपि मात्रशब्दप्रयोजनं नानुमन्यते। सोऽयं देवदत्त इत्यादिप्रत्यभिज्ञायां तत्तांशभानं स्मृतिरूपज्ञानलक्षण-प्रत्यासत्त्या।

तस्मात्प्रत्यभिज्ञायाः स्मृतिजन्यत्वेऽपि संस्कारजन्यत्वाभावात् तत्र नातिव्याप्तिरिति।

स्मृतिः संस्कारजन्यत्वादनित्या। अनुभवज्ञानं स्वात्मनि संस्कारोत्पादकं तृतीयक्षणे च विनष्टं भवति। अयं संस्कारश्च पश्चात् यज्ज्ञानमुत्पादयति सा एव स्मृतिरिति। न च सर्वेऽनुभवाः संस्कारमुत्पादयन्ति। उपेक्षात्मकज्ञानस्य निर्विकल्पकज्ञानस्य चानुभवत्वेऽपि संस्कारोत्पत्तौ असामर्थ्यात्। स्मृतिज्ञानं सविकल्पकमेव। स्मरणमनुभूतस्य भवतीति नियमे सत्यप्यनुभूतस्य स्मरणं भवत्येवेति न नियमः। स्मृतावनुभवविषयापेक्षया अल्पविषयवस्तु कदाचित् सम्भवति ततोऽधिकम्। स्मृतौ विषयत्वेन विशेष्यं, विशेषणं तयोः सम्बन्धश्च भासन्ते। संस्कारजनकस्यानुभवस्य विषयस्तु स्मृतेर्विषयः। तथा चानुभवेऽपि विशेष्यं, विशेषणं तयोः सम्बन्धश्च भासन्ते, अन्यथा स्मृतावपि एते विषया न स्युः।

स्मृतिरपि द्विविधा यथार्थायथार्थभेदेन[12]। तत्र यथार्था प्रमाज्ञानोत्पन्ना अयथार्था चाप्रमाज्ञानोत्पन्नेत्यन्नंभट्टाशयः। तत्र

[9] त. सं. दी. प्रका. पृ. ११४

[10] तर्कसंग्रहः, पृ. ३०

[11] त.कौ., पृ.१६

[12] स्मृतिरपि द्विविधा-यथार्था अयथार्था च । तर्कसंग्रहः, पृ. ९५

स्मृतेर्यथार्थताऽयथार्थता चानुभवस्य यथार्थतयाऽयथार्थतया च सम्भवति। प्रकृते च स्मृतिर्यथार्था न भवति, स्मृतिमात्रस्यैवायाथार्थ्यात्। स्मृतिरनुभवजन्या । 'स घट' इत्यत्र तत्पदेन स्मृतेः, 'अयं घट' इत्यत्रेदम्पदेनानुभवस्य ग्रहणम् । तथा च यथार्थानुभवस्य तज्जन्यस्मृतेश्च कालवैलक्षण्याद् विषयवैलक्षण्याच्चानुभवस्य याथार्थत्वेऽपि न स्मृतेर्यथार्थत्वम् । किन्तु बल्लभाचार्येण स्मृतेः प्रमाणता स्वीकृता। अनुभवजन्यत्वादर्थनिश्चयहेतुत्वाच्च [13]।

शिवादित्येन स्मृतेः प्रमात्वं नाङ्गीकृतम्। अत एवोक्तं "तत्त्वानुभवः प्रमा, अस्मृतिरूपं ज्ञानमनुभव[14]" इति। अनुभवः स्मृतिभिन्नं ज्ञानम्[15]। अनुभवश्च द्विविधः यथार्थायथार्थभेदेन। तत्र यथार्थानुभवः प्रमा अयथार्थानुभवश्चाप्रमेत्युच्यते।

गौतमेन महर्षिणा तत्त्वज्ञानं प्रमेति प्रत्यपादि। तत्त्वज्ञानं मिथ्याज्ञानस्य निवर्त्तकं 'दुःखजन्मादि'सूत्रे[16] स्पष्टतया निरणायि । केशवमिश्रेण प्रमाणलक्षणपरिष्कारे "तत्र यथार्थानुभवः प्रमा"[17] इति लक्षणं व्यपदिष्टम्। अत्र यथार्थपदेन संशयविपर्ययतर्कज्ञानानां निरासः। तेन च यथार्थशब्देनायथार्थतानिषेधकत्वं स्पष्टम्। न च यथा अर्थः तथा तस्य ग्राहकः इत्येवार्थो ग्राह्यः। तथा सति न संशयादीनां निरासः, तेषामपि अंशतो यथा अर्थः तथा अर्थग्राहकः इत्येवार्थदर्शनात्। अतो यथार्थशब्देनान्यथा अग्राहकता स्पष्टा।

संशयविपर्ययतर्करहितत्वे सति अनुभवत्वं प्रमात्वमिति। उदयनाचार्येणापि लक्षणमालायां 'तत्त्वानुभूतिः प्रमा' इत्यत्र तत्त्वपदेन संशयविपर्ययतर्काणां निरासः कृतः, अनुभूत्या च स्मृतेरिति। "भासर्वज्ञेन, सम्यगनुभवः प्रमा"[18] इति न्यायसारेऽभाणि। विश्वनाथपञ्चाननेन 'भ्रमभिन्नं तु ज्ञानं प्रमा'[19] इति प्रथमतः प्रकाशितम्। द्वितीयतः 'अथवा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकं तत्प्रमा'[20] इति उक्तम्। प्रथमलक्षणे शुक्तिरजतयोः "इमे रजते" इति ज्ञानं रजते रजतविषयकत्वांशे वा प्रमा। न चात्र भ्रमभिन्नत्वम्। तस्मादव्याप्तिः। अतो द्वितीयं लक्षणमभ्यधायि। तच्च तद्वद्विशेष्यकत्वे सति तत्प्रकारकं ज्ञानं प्रमेति। गङ्गेशोपाध्यायेन "यत्र यदस्ति तत्र तस्यानुभवः प्रमेति"[21] चिन्तामणौ निरूपितम्। अन्नंभट्टेन "स्मृत्यनुभवपदाभ्यां ज्ञानद्वैविध्यं"[22] प्रदर्श्य तत्र यथार्थायथार्थभेदेन अनुभवस्य द्वैविध्यमपि प्रतिपाद्य यथार्थस्य प्रमात्वं प्रतिपादितम्। यथार्थानुभवश्च 'तद्वति तत्प्रकारकानुभव'[23] इति। तद्वति इत्यत्र तच्छब्दः प्रकारीभूतधर्मपरः। तत्र सप्तम्यर्थो विशेष्यित्वम्। तत्र प्रकृत्यर्थस्य तद्वत्पदार्थस्य निरूपितत्वसम्बन्धेनान्वयः। विशेष्यित्वस्याश्रयता-सम्बन्धेन अनुभवेऽन्वयः। तथा च तद्वन्निष्ठविशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूप-कत्वे सत्यनुभवत्वं यथार्थानुभवस्य लक्षणम्।

प्रमात्वजातिविशिष्टत्वेन प्रमास्वरूपं व्यपदिश्यते, प्रत्येकं प्रमायाः प्रमात्वस्य पृथक्त्वेनोपन्यासात् प्रमात्वजातेरभावाच्च। वस्तुतो जातेर्व्याप्यवृत्तित्वा-दांशिकजातिस्वीकाराप्रसिद्धेर्भ्रमज्ञानेऽपि

---

[13] स्मृतिरपि मानान्तरम्, अर्थनिश्चयहेतुत्वात्। न्या.ली. ६२०

[14] सप्तपदार्थी

[15] तद्भिन्नं ज्ञानमनुभवः तर्कसंग्रहः, पृ. ३१

[16] दुःख-जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः। न्या. सू. १-१-२।

[17] तर्कभाषा, पृ. १४

[18] न्यायसारः, पृ. ६२

[19] का. व., १३४

[20] का. व. १३५

[21] तत्त्वचि., प्रत्यक्षखण्डे प्रमालक्षणसिद्धान्तः।

[22] तर्कसंग्रहः, पृ. ३०

[23] तत्रैव, पृ. ३१

कस्मिंश्चिदंशे प्रमात्वोपगमात्र प्रमात्वजातिर्न वा तद्विशिष्टत्वेन प्रमास्वरूपमिति।

प्रशस्तपादाचार्येण विद्याऽविद्या चेति भेदेन ज्ञानस्य भेदद्वयं[24] स्वीकृतम्। महर्षिणा कणादेन 'चाविद्या इन्द्रियदोषात्संस्कारदोषात् वा समुत्पन्ना, विद्या च दोषरहिता' इति प्रतिपादितम्। न्यायकन्दलीकारेण श्रीधरभट्टेन निःसन्दिग्धाबाधिताध्यवसायात्मिका प्रतीतिर्विद्या, तद्विपरीता चाविद्येति[25] व्यलेखि विश्वनाथपञ्चाननेन प्रमाप्रमाभेदेन ज्ञानस्य द्वैविध्यं प्रकाशितम्।[26] तत्र प्रमां प्रति गुणस्य कारणत्वं निरूपितमप्रमां प्रति च दोषस्येति[27]। यथार्थानुभवश्चतुर्विधः-प्रत्यक्षानुमित्युपमितिशाब्द-भेदात्[28]।

## सहायकग्रन्थसूची


- कारिकावली – विश्वनाथः, सं - हरिरामशुक्लशास्त्री,काशी संस्कृत सीरीज, ६, वाराणसी, १९७२
- तर्ककौमुदी - लौगाक्षिभास्करः ,सं – वी . एल. एस. पनसीकरः निर्णयसागर प्रेस, बम्बई, १९२८
- तर्कभाषा - केशवमिश्रः, सं. - बगरीनाथशशुक्लः, मोतीलाल बनारसीदास, वाराणसी, १९६८
- तर्कसंग्रहः – बोडासः , बाम्बे संस्कृत सीरीज अन्नंभट्टः, सं. – अथल्ये, सं ५५, भण्डारकर ओरियण्टल रिसर्च इन्स्टीट्युट, पुना, १९६८
- तत्त्वचिन्तामणिः - गंगेशोपाध्यायः, सं. – ए, ताताचार्यः, केन्द्रीय संस्कृत विद्यापीठ, तिरुपति, १९९३
- न्यायकन्दली – श्रीधराचार्यः , सं.- दुर्गाधरझा, गङ्गानाथझा ग्रन्थमाला , सं. ११ वाराणसी , १९६८
- प्रशस्तपादभाष्यम् – प्रशस्तपादः ,सं. नारायणमिश्रः,काशी संस्कृत ग्रन्थमाला सं. १७३ वाराणसी , १९६६
- वात्सायन, **न्यायभाष्यम्** , सम्पा. नारायणमिश्रः, काशी संस्कृत ग्रन्थमाला-४८, वाराणसी, १९७०.
- जयन्तभट्टः - **न्यायमञ्जरी** , सम्पा. सूर्यनारायणशुक्लः, चौखम्बा संस्कृत सीरिज , वाराणसी, १९७७
- भासर्वज्ञः - न्यायसारः – सम्पा.- स्वामी योगिन्द्रानन्दः षडदर्शन प्रकाशन ग्रन्थमाला , सं १ वाराणसी, १९६८
- गौतमः – न्यायसूत्रम् , सम्पा. नारायणमिश्रः , काशी संस्कृत ग्रन्थमाला-४३ वाराणसी, १९७०


[24] विद्या चाविद्या चेति। न्या.क.सं.प्र.पा.भा., पृ. ४११

[25] न्यायकन्दली, पृ. ४१४

[26] अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते। का. व. १२६

[27] दोषोऽप्रमाया जनकः, प्रमायास्तु गुणो भवेत्। का. व. १३१

[28] अनुभूतिश्चतुर्विधा। का. व., ५१।

# न्यायव्याकरणशास्त्रदिशा सम्प्रदानकारकविमर्शः

**समीर-हालदारः**

शोधछात्रः, संस्कृतविभागः, पाण्डिचेरी-विश्वविद्यालयः

पाण्डिचेरी

**प्रबन्धसारः**

*सम्प्रदानकारकविषये अत्र चर्चा वर्तते। चतुर्थ्यर्थनिरूपणे न्यायशास्त्रस्य व्याकरणशास्त्रस्य च साम्यं दृश्यते। सम्प्रदानत्वं मुख्यभाक्तसाधारणं क्रियाकर्मसम्बन्धितया कर्त्रभिप्रेतत्वम्। क्रियाकर्मत्वं नाम क्रियाजन्यफलशालित्वम्। क्रियया व्याप्तुमिष्टत्वम् अपि क्रियाजन्यफलभागितया कर्तुरिच्छाविषयत्वमेव। उभयसाधारणं कर्मत्वञ्च इच्छाऽघटितं क्रियाजन्यफलशालित्वमेव। क्रियाजन्यफलाशालितया इष्टस्यापि क्रियाजन्यफलशालित्वस्य सत्वात् इच्छाऽघटितमेकमेव सूत्रं भवतु। ओदनस्य गलाधस्संयोगेच्छया यो व्यापारः, ओदनस्य विषमिश्रितत्वेन, ततः विषादेरपि गलाधस्संयोगः, तत्र विषमनेन न भुज्यते इति प्रयोगस्योपपत्तिः कार्या। कश्चन समाधानं कथयति यत् धात्वर्थतावच्छेदकफलशालित्वेन उद्देश्यत्वं कर्मत्वम्। धात्वर्थतावच्छेदकफलाश्रयत्वभिन्नफलसम्बन्धितया कर्तुरुद्देश्यत्वं सम्प्रदानत्वम्। फलपदं धात्वर्थतावच्छेदकत्वेन सम्प्रदानलक्षणो न निवेश्यते। उद्देश्यत्वगर्भितं सम्प्रदानत्वस्वरूपं प्रदर्शितवान् भट्टाचार्यः। सम्प्रदानचतुर्थ्यर्थविचारे अयमत्र नागेशाशयः विचार्यते। कर्मनिष्ठफलनिरूपकत्वेनेच्छाविषयत्वं सम्प्रदानत्वमिति नागेशः। भर्तृहरि-काशिकावृत्तिकार-पदमञ्जरीकारादिभिः सम्प्रदानशब्दस्य अन्वर्थत्वं स्वीकृतम्। भट्टोजिदीक्षितादिभिः भाष्यमतम् आदृत्य व्याख्यानं कृतम्।*

**कूटशब्दाः -** सम्प्रदानम्, गदाधरभट्टाचार्यमतम्, नागेशभट्टमतम्, कर्तृत्वम्, आश्रयत्वसम्बन्धित्वभेदः, सूत्रं चेत्यादयः।

*******************************************************************************

'कर्मणा यमभिप्रैति स सम्प्रदानम्'[1] इति सम्प्रदानसंज्ञाविधायकं पाणिनेः सूत्रम्। कर्मणा करणभूतेन यम् अभिसम्बध्नाति तत्कारकं सम्प्रदानसंज्ञं स्यात् इति सूत्रार्थः। 'चतुर्थी सम्प्रदाने'[2] इति सूत्रेण सम्प्रदाने चतुर्थीविभक्तिः विधीयते। विप्राय गां ददाति इत्यादीनि उदाहरणानि। चतुर्थ्यर्थनिरूपणे न्यायशास्त्रस्य व्याकरणशास्त्रस्य साम्यं दृश्यते। परिष्कारसरण्या भट्टाचार्याः सम्प्रदानत्वं विचारितवन्तः।

व्युत्पत्तिवादोक्तरीत्या प्रथमतः सम्प्रदानपदार्थः विविच्यते। चतुर्थी सम्प्रदाने इति सम्प्रदाने चतुर्थीविधानात् सम्प्रदानार्थकचतुर्थ्या दानादौ ब्राह्मणादिसम्प्रदानकत्वं बोध्यते, अतः तस्याः सम्प्रदानत्वमर्थः। किं तत् सम्प्रदानत्वमिति चेदुच्यते। सम्प्रदानत्वञ्च मुख्यभाक्तसाधारणं क्रियाकर्मसम्बन्धितया कर्त्रभिप्रेतत्वम्। कर्त्रभिप्रेतत्वं नाम कर्तृगतेच्छाविषयत्वम्। क्रियाकर्मत्वं नाम क्रियाजन्यफलशालित्वम्। कर्मत्ववता सम्बन्धश्च तन्निष्ठफलभागित्वम्। तथा च क्रियाजन्यफलभागितया कर्तुरिच्छाविषयत्वं सम्प्रदानत्वमिति फलितम्। ब्राह्मणाय गां ददातीत्यत्र स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वा-पादानानुकूलः त्यागरूपः व्यापारः दाधात्वर्थः। त्यागरूपक्रियाजन्यं यत् फलं गोनिष्ठं स्वत्वं, तद्भागितया कर्तुरिच्छाविषयः ब्राह्मण इति तस्य सम्प्रदानसंज्ञा।

क्रियाजन्यफलभागितया कर्तुरिच्छाविषयत्वं सम्प्रदानत्वमित्युक्तौ कर्मत्वसम्प्रदानत्वयोः वैलक्षण्यं न स्यादित्याक्षेपः क्रियते। तथा हि –

[1] पाणिनीयाष्टाध्यायी 1-4-32

[2] तत्रैव 2-3-13

**कर्तुरीप्सिततमं कर्म**[3] इति सूत्रेण कर्तुः क्रियया व्याप्तुमिष्टस्य कर्मसंज्ञा विधीयते। क्रियया व्याप्तुमिष्टत्वम् अपि क्रियाजन्यफलभागितया कर्तुरिच्छाविषयत्वमेव। ततश्च कर्मत्वसम्प्रदानत्वयोः वैलक्षण्याभाव इति शङ्कायां कश्चन एकदेशी समादधाति। इच्छाघटितं, तदघटितञ्च पाणिनेः अनुशासनद्वयं वर्तते। कर्तुरीप्सिततमं कर्म, तथायुक्तं चानीप्सितमिति। उभयसाधारणं कर्मत्वञ्च इच्छाऽघटितं क्रियाजन्यफलशालित्वमेव। सम्प्रदानत्वञ्च क्रियाजन्यफलभागितया कर्तुरिच्छाविषयत्वमिति इच्छाऽघटितत्वघटितत्वभेदेन तयोर्वैलक्षण्यम् इति तन्न। यदि निरुक्तरीत्या इच्छाऽघटितमेव कर्मत्वं तर्हि सूत्रद्वयप्रणयनवैयर्थ्यापत्तिः। अतः कर्तुरिति इच्छाघटितकर्मत्वस्य सम्प्रदानत्वस्य च भेदो न स्यादिति शङ्का तथैव तिष्ठति।

पुनः एकदेशो समाधानं करोति यत् सूत्रद्वयप्रणयनवैयर्थ्यमिष्टमेव। यतः इच्छाऽघटितं क्रियाजन्यफलशालित्वमेव कर्मत्वं भवतु। क्रियाजन्यफलाशालितया इष्टस्यापि क्रियाजन्यफल-शालित्वस्य सत्वात् इच्छाऽघटितमेकमेव सूत्रं भवतु। तेनैव उपपत्या इच्छाघटितस्य सूत्रस्य वैयर्थ्यम् इष्टमेव इति। तन्न उचितम्। क्रियाजन्यफलशालितया इच्छाविषयत्वरूपस्य इच्छाघटितस्य कर्मत्वस्य यत्र बाधः तत्र तादृशरूपमपि कर्मप्रत्ययेन प्रतिपाद्यते इत्येतत्प्रतिपादनाय कर्तुरीप्सितेति अनुशासनमपि प्रयोजनम्। यत्र ओदनस्य गलाधस्संयोगेच्छया यो व्यापारः, ओदनस्य विषमिश्रितत्वेन, ततः विषादेरपि गलाधस्संयोगः, तत्र विषमनेन न भुज्यते इति प्रयोगस्योपपत्तिः कार्या। यदि इच्छयाऽघटितं क्रियाजन्यफलशालित्वमेव कर्मत्वं, तदा भुजिक्रियाजन्यगलाधस्संयोगरूपकर्मत्वस्य विषे सत्त्वेन तदभावस्य बाधितत्वेन तद्वाक्यस्य प्रामाण्यं न भवेत्। कर्मत्वस्य इच्छाघटितत्वे तु विषे भुजिक्रियाजन्यफलशालित्वेन इच्छाविषयत्वं नास्तीति तादृशकर्मत्वाभावस्य अबाधितत्वेन तद्वाक्यस्य प्रमाणोपपत्तिः। तथा युक्तमिति इच्छाऽघटितस्य कर्मत्वस्यापि स्वीकारेण दैवाद् विषं भुज्यते इति व्यवहारः उपपद्यते। एवञ्चेच्छाघटितकर्मत्वस्य निरुक्तरीत्या आवश्यकत्वेन कर्मत्वसम्प्रदानत्वयोः भेदाभाव इत्याक्षेपः समानः अवतिष्ठति।

पुनः कश्चन समाधानं कथयति यत् धात्वर्थतावच्छेदकफलशालित्वेन उद्देश्यत्वं कर्मत्वम्। धात्वर्थतानवच्छेदकफलशालित्वेनोद्देश्यत्वं सम्प्रदानत्वम् इति तयोः वैपरीत्यम्। यथा तण्डुलं पचति इत्यत्र पच्-धात्वर्थतावच्छेदकविक्लित्तिरूपफलाश्रयत्वेन उद्देश्यत्वात् तण्डुलस्य कर्मसंज्ञा। एवं काशीं गच्छन् पथि स्थगित इत्यादौ। विप्राय गां ददातीत्यादौ स्वस्वत्वध्वंसावच्छिन्नत्याग एव ददात्यर्थः। प्रकृते धात्वर्थतावच्छेदकं फलं स्वस्वत्वध्वंसः, तदनवच्छेदकं यत् फलं परस्वत्वम्। तन्निरूपको विप्र इति धात्वर्थतानवच्छेदकफलशालितया उद्देश्यत्वात् विप्रादेः सम्प्रदानत्वमिति तयोः भेदः इति। तन्नोचितम्। स्वस्वत्वध्वंसविशिष्टः त्यागः ददात्यर्थः, न तु परस्वत्वविशिष्टोऽपीत्युच्यते तर्हि यत्र उपेक्षया गां त्यजति तत्रापि स्वस्वत्वध्वंसजनकत्यागस्य सत्वात् गां ददातीति प्रयोगापत्तिः। अतः धात्वर्थतावच्छेदकानवच्छेदकभेदेन कर्मत्वसम्प्रदानत्वयोः भेदः वक्तुं न शक्यते इति तयोर्वैलक्षण्याभावशङ्का समाना एव।

[3] तत्रैव 1-4-49

 ISSN : 2583-2271
Vol. - 4, No. 1: 2024

भट्टाचार्यः उत्तरति। आश्रयत्वसम्बन्धित्वभेदेन तयोः भेदः। धात्वर्थतावच्छेदकफलाश्रयतया कर्तुरुद्देश्यत्वं कर्मत्वम्। धात्वर्थतावच्छेदक-फलसम्बन्धितया कर्तुरुद्देश्यत्वं सम्प्रदानत्वम्। धात्वर्थतावच्छेदकस्वत्व-रूपफलनिरूपकतया कर्तुरिच्छाविषयत्वात् विप्रादेः सम्प्रदानत्वम्। तदाश्रयत्वेन गोः कर्मत्वमिति तयोर्भेदः इति। अत्रैषा शङ्का। फलसम्बन्धितया इत्यंशे सम्बन्धो निविष्टः। स चाश्रयतारूपोऽपि भवितुम् अर्हति। ततश्च दाधात्वर्थतावच्छेदकस्वत्वरूपफलाश्रयतया गवादेरपि सम्प्रदानत्वप्रसङ्गः। यदि फलाश्रयत्वेन इच्छास्थले परया कर्मसंज्ञया सम्प्रदानसंज्ञायाः बाध इति आश्रयत्वातिरिक्तसम्बन्धवत्तया इच्छाविषय-त्वमेव सम्प्रदानत्वमित्युच्यते तर्हि गवादेः सम्प्रदानत्ववारणेऽपि वृक्षाय उदकमासिञ्चति, पत्ये शेते इत्यादौ वृक्षादेः सम्प्रदानत्वानुपपत्तिः। आद्ये सेकजन्यसंयोगः फलम्, द्वितीये शयनजन्यप्रीतिश्च फलम्। वृक्षपत्यादेः आश्रयतासम्बन्धेन फलवत्त्वात् सम्प्रदानत्वानुपपत्तिरिति चेदुच्यते। धात्वर्थता-वच्छेदकफलाश्रयत्वभिन्नफलसम्बन्धितया कर्तुरुद्देश्यत्वं सम्प्रदानत्वम्। दाधात्वर्थतावच्छेदक-स्वत्वरूपफलाश्रयतया गोः कर्मत्वम्। स्वत्वाश्रयभिन्नस्वत्व-निरूपकत्वेन विप्रादेः सम्प्रदानम्। वृक्षाय उदकमासिञ्चतीत्यत्र द्रवद्रव्यसमवेतक्षरणरूपक्रियानुकूलो व्यापारः धात्वर्थः। तदवच्छेदकं क्षरणम्। सम्प्रदानता-निर्वाहकः वृक्षसमवेतः जलसंयोगः न तदवच्छेदक इति संयोगाश्रयत्वं धात्वर्थतावच्छेदकफलाश्रयत्व-भिन्नमिति, धात्वर्थतावच्छेदकफलाश्रयत्वभिन्न-संयोगाश्रयतया इच्छाविषयस्य वृक्षस्य सम्प्रदानत्वं सिद्ध्यति।

ननु धात्वर्थतावच्छेदकफलाश्रयत्वभिन्नफल-सम्बन्धितया कर्तुरुद्देश्यत्वं सम्प्रदानत्वमिति लक्षणस्य सकर्मकस्थले समन्वयेऽपि धात्वर्थत्वेन फलाप्रसिद्ध्या अकर्मकस्थले पत्ये शेते इत्यादौ सम्प्रदानत्वानुपपत्तिरिति चेदुच्यते। फलपदं धात्वर्थतावच्छेदकत्वेन सम्प्रदानलक्षणो न निवेश्यते। धात्वर्थतावच्छेदक-निरूपिताश्रयताभिन्नः यः सम्बन्धः तत्प्रकारकेच्छाविषयत्वं सम्प्रदानत्वम्। पत्ये शेते इत्यत्र धात्वर्थतावच्छेदकं शयनत्वम्, तदाश्रयत्वभिन्नः यः फलसम्बन्धः शयनजन्यप्रीत्यादिसम्बन्धः, तद्वत्तया इष्टत्वात् पत्युः सम्प्रदानत्वम्। वृक्षाय उदकमासिञ्चति, विप्राय गां ददातीत्यादौ सर्वत्र लक्षणसमन्वयः।

इत्थं कर्मणा यमभिप्रैति स सम्प्रदानमिति पाणिनेः अनुशासनं प्रमाणीकृत्य उद्देश्यत्वगर्भितं सम्प्रदानत्वस्वरूपं प्रदर्शितवान् भट्टाचार्यः। केचित्तु ददातियोगे उद्देश्यत्वागर्भितं, पत्ये शेते इत्यादौ तद्गर्भितञ्च सम्प्रदानस्वरूपं प्रदर्शयन्ति। तथा हि – ददातियोगे धात्वर्थतावच्छेदकस्वत्वनिरूपकत्वमेव सम्प्रदानत्वम्। तदेव मुख्यम्। स्वत्वस्य धातुलभ्यतया निरूपितत्वमात्रं चतुर्थ्यर्थः। तस्य धात्वर्थतावच्छेदके स्वत्वेऽन्वयः।

ब्राह्मणनिरूपितगोनिष्ठस्वत्वजनकदानानुकूलकृतिमानिति बोधः। वृक्षाय उदकमासिञ्चति, पत्ये शेते इत्यादौ धात्वर्थतानवच्छेदकफलशालितया सम्प्रदानत्वस्थले उद्देश्यत्वांशनिवेशः आवश्यकः। अन्यथा यत्र जलसंयोगभागितया वृक्षस्य उद्देश्यत्वं नास्ति, परन्तु कथञ्चित् फलसम्बन्धोऽस्ति तत्रापि वृक्षाय उदकमासिञ्चतीति प्रयोगापत्तिः। अतः भाक्तस्थले सम्प्रदानत्वमुद्देश्यत्वगर्भितमिति वदन्ति।

तन्न उचितम्। अनुशासनादिप्रमाणवशाद् उद्देश्यत्वगर्भितमेव सम्प्रदानत्वङ्गीकार्यम्। अन्यथा दम्पत्योः सहाधिकारात् चैत्रमात्रोद्देश्येन धनदाने सति तत्र चैत्रपत्न्या अपि स्वत्वस्य प्रामाणिकतया पत्न्या अपि सम्प्रदानत्वेन चैत्रपत्न्यै दत्तमिति व्यवहारापत्तिः। तथा च सर्वत्र मुख्यभाक्तस्थले उद्देश्यत्वान्तर्भाव आवश्यकः। तदन्तर्भावे च

चैत्रपत्न्याः स्वत्वभागितया उद्देश्यत्वाभावेन नास्ति दोष इति भट्टाचार्यः सिद्धान्तयति। किञ्च उद्देश्यत्वगर्भितं सम्प्रदानत्विति निरूपणे –

**'श्राद्धे ब्राह्मणस्य सम्प्रदानतानिर्वाहायाऽस्ति चोद्देश्यतापि ब्राह्मणस्य'** इति।

शूलपाणेः स्मृतिग्रन्थवचनं प्रमाणत्वेन प्रदर्शितम्। भट्टाचार्यः एतत् सर्वं वैयाकरणमताविरुद्धमेव प्रदर्शितवान्। ददात्यर्थः मुख्यः भाक्त इति उभयतोद्देश्यस्य सम्प्रदानत्वम्। विप्रस्य गां ददातीत्यत्र स्वत्वजनकः त्यागः ददातेः मुख्यः अर्थः। शत्रवे भयं ददातीत्यादौ जनयतीति भाक्तोऽर्थः।

रजकस्य वस्त्रं ददातीत्यत्र षष्ठी कथमिति चेदुच्यते। तत्र ददातिः न त्यागार्थकः अपि तु परायत्तीकरणार्थकः गौणः। परायत्तीकरणञ्च तत्कर्तृकनिर्णेजनेच्छाप्रकाशको व्यापारः। तदेकदेशे कर्तृत्वे कर्तृत्ववत्त्वं रजकस्येति सम्बन्धविवक्षायां रजकपदात् षष्ठ्येव भवति, न सम्प्रदाने चतुर्थी सम्बन्धविवक्षायां शेषे षष्ठीति व्युत्पत्तिवादग्रन्थः।

सम्प्रदानचतुर्थ्यर्थविचारे अयमत्र नागेशाशयः। कारकचतुर्थ्याः सम्प्रदानत्वशक्तिमानर्थः। भट्टाचार्यमते सम्प्रदानत्वशक्तिः अर्थः। इदमपि वैय्याकरणसम्मतम्। चतुर्थ्या उद्देश्यत्वं वाच्यं, तत्समानाधिकरणशक्तिर्वा सर्वसम्मतमिति भाव इति शब्दरत्नम्। किञ्च मनोरमायां 'कर्तुरीप्सिततमं कर्म', 'तथायुक्तं चानीप्सितमि'ति सूत्रद्वयं किमर्थम्। धातूपस्थाप्यफलशालिकर्मत्वमेवास्तु। किम् ईप्सितानीप्सितयोः पृथक् कथनेनेति शङ्का कृता। अग्नेर्माणवकं वारयतीत्यत्र **'वारणार्थानामीप्सितः'**[4] इति सूत्रेण माणवकस्य अपादानत्वं प्राप्तं कर्तुरिति वक्तव्यमेव। द्वेष्योदासीनयोः सङ्ग्रहार्थं तथायुक्तमित्यप्यावश्यकमिति समाहितम्। ईप्सिततममिति इच्छार्थकसन्प्रत्ययस्य सत्वात् तस्य उद्देश्यत्वगर्भितत्वेन तेन सह उद्देश्यत्वं लभ्यते। तेन ग्रामं गच्छतीत्यादौ उद्देश्यत्वं प्रतिभाति इति शब्दरत्नग्रन्थे स्पष्टम्। अयं विचारः व्युत्पत्तिवादेऽपि कृतः। कर्मनिष्ठफलनिरूपकत्वेनेच्छाविषयत्वं सम्प्रदानत्वमिति नागेशः। धात्वर्थतावच्छेदकफलाश्रयत्वभिन्नफल-सम्बन्धितया इच्छाविषयत्वमिति भट्टाचार्यस्य मतम्।

कर्मणा यम् अभिप्रैतीति सूत्रे 'यं स' इति यच्छब्दतच्छब्दयोरनुपादाने कर्मणा यः अभिप्रैति स सम्प्रदानसंज्ञः इत्यर्थः स्यात्। तथा सति विप्रः गोनिष्ठस्वत्वनिरूपको भवत्विति इच्छाश्रयस्य कर्तुः सम्प्रदानत्वापत्तिः। उपाध्यायाय शिष्येण गौः दीयते। अत्र उपाध्यायस्य शिष्याय गौः दीयते इति प्रयोगापत्तिः। तद्वारणाय 'यं स' ग्रहणम्। तेनाभिप्रयतः कर्तुः सम्प्रदानत्वापत्तिर्नास्ति।

अभिप्रैतीत्यत्र अभिग्रहणाभावे कर्मणा यमेति स सम्प्रदानमित्युक्तौ यमेव सम्प्रत्येति तत्रैव स्यात्। अर्थात् सन्निकृष्टस्थले स्यात्। विप्रकृष्टस्थले। तदर्थम् अभिग्रहणं कृतम्। अभिराभिमुख्ये, प्रशब्द आदिकर्मणि। कर्मणा करणभूतेन क्रियारम्भे यमुद्दिशतीत्यर्थः। स चोद्देशः सर्वत्रास्तीति भावः। सूत्रे कर्मणेत्यस्याभावे अभिप्रैतीति कर्तृतिङन्तश्रवणेन केनाभिप्रैतीत्याकाङ्क्षायां स्वनिष्ठक्रिययेति प्रतीतं स्यात्। तया क्रियया प्रथमतः गौः अभिप्रेयते, पश्चात् विप्र इति गोः क्रियासम्बन्धः अन्तरङ्ग इति तस्यैव पर्यायेण सम्प्रदानसंज्ञा, कर्मसंज्ञा च स्यात्। कर्मग्रहणे पुनः क्रियमाणे दोषो न भवति। कर्म निमित्तत्वेन आश्रीयते इति भाष्ये प्रयोजनानि प्रदर्शितानि। भट्टाचार्योक्तसम्प्रदानत्वस्वरूपम् अपि एतत्सङ्ग्राहकमेव। धात्वर्थतावच्छेदकेति परिष्कारे

---

[4] अष्टाध्यायी 1-4-26

कर्तरि अतिव्याप्तिः, विप्रकृष्टे अव्याप्तिः, गवादौ कर्मणि पर्यायेण सम्प्रदानसंज्ञापत्तिरपि नास्ति।

भर्तृहरि-काशिकावृत्तिकार-पदमञ्जरीकारादिभिः सम्प्रदानशब्दस्य अन्वर्थत्वं स्वीकृतम्। सम्यक् प्रकर्षेण दीयते यस्मै तत् सम्प्रदानम्। तेन दानस्य कर्मणेति लभ्यते। दानं किञ्चिदुद्दिश्य अपुनर्ग्रहणाय स्वद्रव्यत्यागः। अत एव रजकस्य वस्त्रं ददाति, घ्नतः पृष्ठं ददातीत्यादौ न सम्प्रदानत्वमिति पदमञ्जर्यां स्पष्टम्। भाष्यानारूढत्वात् नेयमन्वर्थसंज्ञेति भट्टोजिदीक्षितनागेशभट्टादयः उक्तवन्तः। क्रियाकर्मसम्बन्धितयेति सम्प्रदानत्वस्वरूपं निरूपयन्तः भट्टाचार्याः भाष्यारूढं मतं स्वीकृतवन्तः।

सम्प्रदानसंज्ञायाः अन्वर्थतां वदतां मते रजकाय वस्त्रं ददातीति प्रयोगः नेष्यते। रजकस्य वस्त्रं ददातीति प्रयोगस्तु शेषत्वविवक्षायां बोध्यमिति दीक्षितानां मतम्। भाक्तददात्यर्थस्वीकारे सम्प्रदानत्वविवक्षायां सम्प्रदाने चतुर्थी इष्यते इति तस्याशय इति मन्तव्यम्। नागेशस्तु रजकायेति प्रयोगमप्यङ्गीकरोति। तत्र आधीनीकरणं ददात्यर्थः। वस्त्राणां निर्णेजनाय कञ्चित्कालं रजकाधीनीकरणम्। शेषत्वविवक्षायां रजकस्य वस्त्रं ददातीति प्रयोगोऽपि उपपद्यत इत्युक्तवान्। आधीनीकरणे इत्यस्य प्रत्यर्पणपर्यन्तं संरक्षणमात्रोपयोगि स्वत्वोत्पादने इत्यर्थ इति चित्रप्रभाकाराः। रजकस्य वस्त्रं ददातीत्यादौ ददातिः न त्यागार्थकः, किन्तु परायत्तीकरणार्थकः गौणः। तदायत्तीकरणञ्च तत्कर्तृकनिर्णेजनेच्छा-प्रकाशको व्यापारः। सम्बन्धविवक्षायां शैषिकी षष्ठीति व्युत्पत्तिवादकाराः। अयमपि विषयः वैयाकरणानुसारी।

महाभाष्ये श्राद्धाय निगर्हते, युद्धाय सन्नह्यते पत्ये शेते इत्यादौ अकर्मकस्थले कर्मणा यमभिप्रैतीति लक्षणं न घटते इति विचिन्त्य क्रियाग्रहणमिति वार्तिकमारब्धं वार्तिककृता। क्रियाग्रहणञ्च कर्तव्यम्। कर्मणा करणभूतेन यमभिप्रैति तस्येव क्रियया यमभिप्रैति तस्यापि सम्प्रदानसंज्ञा। शयनादिक्रियादिभिः अभिप्रेयमाणत्वात् पत्यादेः सम्प्रदानसंज्ञेति भावः। इदं वार्तिककारमतम्।

कर्तुरीप्सितेति सूत्रेणैव शयनादिक्रियाणां कर्मत्वं सिद्ध्यतीति, कर्मणेति सूत्रेणैव सम्प्रदानसिद्ध्या क्रियाग्रहणं न कर्तव्यमिति भाष्यकारमतम्। सन्दर्शनप्रार्थनादि-क्रियाभिः ईप्सिततमत्वात् शयनादिक्रियाणामपि पारिभाषिकं कर्मत्वं वर्तते। एवञ्च सकर्मकस्थले अकर्मकस्थले च कर्मणा यमभिप्रैतीति सूत्रेण सम्प्रदानसंज्ञा सिद्ध्यतीति फलितम्।

भट्टोजिदीक्षितादिभिः भाष्यमतम् आदृत्य व्याख्यानं कृतम्। कर्मनिष्ठफलनिरूपकत्वेन इच्छाविषयत्वं सम्प्रदानत्वमिति सकर्मकस्थले। अकर्मकस्थले कर्मपदेन क्रियापि कृत्रिमं कर्मेति क्रियायाः ग्रहणे कर्मनिष्ठफलेति लक्षणं न युज्यते। अतः कर्मसाध्यफलसम्बन्धितया कर्तुरुद्देश्यत्वं सम्प्रदानत्वमिति लक्षणान्तरमुक्तं नागेशभट्टेन। भट्टाचार्याः सकर्मकाकर्मकस्थल-साधारणतया धात्वर्थतावच्छेदकाश्रयत्वभिन्नफलाश्रयत्व-सम्बन्धितया कर्तुरुद्देश्यत्वं सम्प्रदानत्वमिति लक्षणमुक्तवन्तः। अत्र सन्दर्भे भट्टाचार्यमञ्जूषाकारयोः विरोधो नास्ति।

शत्रवे भयं ददातीत्यत्र जनयतीति ददात्यर्थः भाक्तः। उत्पादकव्यापाररूपस्य धात्वर्थस्य भयं कर्म। तत्सम्बन्धितया कर्तुरुद्देश्यत्वात् शत्रोः सम्प्रदानत्वम् इति व्युत्पत्तिवादे समन्वयः कृतः। युद्धाय सन्नह्यते इति अकर्मकस्थलम्। क्रियाग्रहणम् अथवा क्रियापि कृत्रिमं कर्मेत्यादिरीत्या सम्प्रदाने चतुर्थी साधिता महाभाष्ये। परन्त्वत्र सन्दर्भे भट्टाचार्याणाम् अन्यः पन्थाः। युद्धाय सन्नह्यते इत्यादौ सन्नहनादिक्रियाजन्यफलाऽसम्बन्धात् युद्धस्य नास्ति

 ISSN : 2583-2271
Vol. - 4, No. 1: 2024

सम्प्रदानता। अत एव नेयं सम्प्रदाने चतुर्थी। अपि तु 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' इति सूत्रेण कर्मणि चतुर्थी। क्रियार्था क्रिया उपपदं यस्य सोऽयं क्रियार्थोपपदः। तुमुन्नन्तः अन्यपदार्थः। क्रियार्थोपपदस्य च स्थानिनः अप्रयुज्यमानस्य धातोः कर्मणि कारके चतुर्थीविभक्तिर्भवति इति सूत्रार्थः। फलानि आहर्तुं यातीत्यर्थे फलेभ्यो याति इत्युदाहरणम्। प्रकृते युद्धं कर्तुं सोढुं वा सन्नह्यते इत्यर्थे कर्मणि चतुर्थीविभक्तौ युद्धाय सन्नह्यते इति सिद्ध्यति। युद्धकर्मककरणोद्देश्यकसन्नहनानुकूलकृतिमान् इति बोध इति भट्टाचार्यमतम्।

अत्र प्रकरणे शाब्दिकैस्सह विरोधोऽस्ति। पत्ये शेते इत्यत्र कारकचतुर्थीति मतद्वयेऽपि तुल्यम्। युद्धाय सन्नह्यते इत्यत्र कारकचतुर्थीति भाष्यकारतदनुयायिनः। कर्मणि चतुर्थीति व्युत्पत्तिवादकाराः। रूपे वैलक्षण्यं नास्ति, बोधे तावत् भेदो वर्तते। अत्रापि युद्धकर्मक इति बोध इष्यते तर्हि कर्मणि चतुर्थी भवतु। सन्नह्यतेः सन्नाहः सज्जीभावः अर्थः। प्रयोज्यफलं युद्धे प्रवृत्तिः। तत्सम्बन्धितया युद्धस्य सम्प्रदानत्वम्। तदानीं तदुद्देश्यकबोधो जायते। पत्ये शेते इत्यत्रापि पतिं प्राप्तुं शेते इत्यर्थः इष्यते तर्हि तत्रापि 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' इति सूत्रेण चतुर्थी। पतिकर्मकप्राप्तिफलकं शयनमिति बोधः। सम्प्रदाने चतुर्थीविभक्तौ पतिसम्प्रदानकं शयनमिति बोध इति भेदः।

अनुभवबलात् द्विप्रकारका व्यवस्था कर्तुं शक्यते। श्राद्धाय निगर्हते इत्यादौ क्रियार्थोपपदस्येति सूत्रेणैव चतुर्थ्याः सिद्धत्वात् क्रियाग्रहणं न कर्तव्यमित्येव भगवतः अभिप्राय इति महाभाष्यव्याख्यातृभिः रत्नप्रकाशकारैः स्पष्टीकृतम्। विवक्षावशात् अनुभवबलाच्च प्रयोगेभेद इति बोधे वैलक्षण्यम्। न तद्विरोधाय कल्पते। मुख्यभाक्तसाधारण्येन ददात्यर्थं वदतः व्युत्पत्तिवादकारस्य मते उपाध्यायः शिष्याय चपेटिकां ददातीति भाष्यप्रयोगोऽपि स्वरसतः उपपद्यत इति भट्टाचार्यः सम्प्रदानत्वस्वरूपं मुनित्रयसम्मतम् अविरुद्धञ्च उक्तवान्।

## सहायकग्रन्थसूची


- श्रीमन्नागेशभट्टविरचिता वैयाकरणसिद्धान्तलघुमञ्जूषा, प्रथमो भागः, कुलपतेः प्रो.यदुनाथप्रसाददुबेमहोदयस्य प्रस्तावनया विभूषिता, सम्पादकः आचार्यश्रीरामप्रसादत्रिपाठी, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी
- श्रीमद्गदाधरभट्टाचार्यचक्रवर्तिविरचितः, व्युत्पत्तिवादः, शुक्लश्रीराजनारायणशास्त्रिणा उपयुक्तटिप्पणीभिः परिष्कृत्य संशोधनपुरस्सरं सम्पादितश्च, चौखम्बा संस्कृत सीरिज आफिस, वनारस सिटी, १९९२
- श्रीमद्भट्टोजिदीक्षितविरचित-सिद्धान्तकौमुदी-कारकप्रकरणम्, सविमर्श चन्द्रिका हिन्दीव्याख्योपेतम्, व्याख्याकारः डॉ. रमाकान्तत्रिपाठी
- तर्कसंग्रहः, पदकृत्यटीकासहितः, सम्पा. पं. रामगोविन्दशुक्लः, भारतीयविद्याभवनप्रकाशन, दिल्ली।
- तर्कभाषा, चौखम्बा कृष्णदास अकादमी, वाराणसी।
- पाणिनिः, अष्टाध्यायीसूत्रपाठः (नारायणमिश्ररचिता आभा टीका सहिता)। चौखाम्बा ओरियेण्टालिया, वाराणसी, १९७७
- तारानाथ न्याय तर्कतीर्थः, (विमर्शनात्मक टीकाकारः), न्यायदर्शनम्, मुन्षिराम् मनोहर्लाल पब्लिषार्स्, दिल्ली, १९८४

# वैशेषिकदर्शनदिशा सर्गप्रलयविमर्शः

**मिन्टु-दे**
**शोधच्छात्रः, न्यायवैशेषिकविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**बी-४, कुतुबसांस्थानिककक्षेत्रम् ,नवदेहली – ११००१६**

**प्रबन्धसारः**

*विषयेऽस्मिन् जिज्ञासोपजिज्ञासाभ्यां समाधिनोपसमाधिना स्वीया जिज्ञासा न कथमपि उपशमयितुमलम् एतद् विचार्य ऋषिमहर्षिभिः स्वीयया प्रखरमेधया परमात्मसाहाय्येन सर्वाणि रहस्यानि विज्ञाय मानवमात्रकल्याणाय उपदिदेश, तेष्वेव सृष्टिसंरचना प्रलयश्च वर्तते। यद्यपि सृष्टिप्रकारः प्रलयः संहारप्रकारो वा न क्वचिदपि स्पष्टमुपलभ्यते परम् आचार्य-प्रशस्तपादेन काणादीयं सूक्ष्ममनोभावं केषाञ्चित् सूत्राणां माध्यमेन अनुनिशम्य पृथिव्यप्तेजोवायुपदार्थनिरूपणानन्तरमेतेषामेव हि परमाणूनां संघातेन सृष्टिः विघातेन च प्रलयः इति सृष्टिप्रलयविचार उपस्थापितः। अतः विषयेऽस्मिन् आचार्याणां मतमनुसृत्य दर्शनान्तरे तद्विषयकचर्चा यदुपलब्धा तस्य उपस्थापनमाध्यमेन 'परमाणूनां संघातेन सृष्टिः विघातेन च प्रलयः' इति वैशेषिकसम्मतवचनस्य स्थापनं कृत्वा तस्य विस्तृतं विश्लेषणञ्च प्रबन्धेऽस्मिन् भविष्यतीति मे मतिः।*

**कुञ्चीशब्दाः** - सर्गः, प्रलयः, परमाणुः, द्व्यणुकम्, त्र्यणुकं चेत्यादयः।

*******************************************************************************

चित्रविचित्रेयं सृष्टिर्वस्तुतः अतीव रहस्यात्मिका। अतो मननशीलोऽयं जिज्ञासुर्मानवः अस्मिन् विषये जिज्ञासोपजिज्ञासाभ्यां समाधिनोपसमाधिना स्वीयां जिज्ञासां न कथमपि उपशमयितुमलम् एतद् विचार्य ऋषिमहर्षिभिः स्वीयया प्रखरमेधया परमात्मसाहाय्येन सर्वाणि रहस्यानि विज्ञाय मानवमात्रकल्याणाय च उपदिदेश, तेष्वेव सृष्टिसंरचना प्रलयश्च वर्तते। यद्यपीदं सत्यं यद् महर्षिकणादोक्तवैशेषिकसूत्रेषु तु सृष्टिप्रकारः प्रलयः संहारप्रकारो वा न क्वचिदपि स्पष्टमुपलभ्यते परं आचार्यप्रशस्तपादेन काणादीयं सूक्ष्ममनोभावं केषाञ्चित् सूत्राणां माध्यमेन अनुनिशम्य पृथिव्यप्तेजोवायुपदार्थनिरूपणानन्तरमेतेषामेव हि परमाणूनां संघातेन सृष्टिः विघातेन च प्रलयः इति सृष्टिप्रलयविचार उपस्थापितः। अनन्तरं तमेव ग्रन्थमनुसरद्भिः भाष्यकारैः श्रीधराचार्यव्योमशिवाचार्या-दिभिः स्वस्वटीकायां भाष्ये वा प्रशस्तपादीयमभिमतमेव विवेचितं तदेवेहोपस्थाप्यते- पञ्चदश निमेषाः काष्ठा, त्रिंशत् काष्ठाः कला, पञ्चदश कलाः नाडिका, त्रिंशत्कला मुहूर्तः त्रिंशन्मुहूर्त्तकमहोरात्रं पञ्चदशाहोरात्रं पक्षः। द्वौ पक्षौ मासः, द्वौ मासावृतुः, षड् ऋतवो द्वादश मासाः वा संवत्सरः। ऋतुत्रयेणोत्तरायणम् ऋतुत्रयेण दक्षिणायनम्, उत्तरायणं च देवानां दिनं, दक्षिणायनञ्च रात्रिः, तथाभूताहोरात्रशतरात्रेण षष्ट्यधिकेन वर्षम्। द्वादशसहस्रैश्च वर्षैश्चतुर्युगम्। चतुर्युगसहस्रपरिमितं ब्रह्मणो दिनम्। तथा च-

> **"मानुषेनैकवर्षेण देवानां दिनमुच्यते।**
> **तेषां शतत्रयं षष्टियुक्तं वर्षस्तु दैवतः॥**
> **देववर्षसहस्राणि द्वादशाहश्चतुर्युगम्।**
> **चतुर्युगसहस्रन्तु ब्रह्मणो दिनमुच्यते॥"**

इत्यादिस्मृतिवचनानि ब्रह्मणो दिनपरिमाणे प्रमाणम्। इत्यनेन मानेन वर्षशतस्यान्ते वर्तमानस्य ब्रह्मणो मुक्तिकाले संसारे नानास्थानेषु भूयोभूयः शरीरादिपरिग्रहेण खिन्नानां गर्भवासादिना विविधदुःखेन दुःखितानां प्राणिनां किञ्चित्कालं विश्रामार्थं दुःखोपशमार्थं च सकलभुवनपतेः महेश्वरस्य संजिर्हीषा भवति। तदनन्तरं

शरीरेन्द्रियमहाभूतारम्भकाणां सर्वेष्वात्मसु समवेतानामदृष्टानां शक्तिप्रबन्धः स्यात्। तस्मिन् सति अनागतानां शरीरेन्द्रियमहाभूतानामुत्पत्तिः। उत्पन्नानां च विनाशार्थं महेश्वरेच्छया आत्मनां परमाणूनाञ्च संयोगेभ्यः परमाणुषु क्रियाः जायन्ते। ततः शरीराणामिन्द्रियाणां च ये परम्परया कारणभूताः परमाणवः तेषु विभागा भवन्ति । संयोगनिवृत्तौ सत्यां तेषामापरमाण्वन्तो नाशः। एवमेव पृथिव्यप्तेजोवायूनामपि अनेनैव रीत्या महाभूतानामुत्तरोत्तरविनाशेन पूर्व-पूर्व-विनाशः समुत्पद्यते। तथाहि जलस्यावस्थितेः पृथिव्या विनाशो एवं तेजसः स्थितौ जलस्य विनाशः वायोरवस्थितौ तेजसो विनाशः ततश्च प्रविभक्ताः परमाणवः अवतिष्ठन्ते। एतेषां धर्माधर्मभावनाख्यसंस्कारैश्चानुविद्धा जीवात्मानो वर्षशतं यावदवतिष्ठन्ते । अयं संहारक्रमः वैशेषिकाणाम्।

ततः पुनः आत्मनां सुखदुःखानुभवोत्पत्तये महेश्वरस्य सिसृक्षा जायते। ततः सर्वेष्वात्मसु विद्यमानानि अदृष्टानि वृत्तिं लभन्ते, तदपेक्षेभ्यः आत्मपरमाणुसंयोगेभ्यः पवनपरमाणुषु कर्माण्युत्पद्यन्ते। पवनपरमाणवस्तत्र समवायिकारणम्। लब्धवृत्त्यदृष्टवदात्म-परमाणुसंयोगोऽसमवायिकारणम् अदृष्टं निमित्तकारणम्। एवं कर्मोत्पत्तौ तेषां पवनपरमाणूनां परस्परसंयोगेभ्यश्च द्व्यणुकानि जायन्ते। तदनु त्र्यणुकानीत्यनेन क्रमेण महान् वायुः समुत्पद्यमानः आकाशे दोधूयमानो वेगातिशययुक्तस्तिष्ठति। तदनन्तरं अद्भ्यः परमाणुभ्यः द्व्यणुकादिक्रमेण महान् सलिलनिधिरुत्पन्नः सर्वत्र पोप्लूयमानस्तिष्ठति। ततस्तस्मिन्नेव जलधौ पार्थिवेभ्यः परमाणुभ्यो महापृथिवी समुत्पन्ना स्थिरस्वभावावतिष्ठते। तदनन्तरं तस्मिन्नेव महोदधौ तैजसेभ्यः अणुभ्यो द्व्यणुकादिक्रमेणोत्पन्नो महांस्तेजोराशिः देदीप्यमानस्तिष्ठति। यद्यपि पयः-पावकयोः स्वाभाविको विरोधस्तथाप्यदृष्टवशेनाधाराधेयभावः। एवमुत्पन्नेषु महाभूतेषु महेश्वरस्य संकल्पमात्रात् महदण्डमारभते। तस्मिन्महति अण्डे चतुर्मुखिसर्वलोकपितामहं सकलभुवनसहितमुत्पाद्य प्रजासर्गे विनियुङ्क्ते। स च महेश्वरेण विनियुक्तो ब्रह्मा अतिशयितः ज्ञानवैराग्यैश्वर्यसम्पन्नः प्राणिनां कर्मविपाकं विदित्वा कर्मानुगुणज्ञानभोगायुषः सुतान् दक्षादीन् प्रजापतीन् मानसान् मनस्संकल्पप्रभवान् मनून् देवानृषीन् पितृगणान् मुखबाहूरुपादेभ्यः चतुरो वर्णान् अन्यानि चोच्चावचानि क्षुद्रक्षुद्रतराणि च भूतानि सृष्ट्वा कर्मानुरूपैः धर्मज्ञानवैराग्यैश्वर्यैर्योजयति इत्ययं सृष्टिक्रमः वैशेषिकाणाम्।

अत्र युक्तिरेषा परमाणुसद्भावे ततो जगत्सृष्टौ चोक्ता कन्दल्यामणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाण-तारतम्यत्वात्, महत्परिमाणतारतम्यवत्। यत्रेदं विश्रान्तं यतः परमाणुर्नास्ति स परमाणुः। स चैको न जनकः एकस्य नित्यस्य चारम्भकत्वे कार्यस्य सन्ततोत्पत्तिः स्याद् अपेक्षणीयाभावाद् अविनाशित्वञ्च प्रसज्यते। आश्रयविनाशस्य अवयवविभागस्य च विनाशहेतोरभावात्। त्रयाणां परमाणूनामारम्भकत्वं च न सम्भवति। अतः महत्कार्यद्रव्यस्योत्पतौ स्वपरिमाणापेक्षया अल्पपरिमाणस्य कार्यद्रव्यस्यैव सामर्थ्यदर्शनात्। द्व्यणुकं कार्यद्रव्येणैव जायते महत्परिमाणत्वाद् घटवत्। इत्थञ्च त्रयाणामेकस्य चारम्भकत्वे प्रतिक्षिप्ते द्वाभ्यामेव परमाणुभ्यामारभ्यते यत् तत् द्व्यणुकमुच्यते। द्वाभ्यां द्व्यणुकाभ्यां त्र्यणुकोत्पत्तौ त्र्यणुकस्य महत्त्वं न स्यात्। अवयवबहुत्वस्यापेक्षितत्वात् अतस्त्रिभिर्द्व्यणुकैरेकत्र्यणुकमिति। न चैवं सति

द्व्यणुकानामेव घटारम्भकत्वापत्तिः घटस्य भङ्गेऽल्पतर-भावदर्शनेन तथैवारम्भकत्वात्, अतस्त्र्यणुकादिक्रमेण घटाद्युत्पत्तिः, "अत्रेदं चिन्तनीयं त्रिभिः परमाणुभिरेव त्र्यणुकमस्तु, परमाणुभ्यामनारम्भस्तु सिद्धान्तिनां द्व्यणुकाभ्यामनारम्भ इव मानाभावात्। फलबलेन त्रयाणामेव युगपद्द्रव्यारम्भकसंयोगसङ्कल्पनात्"।

न्यायवैशेषिकदर्शनसम्मतेऽस्मिन् ईश्वराधिष्ठितेभ्यः परमाणुभ्यो जगत्सृष्टिरिति पक्षे वेदान्तिभिरुद्भाविता दोषा इदानीं पर्यालोच्यन्ते। ब्रह्ममीमांसायां तर्कपादाख्ये द्वितीयपादे-

**"महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ।**
**उभयथापि न कर्मतस्तदभावः।**
**समवायाभ्युपगमाच्च साम्यादनवस्थितेः।**
**नित्यमेव च भावात्**
**रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ।**
**उभयथा च दोषात्,**
**अपरिग्रहाच्चात्यन्तमनपेक्षा॥"**[1]

इति सप्तभिः सूत्रैः वैशेषिकमतं दूषितम्। तत्र शाङ्करभाष्ये महद्दीर्घवद्वेति प्रथमं सूत्रम् अणुवादिना ब्रह्मवादिनि उत्प्रेक्ष्यमाणस्य दोषस्य प्रतिसमाधानपरतया व्याख्यातम्। "**उभयथापि न कर्मतस्तदभावः**" इति द्वितीयं सूत्रं परमाणुकारणवादनिरासपरतया व्याख्यातम् । तथाहि प्रलयकाले विभागावस्थायां तावत् परमाणूनां संयोगः कर्मापेक्षोऽभ्युपगतां कर्मवतां तन्त्वादीनां संयोगदर्शनात् कर्मणश्च निमित्तं तस्यामवस्थायां प्रयत्नाभिघातादेरसम्भवात् अदृष्टमेवेत्यभ्युपगतम्-

**"अग्नेरुर्ध्वज्वलनं वायोस्तिर्यक्पवनमणूनां**
**मनसश्चाद्यं कर्मादृष्टकारितम्।"**[2]

इति तत्र जिज्ञासा किमात्मसमवेतमदृष्टं परमाणुषु कर्म विकल्पते । अदृष्टस्याचेतनत्वात् न ह्यचेतनं चेतनानधिष्ठितं स्वतन्त्रं प्रवर्तते। आत्मनश्च तस्यामवस्थायामचेतनत्वाभ्युपगमात्। किं चात्मसमवेतमदृष्टमणुषु कथं कर्मोत्पादयेत्। अतः कार्यकारणयोः सामानाधिकरण्यस्यावश्यकत्वात् आत्मसमवेतमदृष्टं स्वाश्रयसंयोगसम्बन्धेनाणुषु सम्बन्ध्यमानं कर्मोत्पादयतीति चेन्न संयोगस्य सातत्यात् प्रवृत्तिसातत्यप्रसङ्गादिति।

किञ्च परमाणूनां परस्परं संयोगो न घटते। एकस्य परमाणोरन्येन परमाणुना सह किं कार्त्स्न्येन संयोगः किं वा एकदेशेन, नाद्यः उपचयानुपपत्तेरणुमात्रत्वप्रसङ्गात्, दृष्टविपर्ययाच्च। प्रदेशवतो द्रव्यस्य प्रदेशवता द्रव्यान्तेरण संयोगस्य दृष्टत्वात्, द्वितीयः परमाणूनां सावयवत्वप्रसङ्गः, ततश्च संयोगसमवायिकारणाभावात् द्व्यणुकादिकार्यद्रव्यं नोत्पद्यते ।

यथा चादिसर्गे निमित्ताभावात् संयोगोत्पत्त्यर्थं कर्म नाणूनां सम्भवति एवं महाप्रलयेऽपि विभागोत्पत्त्यर्थं कर्म नैवाणूनां भवति। अदृष्टं हि भोगप्रसिद्ध्यर्थं न प्रलयप्रसिद्ध्यर्थमित्यतो निमित्ताभावान्न अणूनां विभागार्थं कर्मेति।

अत्र समाधानम् एवं प्रकारेण अदृष्टवशादेव परमाणुष्वाद्यं कर्म। अदृष्टं तु यद्यपि चैतन्यशून्यैर्जीवात्मभिः प्रलयकाले नाधिष्ठीयन्ते। तथापि ईश्वरेणाधिष्ठीयन्त इत्यभ्युपगमान्नानुपपत्तिः, अदृष्टाधिष्ठातृतया ईश्वरसाधकयुक्तिष्वन्यतमतया न्यायवार्तिककुसुमाञ्जल्यादावुक्तत्वात्। यदत्र भामत्यामुक्तं निमित्तकारणतामात्रेण त्वीश्वरस्य अधिष्ठातृत्वमुपरिष्ठान्निराकरिष्यते इति, तत्रेच्यते-

**पत्युरसामञ्जस्यात्।**[3]

[1] वे.द. २/२/१२-१७
[2] वे.द. ४/२/१३
[3] वे.द.२/२/३७

इत्यधिकरणोक्तानि दूषणानि भामतीकारहृद्गतानि । तानि च किमशरीर ईश्वरः सृजति उत शरीर इत्यादिदूषणानि न्यायवार्तिके समाहितानि सन्ति। संयोगविषये यद्दूषणमुक्तं, तस्यापि विपक्कादृष्टावच्छिन्ना-त्मसंयोगस्य सततमविद्यमानत्वात् न सृष्टिसातत्यादिप्रसङ्ग इति परिहारः।

**"समवायाभ्युपगमाच्च साम्यादनवस्थितेः।"**[4]

इति सूत्रे द्वाभ्यां चाणुभ्यां द्व्यणुकमुत्पाद्यमानम् अणुभ्यामत्यन्तभिन्नमण्वोः समवैतीति भवताङ्गीक्रियते । तथैव ह्यणुभ्यामत्यन्तभिन्नं सत् द्व्यणुकं समवायसम्बन्धेन ताभ्यां संबध्यते एवं समवायोऽपि समवायिभ्योऽत्यन्तभिन्नः सन् अन्येनैव समवायेन समवायिभिः संबध्यते, अत्यन्तभेदसाम्यात्। तथा च तस्यान्योऽन्यः सम्बन्धः कल्पयितव्य इत्यनवस्था प्रसज्यते। तस्मादनुपपन्नपरमाणुकारणवाद इति भगवत्पादैरुक्तम्। समवायमधिकृत्य पृथगेव वक्तव्यमस्ति ।

**"नित्यमेव च भावात्।"**[5]

इति सूत्रे अणवः किं प्रवृत्तिस्वभावा वा निवृत्तिस्वभावा वा उभयस्वभावा वा अनुभयस्वभावा वा। प्रवृत्तिस्वभावत्वे नित्यमेव प्रवृत्तेः भावात् प्रलयाभावप्रसङ्गः। निवृत्तिस्वभावत्वे नित्यमेव निवृत्तेर्भावात् सर्गाभावप्रसङ्गः। उभयस्वभाववत्त्वं च विरोधादसमञ्जसम्।

अनुभूयस्वभावत्वे तु निमित्तवशात् प्रवृत्तिनिवृत्त्योरङ्गीकार्यतया तन्निमित्तमदृष्टमेवेति अदृष्टस्य नित्यसन्निधानान्नित्यप्रवृत्तिप्रसङ्गः। अदृष्टस्यानिमित्तत्वे नित्याप्रवृत्तिप्रसङ्गः। तस्मादप्यनुपपन्नः परमाणुकारणवाद इति भगवत्पादैर्भाषितम्।

अत्र प्रशस्तपादाचार्यैरेवं[6] समाहितं-परमेश्वरेच्छावशात् प्रलयकालेऽदृष्टं प्रतिबद्धशक्तिकं, सृष्टिकाले लब्धवृत्तिकं भवतीति स्वीकारान्न सर्वदा प्रवृत्तेर्न वा सर्वदा निवृत्तेः प्रसङ्ग इति अथवा ब्रह्मकारणवादेऽप्येवं विकल्पे ब्रह्म स्वेच्छया कालविशेषे प्रवर्तते निवर्तते च परमाणुविषयेऽपि तुल्यमुत्तरमिति।

**"रूपादिमत्त्वाच्च विपर्ययो दर्शनात्।"**[7] इति।

रूपादिमतां घटादीनां स्वकारणापेक्षया स्थूलत्वस्य, अनित्यत्वस्य च दर्शनात् रूपादिमतां परमाणूनामपि स्वकारणापेक्षया स्थूलत्वस्य अनित्यत्वस्य च प्रसङ्गः भाषित इति।

अत्रैव समाधानम्- अनवस्थाभयाद् अवयवपरम्परायाः परमाणौ विश्रान्तत्वे सति रूपादिमत्त्वं न स्थूलताया अनित्यत्वस्य च प्रयोजकम्। अपि तु अवयवबहुत्वादेः स्थूलतायां प्रयोजकत्वम्। अवयवनाशावयवसंयोगविनाशयोश्च अनित्यत्वे प्रयोजकत्वमिति स्वीकारान्न दोष इति रामानुजभाष्योक्तदूषणान्यालोचयन् इदं समाधानप्रकरणम् अदृष्टकारितेन कर्मणा संयुज्यमानाभ्यां निरवयवाभ्यां परमाणुभ्यां द्व्यणुकाद्युत्पत्तिक्रमेण जगदुत्पत्तिकल्पनेयं न युज्यते।

परमाणूनां निरवयवत्वे संयोगासम्भवात् यथाङ्गुलिद्वयं प्रत्येकं दशदिक् सम्बन्धदिशा प्रदेशावच्छिन्नं परस्परं संयुज्यमानमेकया महादिशा संयुज्यत इत्येवं प्रत्येकं त्रिभिस्त्रिभिः प्रदेशैः संयुज्यत इत्येवं षड्भिः पार्श्वैः संयुज्यते । एवं पटारम्भकाः तन्तवः संयुज्यमानाः षड्भिः पार्श्वैः संयुज्यमाना प्रत्येकमसंयुक्ताः सप्तपार्श्वयुक्ताः सन्तः स्वाधिकपरिमाणं पटमारभन्त इति दृष्टम्। एवं परमाणवोऽपि षड्भिः पार्श्वैः संयुज्यमाना एव

[4] वे.द.२/२/१३
[5] वे.द. २/२/१४
[6] प्र.पा.भा.पृ-१२१-१३१
[7] वे.द. २/२/१४

स्वपरिमाणाधिकपरिमाणम् अणुत्वह्रस्वत्वयुक्त-द्व्यणुकमहत्वदीर्घत्वयुक्तत्र्यणुकादिकार्यमारभन्त इति वक्तव्यं परमाणूनां प्रदेशभेदोऽवश्यम् अङ्गीकरणीयः। तथा त्र्यणुकोत्पादक-द्व्यणुकत्रयसंयोगनिर्वाहार्थमपि सोऽभ्युपेयः। स हि हस्तपुस्तकसंयोगात् कायपुस्तकसंयोग इव द्व्यणुकावयवं परमाणुद्व्यणुकान्तरसंयोगात् द्व्यणुकद्वयसंयोग इति। कारणाकारणसंयोगात् कार्याकार्यसंयोग इति त्वयाभ्युपगमात् द्व्यणुकारम्भकपरमाणौ तदारम्भकपरमाण्वन्तर-संयोगे स्थिते प्रदेशभेदं विना कथं त्र्यणुकोत्पत्तिसमये द्व्यणुकान्तरसंयोगः स्यात् मूर्तानां समानदेशताविरोधात्। यदि तु मूर्तत्वेऽपि परमाणुषु समानदेशता नेष्यते तदा षण्णां परमाणूनां पिण्डरूपं त्र्यणुकं परमाणुपरिमाणानां स्यात् तदाहुः-

**"षट्केणद्व्यणुकसंयोगात् परमाणोः षडंशता।**
**षण्णां समानदेशत्वे पिण्डं स्यादणुमात्रकः"॥**

इति प्राचादिचतुर्दिगूर्ध्वोऽधोदेशवर्तिभिः षड्भिः परमाणुभिः, सम्बध्यमानो मध्यस्थः परमाणुः षडंशतां प्राप्नोति। भिन्नदेशवशात् सम्बन्धानाम् अथ समानदेशाः सर्वे सम्बन्धाः तदा सर्वेषामेषां पिण्डः परमाणुमात्रम् आप्नोतीति तदर्थः। समानमिदं दूषणं द्व्यणुकेभ्यस्त्र्यणुकोत्पत्तावपि। तस्मात् द्व्यणुकत्र्यणुका-दिजननतत्परिमाणातिशययोः सिद्ध्यर्थं परमाणुषु षडंशत्वमनिच्छतापि अङ्गीकार्यम्। अथ संशयत्वेऽनवस्थेति बिभेषि तर्हि परमाणुकारणवादं परित्यज्य ब्रह्मकारणवाद-परिग्रहणम् इति मुख्यं दूषणं रामानुजीयग्रन्थेषु प्रत्यपादि। अत्र समाधानं - सावयवाः पदार्थाः यथा संयुज्यन्ते तदा षट्पार्श्वावश्यकता निरवयवास्तु प्रदेशभेदं विनापि संयोगं प्राप्नुवन्ति । अन्यथा निरवयवत्वे ब्रह्मणि कथमितरद्रव्यसंयोगा भवन्तीति चाद्ये कः परिहारः। उक्तं हि न्यायसिद्धाञ्जने-

"एवमारम्भकाणामणूनां कृत्स्नैकदेशसंयोग-विकल्पेन अधिकपरिमाणद्रव्यानारम्भकत्व-सभागत्वादि चोद्यं परमाणुदूषकैः सर्वैरपि क्रियते। भाष्यकारैश्च महद्दीर्घाधिकरणे तदेव चोद्यं कृतम्। तदेतन्माध्यमिकानामेवोपपद्यते न त्वन्येषां कथं तर्हि भाष्यम्? दृश्यमानातिरिक्तं कल्पनानिरासा-भिप्रायम्"। इति।

सिद्धान्ते तु परमाणुस्थानीयं त्र्यणुकं निरवयवम्। उक्तं च दीधितिकारेण त्रुटौ एव विश्रामात्। महत्त्वशून्यमपि तत् प्रत्यक्षमिति, एवञ्च संख्यागतमहत्वं स्वीकृत्य त्र्यणुकम् अभ्युपेयमेवेति शम्।

**संकेताक्षरसूची**

१. न्या.सि.मु. -न्यायसिद्धान्तमुक्तावली
२. न्या.सू. - न्यायसूत्रम्
३. न्या.कु. - न्यायकुसुमाञ्जलिः
४. न्या. वा. - न्यायवार्त्तिकम्
५. प्र.पा.भा. - प्रशस्तपादभाष्यम्
६. वे.द. - वेदान्तदर्शनम्

**सहायकग्रन्थसूची**

- उदयनाचार्यः । न्यायकुसुमाञ्जलिः । सम्पा. महाप्रभुलालगोस्वामी । मिथिला विद्यापीठ ग्रन्थमाला, सं-२८, १९७२।
- उदयनाचार्यः। न्यायकुसुमाञ्जलिः। सम्पा . श्रीमोहनः भट्टाचार्यः। कोलकाता : पश्चिमवङ्गराज्यपुस्तकपर्षत्। १९९५।
- तर्कालङ्कारः, जगदीशः। तर्कामृतम्। सम्पा. रामचन्द्रमिश्रः। वाराणसी : चौखम्बा विद्याभवन, १९७३।
- प्रशस्तपादः। प्रशस्तपादभाष्यम्। सम्पा . दण्डिस्वामिदामोदराश्रमः। कोलकाताः आद्यापीठः बालकाश्रमः। द्वितीयसंस्करणम्।

- भट्टाचार्यः, विश्वनाथन्यायपञ्चाननः। न्यायसिद्धान्त-मुक्तावली। सम्पा. श्री हरिरामशुक्लः न्यायाचार्यः। वाराणसी : चौखम्भा प्रकाशन् । २०१८।
- भट्टाचार्य, विश्वनाथन्यायपञ्चाननः। न्यायसूत्रवृत्तिः। सम्पा. सेख साविर आलिः। कोलकाता : संस्कृतपुस्तकभाण्डारः। प्रथमसंस्करणम्, २०१५।
- भारद्वाजोद्योत्करः। न्यायवार्त्तिकम्। सम्पा. विन्ध्येश्वरीप्रसादद्विवेदि। वाराणसी : चौखम्बा संस्कृत भवन । पुनर्मुद्रणम्-२०६४ ।
- कणादः। वैशेषिकसूत्रम्। सम्पा. नारायणमिश्रः। वाराणसी : बौद्धभारती, १९६८ ।
- गौतमः। न्यायसूत्रम्। सम्पा. फणिभूषणतर्कवागीशः। कोलकाता : पश्चिमवङ्गराज्य-पुस्तकपर्षद्। पञ्चमसंस्करणम्, २०१४ ।

# सांख्यनये सत्कार्यवादः

**विप्लव-सरकारः**

**शोधच्छात्रः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य**

**बी-४, कुतुबसांस्थानिककक्षेत्रम् ,नवदेहली – ११००१६**

**प्रबन्धसारः**

*समेषां भारतीयवैदिकावैदिकदार्शनिकानां परमं लक्ष्यभूतं तत्त्वं भवति आत्मसाक्षात्कारः। आत्मसाक्षात्कारमन्तरा परमपुरुषार्थस्य निःश्रेयसस्य अवाप्तिरेव नैव सम्भवतीत्यतः समे दार्शनिकाः आत्मसाक्षात्काराय सततं प्रयत्नशीला भवन्ति। आत्मसाक्षात्कारस्य साधनं भवति श्रवणं मननं निदिध्यासनञ्चेति, निगदति श्रुतिः— **"आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।"***

*एतेन ज्ञायते यद् आत्मसाक्षात्कारे यदि एतानि कारणानि भवन्ति तर्हि कार्यमात्रं प्रति कारणमवश्यं स्वीकर्तव्यमिति धिया लोके कारणतः कार्यस्योत्पत्तिरिति सर्वेषां सिद्धान्तः। कार्यकारणयोरविनाभावदर्शनात् "तत्सत्त्वे तत्सत्त्वम्, तदभावे तदभावः" इति अन्वयव्यतिरेकसहचारदर्शनाच्च कारणमन्तरा कार्यस्योत्पत्तिः भवितुं नार्हति इति निश्चप्रचं वक्तुं शक्यते। अन्यथासिद्धिशून्यत्वे सति नियतपूर्ववर्तित्वं, कार्याभावप्रयोजकीभूतभावप्रतियोगित्वं वा, प्रागभावप्रतियोगित्वं ध्वंसाभावप्रतियोगित्वं वेति कारणकार्ययोः सामान्यलक्षणं शास्त्रज्ञैः प्रतिपादितम्। कारणेनैव कार्यस्योत्पत्तिरित्यत्र विशयाभावेऽपि कारणे, उत्पत्तेः प्राक् कार्यस्य विद्यमानत्वमस्ति न वा इत्यत्र कार्यकारणभावे विद्यते वस्तुतः चतुर्धा विप्रतिपत्तिः। अतः अस्मिन् शोधप्रबन्धे सांख्यनये सत्कार्यवादस्य ग्रन्थकारदिशा सम्यक्तया प्रतिपादनपुरःसरं तस्मिन् विषये यथामति नूतनतत्त्वानाम् उपस्थापनं करिष्यते।*

**कुञ्चीशब्दाः** – निःश्रेयसः , कारणम् , विवर्तवादः , शक्तिः , सत्कार्यवादः चेत्यादयः।

*******************************************************************************

समेषां भारतीयवैदिकावैदिकदार्शनिकानां परमं लक्ष्यभूतं तत्त्वं भवति आत्मसाक्षात्कारः। आत्मसाक्षात्कारमन्तरा परमपुरुषार्थस्य निःश्रेयसस्य अवाप्तिरेव नैव सम्भवतीत्यतः समे दार्शनिकाः आत्मसाक्षात्काराय सततं प्रयत्नशीलाः भवन्ति। आत्मसाक्षात्कारस्य साधनं भवति श्रवणं मननं निदिध्यासनञ्चेति, निगदति श्रुतिः—

**"आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"**[1] इति।

आत्मसाक्षात्कारे श्रवणमनननिदिध्यासनानि तत्त्वज्ञानजनकानि भवन्ति। तथा च श्रूयते—

**"श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।**
**मत्वा च सततं ध्येय एते दर्शनहेतवः।।"**

एतेन ज्ञायते यद् आत्मसाक्षात्कारे यदि एतानि कारणानि भवन्ति तर्हि कार्यमात्रं प्रति कारणमवश्यं स्वीकर्तव्यमिति धिया लोके कारणतः कार्यस्योत्पत्तिरिति सर्वेषां सिद्धान्तः। कार्यकारणयोरविनाभावदर्शनात् "तत् सत्त्वे तत्सत्त्वम्, तदभावे तदभावः" इति अन्वयव्यतिरेकसहचारदर्शनाच्च कारणमन्तरा कार्यस्योत्पत्तिः भवितुं नार्हति इति निश्चप्रचं वक्तुं शक्यते। अन्यथासिद्धिशून्यत्वे सति नियतपूर्ववर्तित्वं, कार्याभावप्रयोजकीभूतभावप्रतियोगित्वं वा, प्रागभावप्रतियोगित्वं ध्वंसाभावप्रतियोगित्वं वेति कारणकार्ययोः सामान्यलक्षणं शास्त्रज्ञैः प्रतिपादितम्। कारणेनैव कार्यस्योत्पत्तिरित्यत्र

[1] बृहदारण्यकोपनिषद्, 2/5

विशयाभावेऽपि कारणे, उत्पत्तेः प्राक् कार्यस्य विद्यमानत्वमस्ति न वा इत्यत्र कार्यकारणभावे विद्यते वस्तुतः चतुर्धा विप्रतिपत्तिः।

तत्र **"असतः सञ्जायते"** इति बौद्धानां प्रथमा विप्रतिपत्तिः। **"एकस्य सतो विवर्तः कार्यजातं न वस्तु सत्"** इति वेदान्तिनां द्वितीया विप्रतिपत्तिः। **"सतोऽसञ्जायते"** इति न्यायज्ञानां तृतीया विप्रतिपत्तिः। **"सतः सञ्जायते"** इति सांख्यानां तुरीया विप्रतिपत्तिः।

**"असतः सञ्जायते"** इति यत् सौगताः प्रतिपादयन्ति, तेषामयमेवाभिप्रायः विनष्टाद् बीजाद् अङ्कुर उत्पद्यते। अर्थात् अभावात् भावस्य कार्यस्योत्पत्तिर्भवति। यथा मृत्सलिलसंयोगाद् बीजे नष्टे सत्येवाङ्कुर उत्पद्यते, एतेन स्पष्टं भवति अभावस्यैव कारणत्वम्। उक्तं च सूत्रकारेण महर्षिणा गौतमेन—

**"अभावाद् भावोत्पत्तिः नानुपमृद्य प्रादुर्भावात्"**[2] इति।

बीजादीनां विनाशं विना कार्योत्पत्तेरसम्भवात्। अव्यवहितपूर्ववर्त्तिन एव कारणमभीष्टम्, अङ्कुरादिकार्यादव्यवहितपूर्ववर्त्तित्वं च बीजाद्यभावस्यैव सम्भवति न बीजादेः इत्यभावस्यैव सकारणत्वं प्रसिद्ध्यति। एवञ्च घटादिपक्षेऽपि मृत्पिण्डादेः स्वरूपविनाशो भवत्येवेति अभावस्य कारणत्वं स्पष्टमेव। अत इमे सौगताः असत्कारणवादिन इति प्रसिद्धाः सन्ति। अनुमानेनापि अभावस्य कारणत्वं व्यवस्थापयितुं शक्यते—

"सर्वे कार्यरूपभावाः अभावकारणकाः कार्यत्वात् बीजनाशोत्तरोत्पन्नाङ्कुरादिवत्" इति सौगतानां सिद्धान्तः। तत्र सौगतैः अभावाद् भावोत्पत्तिरिति सद्भाषितं तत्सर्वथा अरुचिकरमेव। यतः असतः सदुत्पत्तेरसम्भवात्। तथा च सूत्रकारः महर्षिगौतमः -

**"न विनष्टेभ्योऽनिष्पत्तेः।"**[3]

अर्थाद् अभावाद् भावस्योत्पत्तिः कथमपि भवितुं नार्हति। विनष्टेभ्यो बीजादिभ्यः कारणेभ्योऽङ्कुरादि-कार्याणामुत्पत्तेरभावात्। यदि विनष्टादेव बीजाङ्कुर उत्पद्येत तदा चूर्णीकृतादप्युत्पद्येत, विनाशस्याविशेषाद् इति। तथाहि भाष्यकारः वात्स्यायनः—

**"न विनष्टाद् बीजाङ्कुर उत्पद्यते इति तस्मान्नाऽभावाद् भावोत्पत्तिरिति।"**[4]

एवञ्च न हि बन्ध्यायाः कस्यापि उत्पत्तिः भवितुमर्हति। न वा शशविषाणं कारणतया दृष्टिपथमवतरति। अतः बौद्धमतं सर्वथा अयुक्तिकरमिति भाति।

वेदान्तिनस्तु **"सतो विवर्तः कार्यजातं न वस्तु सत्"** इति विवर्तवादं समाश्रयन्ति। यतः तेषां मते **"ब्रह्म सत्यं जगन्मिथ्या"** इति उक्तिः प्रसिद्धा विद्यते। ब्रह्म एव जगतोऽभिन्ननिमित्तोपादानं, लूतावद् भवति। ब्रह्मणः विवर्तं जगद्भवतीति, विवर्तो नाम उपादानविषयमसत्ताककार्यापत्तिरिति अप्रच्यूतपूर्वरूपस्य असत्यनानाऽऽकारावभासो विवर्त इति। शास्त्रज्ञैः भाषितं यत्—

**"सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः।**
**अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदीरितः।।"**[5]

वस्तुतः विवर्तवादो मायातत्त्वाभ्युपगन्तृणां शङ्कराचार्याणाम्। तेषां नये कारणमेव कार्यस्वरूपेण भासते इति कारणस्यैव सत्यत्वं न कार्यस्य सत्यत्वं विद्यते। यथा **"शुक्तौ इदं रजतम्"** इति ज्ञानान्तरमधिष्ठानभूतशुक्तिज्ञाते जाते बाधज्ञानेन पूर्वज्ञातं रजतं यथा निवर्तते, तद्वद् ब्रह्मज्ञाने जाते सति जगदादिभेदप्रपञ्चो निवर्तते। तथा चोक्तं —

[2] न्यायसूत्रम्, 4/1/14
[3] न्यायसूत्रम्, 4/1/17
[4] न्या.भा. पृ-352
[5] वेदान्तसारः

**"ततो निरंश आनन्दे विवर्तो जगदिष्यताम्।**
**अवस्थान्तरभानं तु विवर्तो रज्जुसर्पवत्॥"**

इति वैदान्तिकैः यद् विवर्तवादोऽभ्युपगतः स न समीचीनः, यतः असति बाधे प्रत्यक्षसिद्धपदार्थस्य मिथ्यात्वं भवितुं नार्हति। यत्र च बाधज्ञानं किञ्चिदन्यत् कारणं वा सम्भवति तत्रैव मिथ्यात्वस्य सिद्धिर्भवितुमर्हति नान्यथा। तथा च कापिलेनोक्तं -

**"जगत्सत्यत्वम् अदुष्टकारणजन्यत्वाद् बाधकाभावात्"**[6] इति।

दुष्टकारणजन्यं ज्ञानं तावत् काचकामलादिदोषाद् पीत्तादिदोषाद्वा पीतशंखज्ञानम्। बाधनं ज्ञानं च नेदं रजतमिति ज्ञानम्। न च इदं तथा प्रकृत्यादीनामदुष्टत्वात्। **"नेदं जगत्"** इति प्रतीत्यभावाद् बाधकाभावाच्च जगतो मिथ्यात्वमसम्भवीत्यतः वेदान्ताभिमतः विवर्तवादः न युक्त इति सांख्याः निगदन्ति।

एवञ्च कार्यकारणविषये भारतीयदर्शनशास्त्रे सत्कार्यासत्कार्यवादयोः चर्चा बहुधा श्रूयते। ये तु कार्योत्पत्तेः प्राक् कारणे कार्यस्य विद्यमानत्वमित्यामनन्ति ते सत्कार्यवादिनः सांख्याः। ये खलु कार्योत्पत्तेः प्राक् कारणे कार्यस्य अविद्यमानत्वं कार्यञ्च नवीनं जातमाविर्भावमूलकञ्च भवतीत्यामनन्ति ते असत्कार्यवादिनः नैयायिकाः भवन्तीति।

न्यायनये असदेव कार्यमुत्पद्यते। यथा पूर्वमसदेव तत्तद्घटादिकार्यजातं दण्डचक्रचीवरादिसामग्रीसमवधानेन मृदादिकारणवशाद् भिन्नं सदुत्पद्यते। अर्थात् स्वोत्पत्तेः पूर्वं तत् कार्यं नासीदेव, पश्चात् कारणसामग्रीवशाद् उत्पद्यत इति कार्यकारणयोरन्यत्वं परमार्थतः सत्यं चेति। ततश्च सतोऽसज्जायत इति नैयायिकमतं युक्तमेव।

अभिप्रायस्तु न्यायमते कारणतः कार्यं भिन्नपदार्थविशेषः। कारणे यदि कार्यस्य निहितत्वमभ्युपगम्यते तर्हि कार्यकारणयोस्तादात्म्यापत्तिः स्यात्, कार्यकारणयोः अभिन्नत्वे च पृथगुल्लेखस्य प्रयोजनमेव नास्ति। कार्यकारणयोर्भिन्नत्वादनयोः पृथगभिधानम्। मृत्तिकातः घटस्योत्पद्यमानत्वेऽपि अनयोः मृत्तिकाघटयोः भिन्नपदार्थत्वात् मृत्तिका मृत्तिकात्वेन घटश्च घटत्वेन ज्ञातुं शक्यते। मृत्तिकादौ घटस्य घटे च मृत्तिकायाः लोकव्यवहाराभावादिति प्रथमकल्पः।

यदि च कार्यकारणयोरभिन्नत्वं कल्प्यते तर्हि उभयोः एकप्रयोजनत्वं स्यात्, तथा न दृश्यते, प्रत्युत प्रत्यक्षसिद्धमिदं यत् घटः अस्मदादीनां प्रयोजनमुद्देश्यं वा साधयति। मृत्तिकादौ तथा व्यवहाराभावात् कारणतः कार्यस्योत्पत्तिदर्शनाच्च अनयोः कार्यकारणयोः वैचित्र्यं सिद्ध्यतीति द्वितीयकल्पः।

यदि च कार्योत्पत्तेः प्राक् कार्यस्य कारणे विद्यमानत्वमित्यभ्युपेयते तर्हि कार्योत्पत्तेरेवावश्यकतैव नास्ति, यतः उत्पत्तिशब्दस्यार्थो भवति यः पूर्वं नासीत् तस्याविर्भावः। उत्पत्तेः प्राक् कार्यस्य कारणे यदि विद्यमानता तर्हि तस्योत्पत्तिरिति वक्तुं नैव शक्यते। कार्योत्पत्तेः सर्वाभिमतत्वात् सर्वव्यवहारयोग्यत्वाच्च सत्कार्यवादः नाभ्युपेय इति तृतीयकल्पः।

कार्यकारणयोः विशेषः कश्चन सम्बन्धोऽपि प्रसिद्ध इति दृश्यते। भिन्नयोः पदार्थयोः एव सम्बन्धः सर्वाभिमतः। यदि कार्यकारणयोः अभिन्नत्वं तर्हि अनयोः कार्यकारणयोः कश्चित् सम्बन्धोऽस्ति इति वक्तुं नैव शक्यते इति तुरीयकल्पः।

कारणं मृत्तिका कार्यं घटश्च यथा एकपदार्थविशेषः न भवति तथैव यदि

[6] सांख्यसूत्रम्, 6/52

मृत्तिकाघटयोः उपादानम् अभिन्नं स्यात् तर्हि अनयोः स्वरूपमपि अभिन्नम् एकं च स्यात्। घटोत्पत्तेः प्राक् कारणे मृत्तिकायां घटस्याविद्यमानत्वमिति प्रत्यक्षसिद्धमेवेति पञ्चमकल्पः।

नैयायिकास्तु इत्थमपि प्रतिपादयन्ति कार्योत्पत्तेः प्राक् कारणे यदि कार्यस्य विद्यमानता भवेत् तर्हि निमित्तकारणस्यापि अपेक्षा न स्यात्, परन्तु निमित्तकारणस्य सर्वाभिमतसिद्धत्वात् तस्य अस्वीकारे को वा समर्थः। निमित्तकारणमन्तरा यदि कार्यस्योत्पत्तिरभ्युपेयते तर्हि घटपटादिनिमित्तकारणस्य कुम्भकारस्य तन्तुवायस्य वा अपेक्षा न स्यात्, मृत्तिकायां घटस्य विद्यमानता नास्तीति कुम्भकारस्य निमित्तकारणत्वेन अस्ति अपेक्षा इति षष्ठकल्पः।

एतेन प्रसिद्धं भवति यत् कार्यं कारणतः भिन्नः पदार्थः, कारणतः जायमानं कार्यं सर्वथा नूतनमेवेति नैयायिकाः असत्कार्यवादं समर्थयन्ति व्यवस्थापयन्ति च।

नैयायिकैः यो हि असत्कार्यवादः व्यवस्थापितः तन्नानुमतः इति सांख्याः प्रवदन्ति। तथाहि असतः कार्यस्य कारणव्यापारसहस्रैरपि कर्तुमशक्यत्वात्। न हि शिल्पिसहस्रेणापि नीलं पीतं कर्तुं शक्यते। कारणेऽसतः कार्यस्य कार्यसत्तया सह सम्बन्धासम्भवाच्च। न हि अविद्यमानः शृङ्गः कदापि शशे शृङ्गरूपकार्यसत्तां भजते। उक्तं च महर्षिणा कपिलेन

**"नासदुत्पादो नृशृङ्गवत्"**[7] इति। अर्थात् **"नरश्रृगतुल्यस्यासत उत्पादोऽपि न सम्भवतीति।"**[8]

सांख्यनये सतः सञ्जायते यतः **"उत्पादनियमात्"** इति। अर्थात् मृत्तिकात एव घट उत्पद्यते, तन्तुषु पट उत्पद्यते इत्येवं कार्याणामुपादानकारणं प्रति यो नियमः विद्यते, तत्र सम्भवति। उत्पत्तेः प्राक् कारणे कार्यसत्तायां हि न कोऽपि विशेषोऽस्ति, येन कश्चिदेवासन्तं जनयेत्, नेतरमिति विशेषाङ्गीकारे च भावत्वापत्तेः समसत्तया, स एव च विशेषोऽस्माभिः कार्यस्यानागतावस्थेत्युच्यत इति। एतेन यद् न्यायवैशेषिकाः प्रागभावमेव कार्योत्पत्तिनियामकं कल्पयन्ति तदपि निरस्तम्। अभावकल्पनापेक्षया भावकल्पने लाघवात् भावानां दृष्टत्वादन्यानपेक्षत्वाच्च। ईश्वरकृष्णोऽपि सत्कार्यवादस्य स्थापनाय हेतुं प्रस्तौति कारिकामुखेन —

**"असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात्।**
**शक्तस्य शक्यकरणात्कारणभावाच्च**
**सत्कार्यम्।।"**[9]

अर्थात् असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् शक्तस्य शक्यकरणात् कारणभावाच्चेति पञ्चहेतुभिः सत्कार्यवादः साधितः सांख्यैः सूत्रकारैरपि सत्कार्यवादस्य स्थापनार्थं **"उपादाननियमात्"**[10], **"सर्वत्र सर्वदा सर्वासम्भवात्"**[11], **"शक्तस्य शक्यकरणात्"**[12], **"कारणभावाच्च"**[13] इति सूत्रचतुष्टयमुल्लिखितम्।

असदकरणादित्यस्य अयमेवाभिप्रायः असतः बन्ध्यापुत्रतुल्यस्य स्वोत्पत्तेः प्रागवर्तमानस्य अकरणात् उत्पत्त्यभावात्। अत्र च व्यतिरेकव्याप्तिविशिष्टो हेतुः अभ्युपेयः, तथा च यद् असद् भवति तत्र करणं भवति यथा बन्ध्यापुत्रः, कूर्मक्षीरादयः, यच्चोत्पन्नं भवति तत्सद् भवति यथा घटपटादयः। अनुमानाकारस्तु कार्यमुत्पत्तेः प्रागपि सद् असदकरणादिति।

---

[7] सांख्यसूत्रम्, 1/114
[8] सां.प्र.भा. पृ-68
[9] सांख्यकारिका, 9
[10] सांख्यसूत्रम्, 1/115
[11] सांख्यसूत्रम्, 1/116
[12] सांख्यसूत्रम्, 1/117
[13] सांख्यसूत्रम्, 1/118

उपादानग्रहणाद् अर्थाद् उपादानैः कारणैः सह कार्यस्य ग्रहणात् सम्बन्धाच्च कार्यस्य सत्त्वमेव। सम्बन्धश्च कार्यस्य सत एव भवितुं शक्नोति। घटात्मककार्यार्थी पुरुषस्तस्योपादानभूतमृत्तिकाया ग्रहणं करोति, यथा वा दधिरूपकार्यार्थी पुरुषः उपादानभूतस्य क्षीरस्यैव ग्रहणं करोति, नान्यस्य अत उपादानग्रहणादिपि हेतोरुत्पत्तेः प्राक्कारणे कार्यमस्तीति प्रसिध्यति। अनुमानन्तावत् कार्यं सत् उपादानग्रहणादिति।

सर्वेषां कार्याणां सर्वत्र सम्भवाभावात्, कस्यचित्कार्यस्य उत्पत्त्यर्थं किमपि कारणमुपादीयते, न तु सर्वस्योत्पत्तये सर्वमुपादीयते। उत्पत्तेः प्राक् कार्यस्यासत्त्वपक्षे नायं नियमः सङ्गच्छते। घटोत्पत्तये मृत्तिकायाः ग्रहणं भवति न तन्त्वोः ग्रहणम्। यदि च उत्पत्तेः प्रागसदेव कार्यं भवेत् तर्हि कार्यासत्त्वस्य सर्वत्राविशेषात् तन्त्वादिभ्योऽपि घटः स्यात्, तथा नावलोक्यते इत्यतः न कार्यमसत् इति। यदि च सत्त्वपक्षमाश्रीयते तर्हि घटस्य मृत्तिकायामेव सत्त्वात् मृत्तिकात एव घटोत्पत्तिः सम्भवति न तन्त्वादिभ्य इति।

शक्तस्य शक्यकरणादिति हेतोः तात्पर्यं तु शक्तं कार्यजननयोग्यं कारणम् आश्रयो यस्याः सा, कार्यजननशक्तिरपि कारणे विद्यमाना या शक्तिः सा शक्तिरिति। सा शक्तिः सर्वत्र भवति चेत् तर्हि सर्वं कार्यं सर्वस्माद् भवेदिति नैयायिकानामाशङ्कापक्षं निवारयितुमुच्यते मिश्रैः—

**"शक्तिभेद एव एतादृशो यतः किञ्चिदेव कार्यं जनयेत् न सर्वमिति चेत् हन्त! भोः"** इति। अर्थात् सा शक्तिः सर्वत्र वर्तते इत्यापि वयं स्वीकुर्मः, परन्तु तथापि सर्वस्मात् सर्वकार्योत्पत्तिप्रसङ्गोऽपि न विद्यते। यतः शक्तेः वैचित्र्यात् कारणं किञ्चिदेव कार्यं जनयति न सर्वं येन मृत्तिकात एव घटो जायते न तन्तुभ्यः इति न किञ्चिद्दोषः। वस्तुतः शक्तं कारणं शक्तिसम्बद्धमेव कार्यमुत्पादयति नासम्बद्धमतः शक्तस्य शक्यकरणादिति हेतुः समीचीनः।

अन्तिमो हेतुर्भवति **"कारणाभावात्"** इति। अर्थाद् उत्पत्तेः प्रागपि कार्यस्य कारणाभेदः श्रूयते, तस्माच्च सत्कार्यसिद्धौ न असदुत्पाद इति। कार्यस्य असत्त्वस्वीकारे सदसतोरभेदानुपपत्तिः। उत्पत्तेः प्राक् कार्याणां कारणाभेदे च श्रुतिरेव प्रमाणम्। तथा च श्रुतिः— **"तद्धीदं तैर्व्याकृतमासीत्"**[14], **"सदेव सोम्येदमग्र आसीत्"**[15], **"आत्म्यैवेदमग्र आसीद्"**[16] इति। अनया युक्त्या सांख्यदर्शने न्यायवैशेषिकाभिमतासत्कार्यवादस्य बौद्धाभिमतासत्कारणतावादस्य वेदान्ताभिमतविवर्त-वादस्य च निराकरणपूर्वकं सत्कार्यवादः साधितो भवति। परिणामश्च उपादानसमसत्ताककार्यापत्तिरिति सांख्यज्ञानां सिद्धान्त इत्यलमति विस्तरेण।

ଓଃଓଃଓଃ

**संकेताक्षराणुक्रमणिका –**

| | | |
|---|---|---|
| न्या. सू. | - | न्यायसूत्रम् |
| न्या. भा. | - | न्यायभाष्यम् |
| न्या. द. | - | न्यायदर्शनम् |
| वृ. उ. | - | बृहदारण्यकोपनिषद् |
| छा. उ. | - | छान्दोग्योपनिषद् |
| सा. त. कौ. | - | साङ्ख्यतत्त्वकौमुदी |
| सा. सू | - | साङ्ख्यसूत्रम् |
| सा. द. | - | साङ्ख्यदर्शनम् |
| सा. का. | - | साङ्ख्यकारिका |

[14] सांख्यतत्त्वकौमुदी, पृ-९०

[15] बृहदारण्यकोपनिषद् 1/4/7

[16] छान्दोग्योपनिषद् 6/1/2

## सहायकग्रन्थसूची


- कपिलः। **साङ्ख्यदर्शनम्** । डि शास्त्री सम्पादितसांख्यप्रवचनभाष्येण सह । चौखम्बा संस्कृत प्रतिष्ठान : वाराणसी ।१९८७ ।
- कपिलः। **साङ्ख्यसूत्रम्** (विज्ञानभिक्षुभाष्यान्वितम्) । सम्पा. डां श्री रामशङ्करभट्टाचार्यः । भारतीय विद्या प्रकाशन : वाराणसी ।
- ईश्वरकृष्णः । **साङ्ख्यकारिका** (श्रीगौडपादस्वामिकृतभाष्यसहिता) । प्रका. पण्डित-नारायण मूलजी। न्युस मुद्राणयन्त्रालये मुद्रिता : बोम्बे। १९२९ ।
- मिश्रः, वाचस्पतिः। **साङ्ख्यतत्त्वकौमुदी** । सम्पा. श्रीनारायणचन्द्र गोस्वामी । संस्कृत पुस्तक भान्डार : कलिकाता । १४०६ बङ्गाब्दः।
- **बृहदारण्यकोपनिषद्** । गीताप्रेस : गोरक्षपुर ।
- **छान्दोग्योपनिषद्** (शाङ्करभाष्यसहिता) । गीताप्रेसः गोरक्षपुर ।
- वात्स्यायनः । **न्यायभाष्यम्** । सम्पा. प्रसन्नपदटीकाकार सुदर्शानाचार्य । द्वारिकादासशास्री सुधी प्रकाशन । १९८६ ।
- गौतमः, महर्षि । **न्यायसूत्रम्** । सम्पा. गंगानाथझा। ओरियेन्टाल वुक एजेन्सि : पुणे । १९३९ ।
- सदानन्दकृतः । **वेदान्तसारः** । व्याख्याकारः डां. राकेश शास्त्री । परिमल पाब्लिकेशन्स : दिल्ली।

# पूर्वमीमांसादर्शने ध्वनितत्त्वविमर्शः

## सुखेन-पोडेलः

**शोधच्छात्रः, साहित्यविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

**बी-४, कुतुबसांस्थानिककक्षेत्रम् ,नवदेहली – ११००१६**

**प्रबन्धसारः**

*अलङ्कारशास्त्रे यद्यपि भामहोद्भटवामनादीनां विवेचनेषु कुत्रचित् कस्यचिदमुख्यव्यापारस्य चर्चा दृश्यते किन्तु तत्र शब्दशक्तिरूपेण कश्चिद्विषयो नास्ति समालोचितः। साहित्ये सर्वप्रथमं ध्वन्यालोके आनन्दवर्धनाचार्येण ध्वन्यर्थस्यावगमनाय शब्दस्य शक्तिं विमृशताऽन्यशास्त्रेषु पूर्वतः स्वीकृतासु शक्तिषु तस्यान्तर्भावाभावात् व्यञ्जनाख्यो नवीनः शब्दव्यापारः स्वीकृतः ततस्तन्मतानुसारिभिरन्यैरपि ध्वनिवादिभिः। साहित्यशास्त्रं व्यतिरिच्य अन्येषु शास्त्रेष्वपि ध्वनेर्व्यवहारः दृश्यते। यथा पूर्वमीमांसादर्शनस्य अभिहितान्वयवादे अन्विताभिधानवादे च लावण्यमिव प्रतीयमानार्थध्वनिः स्वीकृतः। मीमांसाशास्त्रस्याभिहितान्वयवादे सङ्केतस्यापेक्षिणी पदार्थबोधिकाऽभिधा वाक्यार्थविबोधे असमर्था, वाक्यार्थविबोधनहेतुः शक्तिस्तात्पर्यम् अङ्गीक्रियते। तथैवान्विताभिधानवादे- अन्वितानां पदानां समभिव्याहारादन्वितार्थबोधनविरहादभिधैव केवलं वृताऽस्ति। परन्तु प्रतीयमानो योऽर्थः प्राधान्येन प्राप्तप्रसरोऽस्ति, स सङ्केताभावान्न अभिधाशक्तिनिष्पन्नवाच्यार्थः, हेतुत्रितयाभावान्न च लक्ष्यार्थः अपि तु एभ्योऽर्थेभ्यः सर्वथा विलक्षणः कश्चिदन्य एव, यस्य केवलं व्यञ्जनाव्यापारेणैवावबोधः सम्भवति। 'तस्मादभिधा-तात्पर्य-लक्षणा-व्यतिरिक्तश्चतुर्थोऽसौ शब्दव्यापारो ध्वनन-द्योतन-व्यञ्जन-प्रत्यायन-अवगमनादिसोदरव्यपदेश-निरूपितोऽभ्युपगन्तव्यः' इत्यभिनवगुप्तपादानामभिमतम्। अतः वाक्यार्थविबोधने अभिहितान्वयवादिनः यां शक्तिं तात्पर्य्यमिति कथयन्ति आलङ्कारिकदृष्ट्या सैव ध्वनिः। अत एव व्यञ्जनाव्यापारस्य नान्तर्भावो भवितुमर्हति अभिधालक्षणातात्पर्यादिव्यापारेषु स्वरूपभेदात् न वा स्मृत्यनुमित्योरननुभवाच्छब्दव्यापारवत्त्वाच्च। एवमेव अन्विताभिधानवादिमतेन केवलम् अभिधाशक्त्या वाक्यार्थबोधः भवति।*

**कुञ्चीशब्दाः** – ध्वनिः , अभिहितान्वयवादः , अन्विताभिधानवादः , शक्तिः , संकेतः चेत्यादयः।

*****************************************************************************

## भूमिका

यावदेवालोच्यते साहित्यं तावदेव तत्रोत्तरोत्तरं माधुर्यं समनुभूयते सहृदयैः। अतः साहित्यविद्याया गभीराद् गभीरतरमालोचनं विधाय विविधानि प्रस्थानानि प्रवर्तितानि साहित्यसमीक्षकैः साहित्यशास्त्र-परम्परायाम्। तत्र रसः, अलङ्कारः, गुणः, रीतिः, ध्वनिः, वक्रोक्तिः, औचित्यञ्च काव्यस्य सारतयाङ्गीकृतानि तत्तत्प्रस्थानप्रस्थापनप्रमुखैः। तेषु ध्वनिसिद्धान्तोऽन्यतमः।

ध्वनिसिद्धान्तोऽयं कस्यचित् कल्पनाप्रसूतो नास्ति। अस्य ध्वनिसिद्धान्तस्य मूले प्राचीनवैयाकरणानाम् उक्तिर्विद्यमाना वर्तते। यतो हि व्याकरणशास्त्रं सर्वेषु शास्त्रेषु मूलं वर्तते। अतः आदौ हि विद्वांसः वैयाकरणाः। प्रथमं ध्वनिशब्दस्य व्यवहारः पतञ्जलिभर्तृहरिप्रभृतिभिः महावैयाकरणैः प्रधानभूते स्फोटरूपेऽर्थे स्वीक्रियते। महावैयाकरणेन आचार्यभर्तृहरिणा लिखितं यत् –

उपासनीयं यत्नेन शास्त्रं व्याकरणं महत्।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम्।।[1]

अत एव व्याकरणशास्त्रस्य यत्नपूर्वकमध्ययनं कर्तव्यं, यतो हि शास्त्रेणानेन सर्वाः विद्याः प्रकाशिताः सन्ति। वैयाकरणमतानुसारेण

---

[1] वाक्यपदीयम् ।

श्रूयमाणाः वर्णाः 'ध्वनिः' इति प्रोक्ताः तथा अयं ध्वनिः व्यञ्जको भवति। अमरकोषानुसारं ध्वनिशब्दस्य व्युत्पत्तिः 'ध्वननमिति ध्वनिः'। पस्पशाह्निके शब्दस्वरूपनिरूपणप्रस्तावे महाभाष्यकारः- 'प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। शब्दं कुरु। मा शब्दं कार्षीः, शब्दकार्ययं माणवकः इति ध्वनिं कुर्वन् एवम् उच्यते, तस्माद् ध्वनिः शब्दः'[2] इत्युक्तम्। व्यङ्ग्यार्थः, व्यञ्जकः शब्दः, व्यञ्जकोऽर्थः व्यञ्जनाव्यापारश्चेति चत्वारो ध्वनयो वर्तन्ते। एतेषां योगेन समुदायरूपकाव्यं 'ध्वनिपदवाच्यं' भवति।

वैयाकरणमतानुसारिभिः आलङ्कारिकैरपि येनार्थेन वाच्योऽर्थः क्रियते तादृशस्य व्यङ्ग्यस्य ध्वनने समर्थस्य शब्दार्थयुगलस्य ध्वनिरिति व्यवहारः। लोकोत्तरवर्णनानिपुणकविकर्मरूपस्य रसादिव्यञ्जना-व्यापारप्रधानस्य चारुशब्दार्थयुगलकाव्यस्य आत्मा ध्वनिः इति ध्वनिसम्प्रदायप्रतिष्ठापकाचार्याणां सिद्धान्तः। आनन्दवर्धनाभिनवगुप्तमम्मटादिभिः काव्यतत्त्वविद्भिः काव्यविशेषे ध्वनिशब्दस्य प्रयोगः कृतः। अतः ध्वनिप्रस्थानपरमाचार्येण आनन्दवर्धनेन एवमेव उक्तं -

"यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सुरिभिः कथितः।।"[3]

अतो यत्राऽर्थो वाच्यविशेषो वाचकविशेषः शब्दो वा तम् अर्थं व्यङ्क्तः स काव्यविशेषो ध्वनिः इति कथ्यते। अत्र तम् अर्थम् इति पदेन कोऽपि विलक्षणः सहृदयमात्रैकवेद्यो लावण्यवत्यां निखिलावयवातिशयि-लावण्यम् इवाऽनिर्वचनीयोऽर्थोऽभिप्रेतः।

उक्तं ध्वन्यालोके-

"प्रतीयमानं पुररन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।।"[4]

आचार्यानन्दवर्धनविरचिते ध्वन्यालोके ध्वनिशब्दस्य प्रयोगः पञ्चविधेषु अर्थेषु विहितो वर्तते- व्यङ्ग्यार्थः, वाचकशब्दः, वाच्यार्थः, व्यञ्जनाव्यापारः, काव्यञ्च। यथा आचार्याभिनवगुप्तेन उक्तं – "अर्थो वा शब्दो वा व्यापारो वा। अर्थोऽपि वाच्यो वा अर्थो वा शब्दोऽप्येवम्। व्यङ्ग्यो वा ध्वन्यत इति। व्यापारो वा शब्दार्थयोर्ध्वननमिति। कारिकया तु प्राधान्येन समुदाय एव काव्यरूपो मुख्यतया ध्वनिरिति प्रतिपादितम्।"[5] इति। व्यञ्जनं ध्वननं गमनं ध्वनिशब्दपदवाच्यं भवति।

ध्वनिशब्दस्य व्युत्पत्त्यनुसारेण ध्वनिशब्दस्य इत्थं योजना भविष्यति -

(१) ध्वनति इति ध्वनिः, व्यञ्जके शब्दे (२) ध्वनतीति ध्वनिः व्यञ्जकेऽर्थे , (३) ध्वन्यतेऽनेनेति ध्वनिः व्यञ्जनाव्यापारे (४) ध्वन्यते य इति ध्वनिः, रसादिव्यङ्ग्यार्थे (५) ध्वन्यतेऽस्मिन्नति ध्वनिः, काव्यविशेषे। प्रथमानुसारेण वाच्यार्थो वाचकशब्दो ध्वनिशब्देनाभिहितो वर्तते, द्वितीयानुसारेण केवलं व्यङ्ग्यरूपार्थो ध्वनिर्वर्तते तथा तृतीयानुसारेण व्यञ्जनाव्यापारो ध्वनिर्वर्तते चतुर्थमतानुसारेण रसादिरूपव्यङ्ग्यार्थे ध्वनिर्वर्तते, पञ्चममतानुसारेण काव्यविशेषे गृह्यते। ध्वनिस्वरूपविषये आचार्यमम्मटेन एवमेव उक्तं यत् –

"बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्य-व्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहार कृतः।"[6]

---

[2] पस्पशाह्निके

[3] ध्वन्यालोकः, १/२३

[4] ध्वन्यालोकः, १/४

[5] ध्वन्यालोके १/३-इत्यस्य व्याख्यायां लोचनटीकायाम्, शिवप्रसादद्विवेदिसम्पादिते ध्वन्यालोके पृष्ठम् - ९४

[6] काव्यप्रकाशस्य प्रथमोच्छ्वासस्य चतुर्थकारिकाया व्याख्यायाम्।

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

**अभिहितान्वयवादे ध्वनितत्त्वम्**

व्यञ्जनावृत्तिविषये मीमांसकेषु अपि मतद्वयमवलोक्यते। तत्र प्रथममतावलम्बिनः कुमारिलभट्टानुसारिणः अभिहितान्वयवादिनस्तथा द्वितीयमतानुसारिणः प्रभाकरमतानुसारिणः अन्विताभिधानवादिनः। तत्राभिहितान्वयवादिनां मतानुसारं वाक्यान्तर्गतानां पदार्थानामर्थबोधः प्रथममभिधया भवति। ततः परं ते पदार्थाः अन्विताः भूत्वा विशिष्टरूपं वाक्यार्थं बोधयन्तीति भाट्टानामभिहितान्वयवादः। यथा शाबरभाष्ये शबरस्वामिना निगदितं – "अमूनि पदानि स्वं स्वमर्थमभिधाय निर्वृत्तव्यापाराणि अथेदानीं पदार्थाः अभिहिताः सन्तो वाक्यार्थमवबोधयन्ति"[7]।

भाट्टाः प्रथमम् अभिधाशक्त्या घटपटादीनां पदानां घटत्वपटत्वादीन् सामान्यानर्थानङ्गीकुर्वन्ति। ततः परं योग्यताकाङ्क्षासत्तितात्पर्यबलेन सामान्यानामर्थानां विशिष्टेऽर्थे पर्यवसितिर्भवति तेन योग्यताकाङ्क्षादिबलेन वाक्यार्थज्ञानं बोध्यते। यथा वाचस्पतिमिश्रमहोदयेन स्वकीये तत्त्वबिन्दुग्रन्थे उक्तं –

"तथा च तेऽर्थाः क्रियादयः स्वसामर्थ्येन स्वरूपमात्रेण पदैरभिहिता विना कारकादिभिरपर्यवस्यन्तस्तदाकाङ्क्षा-योग्यतासत्तिसहकारिणो वाक्यार्थधियमादधतीति युक्तम्"[8] इति। तस्याभिप्रायः अयमस्ति यत् रामः ग्रामं गच्छति इति वाक्येऽस्मिन् रामकर्तृकग्रामकर्मकगमना-नुकूलो व्यापारः इत्याख्यो यः शाब्दबोधो जायते; तस्मिन् शब्दस्य केनापि व्यापारेण भाव्यम्। तत्र वाक्ये अभिधाशक्त्या केवलं रामः रामत्वं तदुभयसम्बन्धादीनाम् अर्थानां बोधः सम्भवति किन्तु वाक्येनानेन वाक्यार्थो नावगम्यते। अतएव रामशब्दस्य रामाभिधेयः कश्चिदिति , ग्रामशब्दस्य ग्रामाख्यः कश्चिदर्थः अम्-प्रत्ययस्य कर्मत्वं चेति अर्थनिष्पादनं भवति। किन्तु रामकर्तृकग्रामकर्मकगमनानुकूलो व्यापारः इति वृत्तिरुपोऽन्वितोऽर्थः न लभ्यते शक्त्या, अत एव पदार्थत्वधर्मरहितो वृत्तिरुपोऽर्थः आकांक्षासन्निधि-योग्यताबलेनाभिधाभिन्नया लक्षणया अवगम्यते। तासां योग्यतादीनां किं स्वरूपमिति विषये यथा परमलघुमञ्जूषायां नागेशभट्टेन एवमेव निरूपितं – "वाक्यसमयग्राहिका आकांक्षा। सा चैकपदार्थज्ञाने तदर्थान्वययोग्यार्थस्य यज्ज्ञानं तद्विषयेच्छा अस्यान्वय्यर्थः कः इत्येवंरूपा पुरुषनिष्ठैव। ..... योग्यता परस्परान्वयप्रयोजकधर्मवत्त्वम्। तेन पयसा सिञ्चतीति वाक्यं योग्यम्। अस्ति च सेकान्वयप्रयोजकद्रवद्रव्यत्वं योग्यता जले। .... वह्निना सिञ्चतीति वाक्यमयोग्यम्। वह्नेः सेकान्वयप्रयोजकद्रवद्रव्यत्वाभावात्। ..... प्रकृतान्वय-बोधाननुकूलपदाव्यवधानमासत्तिः। गिरिरग्निमानि-त्यासन्नम् अनासन्नञ्च गिरिर्भुक्तमग्निमान् देवदत्तेनेति।"[9]

एवम्प्रकारेण विशेषणकल्पैः पदान्तरैर्योऽर्थः विशिष्टः समवभासते स एव वाक्यार्थनाम्नाऽभिधीयते। भाट्टानामनुसारेण जातौ शब्दानां शक्तयः सहजेन स्वाभाविकरूपेण वा भवन्ति। जातेरमूर्तत्वात् तस्यामवस्थायां गोशब्दद्वारा यथा व्यक्तेरेवगमः लक्षणाद्वारा भवति, तथा प्रकारेण संसृष्टानामर्थानां लक्षणावृत्त्यैव विशिष्टेऽर्थे अन्वितत्वात् वाक्यार्थज्ञानं सञ्जायते। अत एवान्वयसाधिका वृत्तिर्लक्षणा भाट्टमीमांसकानां मतेऽस्ति नैव तात्पर्याख्या वृत्तिर्लक्षणा भाट्टमीमांसकानां मतेऽस्ति किन्तु मम्मटादिभिराचार्यैरिदमेव भणितं यत्तात्पर्यवृत्त्यैव

[7] १/१/२५-इति मीमांसासूत्रस्य शाबरभाष्यम्।

[8] तत्त्वबिन्दुः, पृष्ठम् -९१

[9] परमलघुमञ्जूषायाः शाब्दबोधसहकारिकारणनिरूपणे।

मीमांसकानां वाक्यार्थज्ञानं भवति। तद्यथा- "आकांक्षायोग्यतासन्निधिवशाद् वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसत्यभिहितान्वयवादिनां मतम्"[10]। वाच्यो वाक्यार्थः इत्यभिहितान्वयवादिनः।" या तात्पर्यशक्तिः विश्वनाथमम्मटादिभिरुक्ताभिहितान्वय-वादविवेचनप्रसङ्गे तस्याः प्रथमं कथनं न्यायमञ्जर्यां जयन्तभट्टः उक्तवान् तद्यथा –

"अभिधात्री मता शक्तिः पदानां स्वार्थनिष्ठता।
तेषां तात्पर्यशक्तिस्तु संसर्गावगमावधिः।।"[11] इति।

जयन्तभट्टाचार्यः केन प्रकारेण वाक्यार्थः अवबुध्यते इति गहनेन निरूपयन् अभिहितान्वयवादमन्विता-भिधानवादञ्च सम्यक् विमृश्य संसर्गावगमाय तात्पर्यनाम्नी वृत्तिरेवाङ्गीकरणीयेति प्रतिपादितवान्। भाट्टमीमांसकानां मतेन ध्वनिसमर्थकानां चतुर्थीं वृत्तिं प्रत्यवतिष्ठमानानां प्रतीयमानोऽर्थः शास्त्रप्रसिद्धयाभिधयैव सिध्यतीति। "गङ्गायां घोषः" "सिंहो माणवक" इत्यत्र काष्ठमृन्निर्मिताभीरपल्लीरूपिणो घोषस्य जलप्रवाहे आधाराधेयसम्बन्धेनानवस्थानात् वटोश्च सिंहत्वाभावात् पदार्थानामन्वये चिकीर्षिते मिथः यथा मुख्यार्थावगमः सम्भवति न तथा धार्मिकभ्रमणविघ्नरूपिणि शुनि सिंहेन मारिते भ्रमणनिरोधकहेत्वभावात् धार्मिकस्य तस्य भीतस्य शङ्काराहित्यपूर्वकं वने भ्रमणमिति प्रतीयते तथा विधिरूपोऽर्थः दृप्तसिंहादिपदार्थैः परस्परमन्वयम् अलभमानो बाधितो भवति। भाट्टमीमांसकानां मतेन या तात्पर्य्यवृत्तिः सा एव आलङ्कारिकानां मते ध्वनिरित्युच्यते। यतः अभिनवगुप्तपादानाम् अभिमतमानुसारेण - "तस्मादभिधा-तात्पर्य-लक्षणा-व्यतिरिक्तश्चतुर्थो-ऽसौ शब्दव्यापारो ध्वनन-द्योतन-व्यञ्जन-प्रत्यायनावगमनादिसोदरव्यपदेशनिरूपितो-ऽभ्युपगन्तव्यः"[12] इति। अत एव व्यञ्जनाव्यापारस्य नान्तर्भावो भवितुमर्हति अभिधालक्षणातात्पर्यादि-व्यापारेषु स्वरूपभेदात् न वा स्मृत्यनुमित्योरननुभवाच्छब्दव्यापारवत्वाच्च।

**अन्विताभिधानवादे ध्वनितत्त्वम्**

दृप्तसिंहयुक्ते गोदावरीतीरे भ्रमणं तव धार्मिकस्य विघ्नरहितं जातमिति अन्वयकोटिमाटीकते नात्र काचिदपि हानिः अर्थोऽयमेव व्यञ्जनाख्यया वृत्त्या अन्विताभिधानवादिभिस्तु प्रत्यायते। अन्विताभिधान-वादिनस्तु प्राभाकराः पदानामन्वितानां पदार्थानामभिधानमन्वितैः पदैरिति कथयन्तोऽन्वयरूपे वाक्यार्थेऽपि पदानामभिधयैव शक्तिरिति वदन्ति। वेदार्थमेव वाक्यार्थमिति मन्यन्ते। अत्र एव संसर्गावगमार्थमन्वितिसधिकायाः तात्पर्यनामिकायाः वृत्तेः विचारणा निर्मूलिकैव प्रतिभाति। व्यवहारेणान्वितस्यैवार्थस्योपस्थितेस्तत्रैव च शक्तिग्रहात्। लोके तु प्रवृत्तिनिवृत्त्योः प्रयोजकं वाक्यमेव भवति। यया गामानयेत्यादिवृद्धेनादिश्यते तदा मध्यमवृद्धेन सास्नापुच्छादिमतः गोव्यक्तेरानयनं क्रियते तदा बालस्तत्पदानां तत्तदर्थे स्वनवगतपूर्वसंकेतः सः प्रारम्भे व्यवहारादेव तेषां पदानां तानर्थान् अवगच्छति। यथा मुक्तावल्ल्यां-

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्
व्यवहारतश्च।

[10] काव्यप्रकाशस्य द्वितीयोल्लासः।

[11] न्यायमञ्जर्याः शक्तिनिरूपणे

[12] शिवप्रसादद्विवेदिसम्पादिते ध्वन्यालोके प्रतीयमानं पुनरन्यदेव इति कारिकाया व्याख्यायाम्, पृष्ठम् - ५४

वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥[13]

इति विवेचनानुसारं शक्तिग्रहस्याष्टौ निमित्तानि किन्तु व्यवहार एव प्रमुखं कारणं शक्तिग्रहणे। प्रवृत्तिनिवृत्तिप्रयोजकत्वात् अर्थानामन्वितानाम् एव उपस्थितिर्भवति। एवम्प्रकारेण व्यवहारेणान्वितैः पदैरन्वितानामेवार्थानामुपस्थितिः। पदार्थ एव वाक्यार्थः अपदार्थस्य वाक्यार्थत्वं न सम्भवतीति यथा न्यायरत्नमालायाम्।

पदार्थानेव वाक्यार्थान्मिथः सङ्गतिशालिनः।
आचक्षतेऽभिधीयन्ते पदैस्ते च तथाविधाः॥[14]

तथा च न्यायमञ्जर्यामपि यथा निगदितं -

वक्ता वाक्यं प्रयुङ्क्ते च संसृष्टार्थविवक्षया।
तथैव बुध्यते श्रोता तथैव च तटस्थितः॥[15]

अन्वितेऽर्थे शक्तिग्रहात् व्यवहारे चान्वितस्यैवार्थस्योपयोगित्वादन्वित एवार्थोऽभिगम्यते। अतः पदार्थानामेव वाक्यार्थता न तु पदार्थानां विशिष्टता यथा काव्यप्रकाशस्य श्रीधरटीकायां शक्तिग्रहणविषये उच्यते – “प्रयोगपतितानामवापोद्धापाभ्यां शक्तिग्रहणं, ततश्च योग्यपदार्थान्तरान्वित एव स्वार्थे शक्तिर्गृह्यते इति संसर्गात्मको वाक्यार्थः शक्तिगोचर एवेत्यभिधानवादिनः प्रभाकरगुरोर्मतमिति सम्बन्धः”[16] इति। तथा च न्यायमञ्जर्यामपि- “एकार्थः पदसमूहो वाक्यमिति वाक्यविदः। ...... यथा च शिबिकायाम् उद्यन्तारः सर्वे शिबिकामुद्यच्छन्ति यथा त्रयोऽपि ग्रावाण उखां बिभ्रति तथा सर्वाण्येव पदानि वाक्यार्थमवबोधयन्ति”[17] इति।

एवम्प्रकारेण प्राभाकराणां मीमांसकानाम् अन्विताार्थाभिधायिका वृत्तिरपि व्यङ्ग्यार्थमवभासयितुं न शक्नोति। यथा गामानयेत्यस्मिन् वाक्ये गोपदस्य गोव्यक्तिरूपो विशिष्टोऽर्थो यदि शक्त्या नैव गम्यते व्यक्तिरूपिणि असामान्येऽर्थे शब्दानां संकेतश्चेत्तर्हि आनन्त्यव्यभिचारप्रसङ्गस्यापादानं दुर्वारं भविष्यति। एवं पदानां सामान्यस्यार्थस्य कर्तृत्वकर्मत्वरूपेण अन्वयादभिधायाः सामर्थ्यं तत्प्रत्यायनपर्यन्तमेव। प्राभाकराणामभिधा नाम्नी वृत्तिः गोव्यक्तिरूपिणं विशिष्टमर्थं कर्तृत्वकर्मत्वरूपेण मिथोऽन्वितं पदार्थं प्रोच्य तमर्थं विशिष्टं प्रत्याययितुं नैव शक्नोति।

एतावताभिहितान्वयवादे शक्त्या शब्दानां सामान्यार्थबोधस्तात्पर्यवृत्त्या मिथोऽन्वयप्रतीतिः। तथाभिधयैवान्विताभिधानवादे मिथोऽन्वितानामर्थानां बोधः। एवम्प्रकारेणान्वितेऽर्थे एव तात्पर्याभिधयोः पर्यवसितिरवलोक्यते। व्यङ्ग्यार्थविभासने कस्या अपि वृत्तेः सामर्थ्यं व्यञ्जनातिरिक्तायाः नावलोक्यते यथैकावल्यां विद्याधरः-

“यथा संकेतनिकेतनीकृतविशिष्टरूपवाक्यार्थाभिधायिनो वाक्यस्य स्ववाच्यानतिरिक्ता संकेतितातिविशेषभूतपदार्थाभिधानेऽपि न सामर्थ्यं तत्रार्थान्तरभूतः प्रतीयमानः कथमिवावतरिष्यतीति वाचनीयताम्”[18] इति।

एवम्प्रकारेणाभिधातात्पर्यादिभिः व्यञ्जनावृत्तेः निरसनं कदापि कर्तुं कैरपि न शक्यते। तथा च व्यङ्ग्यार्थविभासनाय सैव वृत्तिः सर्वथा प्रभवतीति कृत्वा व्यञ्जनाया अस्वीकरणं नोचितम्।

---

[13] न्यायसिद्धान्तमुक्तावली ( शब्दखण्डः ) ।

[14] न्यायरत्नमाला ।

[15] न्यायमञ्जरी ।

[16] शिवप्रसादभट्टाचार्यसम्पादितकाव्यप्रकाशस्य द्वितीयोल्लासः, पृष्ठम् - २०

[17] सूर्यनारायणशर्मशुक्लसम्पादितन्यायमञ्जर्याः प्रमाणप्रकरणम्, पृष्ठम् - ३६६

[18] पुल्लेलश्रीरामचन्द्रुडुसम्पादिता एकावली, पृष्ठम् - ३६

## सहायकग्रन्थसूची


- आनन्दवर्धनः। १९८२ । ध्वन्यालोकः। सम्पादकः के. कृष्णमूर्तिः। वाराणसी : मोतिलाल-वनारसीदासः।
- आनन्दवर्धनः। २०१५ । ध्वन्यालोकः (लोचनसहितः भावप्रकाशिकाहिन्दीटीकोपेतश्च)। सम्पादकः शिवप्रसादः द्विवेदी। वाराणसी : चौखम्बा सुरभारती प्रकाशन।
- आनन्दवर्धनः। २०१६ । ध्वन्यालोकः। सम्पादकः सत्यनारायणचक्रवर्ती। कलकाता : संस्कृत-पुस्तक-भाण्डारः।
- जयन्तभट्टः। १९९३ । न्यायमञ्जरी। सम्पादकः सूर्यनारायणशर्मशुक्लः। वाराणसी :चौखम्बा-संस्कृत-सिरिजः।
- जैमिनिः। १९५५ । मीमांसादर्शनम्। सम्पादकः मण्डनमिश्रः। जयपुर : राधाकृष्णमहेश्वरी।
- भट्टाचार्यः, विश्वनाथन्यायपञ्चाननः। १९७२ । न्यायसिद्धान्तमुक्तावली। सम्पादकः श्रीकृष्णवल्लभाचार्यः। वाराणसी : चौखम्बा संस्कृत सीरिज।
- भर्तृहरिः। २००३। वाक्यपदीयम् (ब्रह्मकाण्डम् )। खण्डुरी, सत्यनारायणः। वाराणसी : चौखम्वा-संस्कृत-संस्थानम्।
- मम्मटः। १९५९। काव्यप्रकाशः श्रीधरकृतकाव्यप्रकाशविवेकाख्यटीकया समन्वितः प्रथमो भागः। सम्पादकः शिवप्रसादभट्टाचार्यः। कलिकाता : संस्कृतमहाविद्यालयः।
- मम्मटः। २०२३ । काव्यप्रकाशः। सम्पादकः पं सत्यनारायणशास्त्री। वाराणसी : चौखम्बा-कृष्णदास-अकादेमी।
- मिश्रः, वाचस्पतिः। १९३६ । तत्त्वबिन्दुः। सम्पादकः रामस्वामिशास्त्री। त्रिशिरपुरम् : सैण्ट् जोसेप्स् इण्डस्ट्रियल् स्कूल।
- विद्याधरः। १९८१ । एकावली। सम्पादकः पुल्लेलश्रीरामचन्द्रुडुः। हैदराबादः : उस्मानियाविश्व-विद्यालयः।

# आधुनिककाले पुरुषार्थान्तर्गतधर्मस्य विर्वतनम्

**जलि-रायः**
**शोधछात्रः, संस्कृतविभागः, सवं-सजनीकान्त-महाविद्यालयः**
**पश्चिममेदिनीपुरम्, पश्चिमबङ्गः**

**प्रबन्धसारः**

*पुरुषार्थः हि भारतीयदर्शनसम्प्रदायेषु अन्यतमः मुख्यो विषयः । पुरुषैः अर्थ्यते इति पुरुषार्थः इति व्युत्पत्त्या पुरुषः जीवने यत् वाञ्छति तदेव पुरुषार्थपदवाच्यं भवति। मनुष्यजीवने कामनादयः चतुर्षु पर्वसु सञ्ज्ञिताः- धर्मः, अर्थः, कामः, मोक्षः च। धर्मः अर्थः कामः मोक्षः इत्येते चत्वारः मुख्याः पुरुषार्थाः। एते चत्वारः साकल्येन चतुर्वर्ग इत्युच्यते। धमर्थिकामाः त्रय एव मुख्यपुरुषार्थाः इति केचन मन्यन्ते, त्रिवर्ग इति च कथयन्ति। धर्मो हि पुरुषार्थेषु प्रथमः पुरुषार्थः। प्रत्येकं चेतनो जीवः स्वस्य वर्तमानस्थितेः उन्नतां स्थितिं वाञ्छति। जीवस्य उन्नतस्थितिकामनारूपस्य अस्य अभ्युदयस्य मुख्यं साधनं हि धर्मः। सम्पूर्णस्य विश्वस्य सर्वमपि कल्याणम् एतद्धर्माश्रितं वर्तते। धर्मेण हि रक्षिता भवन्ति सर्वे प्राणिनः। धर्मेणैव मनुष्याः स्वव्यवहारं संवर्ध्य कामनां पूरयन्ति। सामान्यतया जनाः धर्मशब्दस्य व्यापकार्थं न स्वीकृत्य सम्प्रदायजात्याचारानुष्ठानपूजापद्धतियज्ञादिषु सङ्कीर्णार्थेषु तं शब्दं गृह्णन्ति। वस्तुतस्तु यः धर्मः आचर्यते तेन सह पुरुषार्थस्य धर्मस्य महान् भेदः वर्तते। आधुनिककालीनः धर्मः धर्मीयाचार-अनुष्ठान-सामाजिकप्रतिष्ठा-वैयक्तिकपरिचयबुद्धिसम्बद्धः अस्ति। पुरुषार्थरूपस्य धर्मस्य मुख्योद्देश्यं हि नैतिकता तथा आध्यात्मिकोन्नत्या सह कस्यचित् सम्प्रदायविशेषस्य संस्कृति-ऐतिह्यविषये अविचलता।*

**कुञ्चीशब्दाः** - पुरुषार्थः, चतुर्वर्गः, धर्मः, ऋतः, आध्यात्मिकोन्नतिः चेत्यादयः।

***************************************************************************

## भूमिका -

भारतीयदर्शनसम्प्रदायेषु अन्यतमः मुख्यो हि विषयः पुरुषार्थः। पुरुषाणाम् अर्थः पुरुषार्थः इति वा पुरुषैः अर्थ्यते इति पुरुषार्थः इति वा व्युत्पत्त्या पुरुषः जीवने यत् वाञ्छति तदेव पुरुषार्थपदवाच्यं भवति। सामान्यतया अयं पुरुषार्थशब्दः पुरुषशब्दस्य अर्थशब्दस्य च योगेन निष्पन्नः। पुरुषार्थविषये पुरुषशब्दस्य व्युत्पत्तिर्हि- पुः पुरं शरीरञ्च। पुरि शेते इति पुरुषः इति। यः पुरे शरीरे शेते सः पुरुषः इत्युच्यते। एतद्व्युत्पत्त्यनुसारेण पुरुषशब्दस्य मौलिकार्थः जीवः भवति। योगरूढार्थः स्वीक्रियते चेत् अस्यार्थो भवति मनुष्यः। तस्मात् पुरुषशब्देन जीवमनुष्ययोः उभयोः ग्रहणं भवति। किन्तु जीवमात्रेण यः प्रार्थ्यते स पुरुषार्थः इति स्वीक्रियते चेत् मोक्षरूपस्य परमपुरुषार्थस्य असाङ्गत्यम्। तस्मात् पुरुषः इत्यनेन केवलं मनुष्य एव बोध्यते। प्रसङ्गेऽस्मिन् नारायणशर्मणा उक्तम्-

> “आहारनिद्राभयमैथुनञ्च
> सामान्यमेतत्पशुभिर्नराणाम्।
> धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः
> समानाः॥”[1]

श्रीमद्भागवतमहापुराणे पुरुषार्थविषये आम्नातं- “पुरुषत्वे च मां धीराः। बहवः सन्तिः पुरः सृष्टास्तासां मे पौरुषी प्रिया एवं पुरं पुरुषमात्मवान्”[2] इति।

यतः सर्वप्रयोजनसिद्धिः भवति सः पुरुषार्थः इति एका व्युत्पत्तिः। अर्थ्यते प्राप्यते सर्वैः यः अर्थः सः पुरुषार्थः इति द्वितीया व्युत्पत्तिः।

अस्य पुरुषार्थशब्दस्य वेदे कोऽपि उल्लेखः नास्ति चेदपि अस्य बीजं वेदे एव निहितमिति सर्वेषां विदितचरम्। वेदे पुरुषार्थशब्दस्य उल्लेखो नास्ति

---

[1] हितोपदेशः मित्रलाभः, पृ. २०

[2] श्रीमद्भगवद्गीतपुराणम् १.७.२१

चेदपि वेदात् परवर्तिकाले प्रणीतेषु स्मृतिशास्त्रपुराणमहाभारत-रामायणादिषु साहित्येषु पुरषार्थस्य विस्तृतमालोचनं परिलक्ष्यते। मनुस्मृतौ पुरुषार्थविषये कथितं-

"धर्मार्थावुच्यते श्रेयःकामार्थौ धर्म एव च।
अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थितिः॥"[3]

मनुष्यजीवने कामनादयः चतुर्षु पर्वसु सञ्जिताः- धर्मः अर्थः कामः मोक्षः च। महाभारते पुरुषार्थविषये लिखितं-

"धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥"[4]

पुरुषार्थशब्दः वर्गशब्दश्च समानार्थकत्वेन बहुषु शास्त्रेषु प्रयुज्येते। धर्मः अर्थः कामः मोक्षः इत्येते चत्वारः मुख्याः पुरुषार्थाः। एते चत्वारः साकल्येन चतुर्वर्ग इत्युच्यते। धर्मार्थकामाः त्रय एव मुख्यपुरुषार्थाः इति केचन मन्यन्ते, त्रिवर्ग इति च कथयन्ति। त्रिवर्गचतुर्वर्गयोः संज्ञाविषये उक्तं- "त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समीक्षकैः"[5] इति। भारतीयसंस्कृतौ त्रिवर्गस्य महत् स्थानं प्रदत्तम्। यथार्थं त्रिवर्गस्य पालनं क्रियते चेत् साध्यः मोक्षः प्राप्यते। महाभारते उक्तं-

"त्रिवर्गसाधने यत्नः कर्तव्यो गृहमेधिना।
तत्संसिद्धौ गृहस्थस्य सिद्धरत्र परत्र च॥"[6]

धर्मो हि पुरुषार्थेषु (धर्म-अर्थ-काम-मोक्षेषु) प्रथमः पुरुषार्थः। धर्म एव मनुष्यसभ्यतायाः संस्कृतेः मूलाधारः। प्रत्येकं चेतनो जीवः स्वस्य वर्तमानस्थितेः उन्नतां स्थितिं वाञ्छति। जीवस्य उन्नतस्थितिकामनारूपस्य अस्य अभ्युदयस्य मुख्यं साधनं हि धर्मः। सम्पूर्णस्य विश्वस्य सर्वमपि कल्याणम् एतद्धर्माश्रितं वर्तते। सामान्यतया जनाः धर्मशब्दस्य व्यापकार्थं न स्वीकृत्य सम्प्रदायजात्याचारानुष्ठानपूजापद्धतियज्ञादिषु सङ्कीर्णार्थेषु तं शब्दं गृह्णन्ति।

धृधातोः मन्-प्रत्यये धर्मशब्दः निष्पद्यते। अस्य धर्मशब्दस्य त्रिधा व्युत्पत्तिः कर्तुं शक्यते-

1) ध्रियते लोकः अनेन स धर्मः।

2) धरति धारयति वा लोकम्।

3) ध्रियते लोकयात्रानिर्वाहार्थं यः सः धर्मः।

अत्र धृधातोः निष्पन्नस्य धर्मशब्दस्य अत्र धारणम्।

किञ्च, नपुंसकलिङ्गस्य धर्मन्-शब्दस्य ऋग्वेदे यज्ञार्थेऽपि प्रयोगो दृश्यते। निरुक्ते यास्काचार्येण उक्तं- "धर्म इति यज्ञस्य नाम"[7] इति। ऋग्वेदे प्रयुक्तस्य पुंलिङ्गस्य धर्मन्-शब्दस्य अर्थस्तु धारकः।

**भारतीयशास्त्रे धर्मः**

धर्मेण हि रक्षिता भवन्ति सर्वे प्राणिनः। स्वभावः, परिचयः, नियमः, प्रेरणा, प्राप्तिः इत्येवं विविधरूपेण धर्मः मनुष्यहृदयेषु प्रकाशितः अस्ति। धर्मेणैव मनुष्याः स्वव्यवहारं संवर्ध्य कामनां पूरयन्ति। छान्दोग्योपनिषदि धर्मशब्देन आश्रमव्यवस्थायाः कर्तव्यविशेषाः उक्ताः। धर्मस्कन्धो नाम यज्ञः अध्ययनं दानं च, तपः चान्द्रायणादिव्रतं वा, आजीवनं गुरुगृहे वसतः ब्रह्मचर्यम् अवलम्ब्य देहावसानम् इत्येते धर्मप्रकाराः छान्दोग्योपनिषदि उक्ताः। बृहदारण्यके धर्मो हि नियामकः, तस्य स्वरूपं हि सत्यम्। उक्तं च- "अबलीयान् बलीयांसमाशंसते धर्मेण"[8] इति।

महर्षिः मनुः धर्मविषये कथयति-

"वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।

[3] मनुसंहिता ११.२२४

[4] महाभारतम् १.६२.५३

[5] अमरकोशः ब्रह्मवर्गः २.१४७

[6] महाभारतम्

[7] निरुक्तम् ३.१३

[8] बृहदारण्यकोपनिषद् १.४.१४

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

एतच्चतुर्विधं प्राहुः साक्षाद् धर्मस्य लक्षणम्॥"[9]

इति

वेदः स्मृतिः सदाचारः शास्त्रोक्तं कर्म इत्येतेषु यस्य अनुष्ठानेन स्वस्य मनःसन्तोषः भवति स धर्म इत्युच्यते। धर्मस्य प्रमाणत्वेन तेन उक्तं- "वेदोऽखिलो धर्ममूलम्"[10] इति।

आचार्यः याज्ञवल्क्यः मनुमतं समर्थयन्नाह-

"श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
सम्यक्सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम्॥"[11]

इति

त्रिवर्गपुरुषार्थेषु धर्मस्य महत्त्वं प्रदर्शयता तेन उक्तम्-

"अर्थकामेष्वसक्तानां धर्मज्ञानां विधीयते।
धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः॥"[12]

इति

आचार्येण मनुना दश मनुष्योचिताः वृत्तयः अभ्यासाश्च धर्म इत्युक्तं-

"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥"[13]

इति

कौटिल्याचार्येण त्रिवर्गपुरुषार्थेषु धर्मस्य प्राधान्यम् उक्तं, धर्मस्य यथोचितं पालनं कृत्वा अर्थकामयोः सेवा च उपदिष्टे। उक्तं च- "धर्मार्थाविरोधेन कामं सेवेत न निःसुखः स्यात्। एको हि अत्यासेवितो धर्मार्थकामनात्मानमितरौ च पीडयति"[14] इति।

धर्मः समग्रविश्वस्यापि धारकः, न केवलं मनुष्यसभ्यतायाः धारक इति तैत्तिरीयारण्यके उक्तं- "धर्मो विश्वस्य जगतः प्रतिष्ठा"[15] इति ।

ऋग्वेदे विश्वव्यापिनः नियमस्य द्योतकः शब्दः ऋतम्। संस्कृतसाहित्ये ऋतसत्यशब्दौ समानार्थे प्रयुज्येते। अमरकोषे उक्तं- "सत्यं तथ्यमृतं सम्यक्"[16] इति। ऋतशब्दस्य स्थाने धर्मशब्दस्य व्यवहारः भवति ब्राह्मणारण्यकग्रन्थेषु। पुराणे धर्मः सामान्यतया विशेषतया च विश्लेषितः। मनुष्यस्य सामान्यधर्मविषये गरुडपुराणे उक्तम्-

"अहिंसा सुनृता वाणी सत्यशौचे क्षमा दया।
वर्णिनां लिङ्गिनां चैव सामान्यो धर्म उच्यते॥"[17]

इति

कूर्मपुराणे धर्मः मोक्षहेतुतया समुल्लिखितः - "धर्म एवापवर्गाय"[18] इति। महाभारते धर्मविषये उक्तं-

"धारणाद्धर्ममित्याहुर्धर्मो धारयते प्रजाः।
यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः॥"[19]

इति

भारतीयदार्शनिकैः ये चत्वारः पुरुषार्थाः उक्ताः तेषु धर्मः प्रथमं स्थानम् आवहति। केवलं चार्वाका एव धर्मं मोक्षं च पुरुषार्थत्वेन न स्वीकुर्वन्ति। तन्मते अर्थकामौ एव पुरुषार्थौ। चार्वाकं विहाय अन्येषु सर्वेष्वपि दर्शनेषु धर्मः स्वीक्रियते। अर्थकामौ धर्मानाश्रितौ अनिष्टहेतू भवतः। तस्मात् धर्माश्रितौ एव अर्थकामौ भवेताम्। मनसो वृत्तिविशेषः धर्म इति सांख्या मन्यन्ते। शुभवासनैव धर्मः इति बौद्धानां मतम्। कार्योत्पादकः सूक्ष्मपुद्गलसमूहः धर्म इति जैनदर्शनम्। शास्त्रविहितं कर्म यागादिकं धर्म इति भाट्टमतम्। प्राभाकरास्तु यागादिजन्यः अपूर्वो धर्मः, न तु यागादिकम् इति स्वीकुर्वन्ति। न्यायमते आत्मविशेषगुणो हि धर्मः।

---

[9] मनुसंहिता २.१२
[10] तदेव
[11] याज्ञवल्क्यसंहिता २.६
[12] तदेव
[13] मनुसंहिता ५.९२
[14] अर्थशास्त्रम्, विनायाधिकारिकम्
[15] तैत्तिरीयारण्यकम्, १०.३६.१
[16] अमरकोषः, १.२२
[17] गरुडपुराणम्, ११६.२
[18] कुर्मपुराणम्, २.५५
[19] महाभारतम्, शान्तिपर्व .

धर्मविषये पाश्चात्यानां मनीषिणां मतेन सह भारतीयविदुषां मतं बहुत्र साम्यं गच्छति। म्याक्समुलारमहोदयेन उक्तम्-

"Religion is a mental faculty or disposition which enables man to apprehend the finite."[20] इति।

टायलारमहोदयस्य मते धर्मो हि आध्यात्मिकसत्तायां विश्वासः। उक्तं च-

"Religion is a belief in spiritual beings."[21] इति।

विषयेऽस्मिन् काण्टमहाभागेन कथितम्-

"Religion is the recognitions of all our duties as divine command."[22] इति।

**आधुनिककाले धर्मः**

वर्तमानकाले धर्मः बाह्याचारानुष्ठानसम्बद्धः अस्ति। आधुनिकधर्मे आध्यात्मिकतापेक्षया रीतिनीतीनां बाहुल्यम् अस्ति। साम्प्रतं तु राजनैतिकप्रभावविस्तारोपायतया, मनुष्येषु भेदजनकतया च अयं धर्मः व्यवह्रियते। आधुनिकः धर्मः सम्प्रदायविशेषस्य विश्वास-ईश्वरोपासना-आचार-अनुष्ठानेष्वेव सीमितः अस्ति।

वस्तुतस्तु यः धर्मः आचर्यते तेन सह पुरुषार्थस्य धर्मस्य महान् भेदः वर्तते। सर्वेषां धर्माणाम् आदर्शः एक इत्येव प्रायेण उच्यते। कश्चित् एकः धर्मः आश्रियते चेत् मनुष्येषु सौभ्रातृत्वशान्तिसञ्जीवनमनुष्यप्रीतयः विकसिताः भवन्ति। सर्वेष्वेव धर्मेषु केचन जनाः उदारचित्ताः, अन्येषु जनेषु भ्रातृत्वबोधसम्पन्नाः, सच्चरित्रवन्तः, परोपकारिणः सद्गुणान्तराधिकारिणश्च सन्ति। किन्तु समग्रः मनुष्यसमाजः दृश्यते चेत् ईर्ष्याद्वेषहिंसास्वार्थबुद्धिभेदबुद्ध्यादयः मनुष्यहृदयेभ्यः सम्पूर्णतया दूरीभूताः न कदाचित् अभवन्। अतः धर्मः यत् शिक्षयितुं प्रयतते तत् अन्ततः व्यर्थमेव पर्यवस्यति।

धर्मः मनुष्येषु ऐक्यबोधं न अजागः, जनेषु भेदं च असृजत्। धर्मः धर्मान्धतां जनयति। भारतवर्षे सनातनब्राह्मणाः जैनबौद्धयोः अभ्युदयं न अङ्गीकृतवन्तः। एकादशशतके कश्मीरस्य हिन्दुराजा हर्षः बौद्धमठान् अनाशयत्, सहस्रं बौद्धान् च अहन्। जैनधर्मोऽपि आक्रान्तः अभवत्। भारतवर्षे यवनशासनारम्भात् परं बौद्धधर्मः प्रायेण विलुप्तो जातः। सम्प्रति सम्पूर्णे जगति धर्मावलम्बिषु कलहहस्ताहस्त्यादिकं दृश्यते। धर्मान्तरावलम्बिनां विषये असूया सर्वेषु जनेषु अस्ति। वारट्रेण्ड-रासेल-महोदयेन उक्तं- धर्मः एकः रोगः, तस्य च कारणम् अज्ञानं भयं च। प्राकृतिकशक्तेः भयमेव धर्मं जनयति। फ्रेड-महोदयेन धर्मविषये उक्तं- "The universe obsessional neurosis of humanity" इति। भूमिकम्पवन्याझञ्झावातरोग-भोगमृत्युभयादिशक्तीः विरुध्य धर्मो भवति मानसिकप्रतिरोधः। यः धर्मप्राणः स नैतिकदृष्ट्या चरित्रशीलः इति सामान्यतया मन्यते। किन्तु वस्तुतः तत् सत्यं नास्ति।

**उपसंहारः**

पुरुषार्थरूपस्य धर्मस्य समकालीनधर्मचर्चायाश्च दृष्टिभङ्गी, उद्देश्यञ्च भिद्यते। प्राचीनधर्मे वैयक्तिकाचारस्य आध्यात्मिकतायाः च उन्नतिविषये विशिष्टदृष्टिः दत्ता चेदपि वर्तमानधर्मस्य लक्ष्यम् अतीव सङ्कीर्णम्। आधुनिककालीनः धर्मः धर्मीयाचार-अनुष्ठान-सामाजिकप्रतिष्ठा-वैयक्तिकपरिचयबुद्धिसम्बद्धः अस्ति। पुरुषार्थरूपस्य धर्मस्य मुख्योद्देश्यं हि नैतिकता तथा आध्यात्मिकोन्नत्या सह कस्यचित् सम्प्रदायविशेषस्य संस्कृति-ऐतिह्यविषये

[20] Science of religion

[21] Primitive of culture, Page. 424

[22] Philosophy of religion.

अविचलता। तस्मात् समाजव्यवस्थायाः परिवर्तनम् अपेक्षितम्। एवं काचित् समाजव्यवस्था स्याद् यत्र जनः जनं न शोषयेत्, न वा पीडयेत्। सबलः देशः दुर्बलं देशं न आक्राम्येत्। यस्मात् हेतोः मनुष्येषु हिंसा-ईर्ष्या-परश्रीकातरता-प्रभृतीनाम् अपगुणानाम् उद्भवो भवति स वास्तवो हेतुः अपसार्यते चेत् समाजस्य उन्नतिः भविष्यत्येव। समाजपरिवर्तनस्य संग्राम एव मनुष्यम् उन्नतमनुष्यत्वेन परिणामयति।

## सहायकग्रन्थसूची


- झालकी । भीमाचार्यः । न्यायकोषः (प्रथमखण्डः)। अभ्यकरोपाह्व-वासुदेवशास्त्री (सम्पा) । वाराणसी, भारतीय विद्या प्रकाशन ।
- वन्द्योपाध्यायः । डः मानवेन्दु , अशोककुमार । (१४०४) । कौटिलीय अर्थशास्त्रः । कोलकाता -६, सदेश ।
- वसुः । सुमिता न्यायतीर्थः । (१४२२) । याज्ञवल्क्यसंहिता (व्यवहार-अध्यायः) । कोलकाता-६ , संस्कृत पुस्तक भाण्डार ।
- वन्द्योपाध्यायः। डः मानवेन्दु । (१४१८) । मनुसंहिता। कोलकाता -६ , सदेश ।
- भट्टाचार्यः। अमितः । (२००३) । बौध्ददर्शनम्। कोलकाता-६ , संस्कृत पुस्तक भाण्डार ।
- भट्टाचार्यः। डः झर्णा । (१९७६) । बृहदारण्यकोपनिषत्। भट्टाचार्य , देवाशिष (सम्पा.)। कोलकाता-६ , संस्कृत पुस्तक भाण्डार।
- भट्टाचार्यः। अमितः । (२०११) । जैनदर्शनम्। कोलकाता-६ , संस्कृत पुस्तक भाण्डार ।
- गोस्वामी । नारायणचन्द्रः। (२०१६) । सांख्यतत्त्वकौमुदी । कोलकाता-६ , संस्कृत पुस्तक भाण्डार।
- चक्रवर्ती । लोकनाथः। वेदान्तसारः । कोलकाता , पश्चिमवङ्ग राज्यं पुस्तक पर्षद।

# काव्यप्रकाशे काव्यस्य कारणानुसन्धाने टीकाकाराणामवदानम्

**सुदीप-सरदारः**

**शोधच्छात्रः, संस्कृतविभागः, यादवपुरविश्वविद्यालयः**

**कलिकाता, पश्चिमबङ्गः**

---

**प्रबन्धसारः**

*कवेः कृतिः भवति काव्यम्। संस्कृतसाहित्ये विद्यमानेषु अलङ्कारग्रन्थेषु काव्यप्रकाशः इति ग्रन्थः प्रामाणिकत्वेन प्रसिद्धिं प्राप्नोति। अस्य ग्रन्थस्य रचनाकारः आसीत् आचार्यः मम्मटः। काव्यविषयकं सर्वं तत्त्वं प्रकाशते तस्मिन्निति काव्यप्रकाशः। अधुनापि विद्वांसः काव्यप्रकाशस्योपरि टीकां कर्तुं प्रयत्नशीला विद्यन्ते। अतः सम्यक् एव उच्यते महेश्वरभट्टाचार्येण आदर्शटीकायां – "काव्यप्रकाशस्य कृता गृहे गृहे टीकास्तथाप्येष तथैव दुर्गमः" इति। कमलाकरभट्टेन अपि उच्यते इत्यस्मिन् विषये – "काव्यप्रकाशस्य टिप्प्यण्यः परे सन्ति सहस्रशः" इति। श्री बलदेव-उपाध्यायस्य मते काव्यप्रकाशस्योपरि रचितानां टीकानां संख्या सप्ततिः। एतासु कासाञ्चित् मुख्यटीकानां, टीकाकर्तॄणां च नामानि अधस्ताद् वर्ण्यन्ते –*

| *<u>टीकायाः नाम</u>* | *<u>टीकाकारस्य नाम</u>* |
|---|---|
| *संकेतः (प्राचीन टीका)* | *माणिक्यचन्द्र जैनः* |
| *बालचित्तानुरंजिनी* | *नरहरि सरस्वती तीर्थः* |
| *दीपिका* | *चण्डीदासः* |
| *काव्यप्रकाशदर्पणः* | *विश्वनाथकविराजः* |
| *प्रदीपः* | *गोविन्दठक्करः* |
| *दर्पणः* | *रत्नपाणिः* |
| *मधुमती* | *रविः* |
| *विवरणम्* | *गोकुलनाथ-उपाध्यायः* |
| *आदर्शः* | *महेश्वर-भट्टाचार्यः* |
| *सारदीपिका* | *गुणरत्नमणिः* |
| *प्रभा* | *वैद्यनाथः* |
| *बालबोधीनि* | *झालकीकर-* |
| *वामनाचार्यः* | |
| *नागेश्वरी* | *हरिशङ्करः* |
| *साहित्य कौमुदी* | *बलदेव-विद्याभूषण* |

*काव्यप्रकाशग्रन्थे मम्मटाचार्येण काव्यस्य कारणप्रसङ्गे उक्तं –*

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे॥

*अस्य काव्यस्य कारणतानिरूपणे पूर्वाचार्याणां पदाङ्कमनुसृत्य मम्मटाचार्यप्रदत्तलक्षणे टीकाकाराणां मतस्य स्पष्टता यत्र यत्र विद्यते तत् सर्वम् अस्मिन् शोधप्रबन्धे आलोच्यते।*

**कुञ्चीशब्दाः** - शक्तिः, निपुणता, अभ्यासः, प्रतिभा, हेतुः, शास्त्रं चेत्यादयः।

*****************************************************************************

**काव्यस्य कारणम्**

सर्वाणि कार्याणि हि कारणजातानि । काव्यस्य कार्यत्वात् तस्यापि कारणमस्ति इत्यबधानेन संस्कृतालङ्कारशास्त्रे काव्यकारणविषये प्रभूतं पर्यालोचनं कृतम्। मम्मटपूर्वाचार्यैः भामहदण्डिप्रभृतिभिः काव्यस्य हेतुत्रयम् अङ्गीकृतं -प्रतिभा, व्युत्पत्तिः, अभ्यासश्चेति। भामहेनोक्तं काव्यालङ्कारग्रन्थे– 'काव्यं तु जायते जातु कस्यचित् प्रतिभावतः'[1] इति। काव्यकारणेषु तेन प्रतिभायाः प्राधान्यम् अङ्गीकृतम्। परतश्च व्युत्पत्तिः, अभ्यासश्च तेनालोचितौ काव्यकारणतया। दण्डिनापि काव्यादर्शग्रन्थे काव्यस्य हेतुत्रयमेव वर्णितम् । यथा-

नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम् ।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः।।[2]

अत्र श्रुतपदेन व्युत्पत्तिः बहुशास्त्रज्ञानं तथा अभियोगपदेन अभ्यासः बोधितः। एतयोः पूर्वाचार्ययोः पदाङ्कम् अनुसृत्य मम्मटाचार्येण काव्यकारणम् उक्तं काव्यप्रकाशे-

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ।।[3]

अस्याः कारिकाया अर्थो मम्मटाचार्येण विस्तरेण वृत्त्या स्वयं निरूपितः।

**शक्तिः**

कारिकायां शक्तिशब्दः प्रयुक्तः। शक्लृ-धातोः करणे क्तिन्प्रत्यये शक्तिशब्दो निष्पद्यते। अयं योगरूढः शब्दः। शक्नोति काव्यं कर्तुं भावयितुं चानयेति व्युत्पत्तिलभ्योऽर्थो वर्तते। अस्य रूढः कोऽर्थ इति जिज्ञासायां शक्तिपदार्थं विवृण्वन् मम्मटाचार्येण वृत्तौ उक्तं- '*शक्तिः कवित्वबीजभूतः संस्कारविशेषः*'[4] इति। संस्कारविशेषः शक्तिरुच्यते । संस्कारशब्दस्यार्थो भावनाख्या वासना भवति। प्रतिभायाः स्वरूपं काव्यकौतुके प्रतिपादितं-

स्मृतिर्व्यतीतविषया मतिरागामिगोचरा ।
बुद्धिस्तात्कालिकी प्रोक्ता प्रज्ञा त्रैकालिकी मता ॥
प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता॥[5]

एवं रुद्रटेनापि निगदितम्-

मनसि सदा सुसमाधिनि विस्फुरणमनेकधाभिधेयस्य।
अक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्तिः॥[6]

इति।

एवमेव पण्डितराजजगन्नाथेन 'काव्यघटनानुकूल-शब्दार्थोपस्थितिः प्रतिभा'[7] इति प्रतिभाया लक्षणं कृतम्। एवं संस्कारविशेषशब्देन प्रतिभा विवक्षितेति बहूनां टीकाकारणां मतं वर्तते। एषा प्रतिभा कारिकायां शक्तिपदेन कथिता। कश्चित् कविरनया काव्यं कर्तुं शक्नोति कश्चन सहृदयोऽनया काव्यं भावयितुं शक्नोति चेति प्रतिभा शक्तिपदेन कथ्यते। तत्र कविगता प्रतिभा काव्यस्य जनिका भवति। प्रतिभाविषये गोकुलनाथः काव्यप्रकाशविवरणटीकायाम् एवं वदति - 'सा च प्रतिभा पदगोचराऽर्थगोचरेति द्विविधा। द्विविधापि कवेरपेक्षिता। पदस्य वाक्यस्य च तदर्थयोः प्रतिसन्धानद्वारा सन्दर्भरचनायामुपयुज्यते। इयं जनिका शक्तिरित्युच्यते। सहृदयस्य तु काव्यैकदेशीभूतस्यार्थस्योद्भवाय तद्गोचरा केवलमपेक्ष्यते। सैवासाधारणीकृतविभावादि स्मारयित्वा तदुपबृंहितं स्थायिभावम् उल्लासयति।

[1] काव्यालङ्कारः – १/५
[2] काव्यादर्शः – १/१०३
[3] काव्यप्रकाशः – १/३
[4] काव्यप्रकाशः – १/३
[5] *काव्यप्रकाशः,सम्प्रदायप्रकाशिनी, पत्राङ्कः – १३*
[6] काव्यालङ्कारः – १/१५
[7] रसागङ्गाधरः – प्रथमानन्, पत्राङ्क – ९

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

सा चोल्लासका शक्तिरिति व्यवह्रियते'[8] इति। एवं शक्तिपदवाच्या प्रतिभा द्विधा भवति - जनिका= कारयित्री, उल्लासिका= भावयित्री च। शक्तिः कवित्वस्य बीजं वर्तते। बीजं यथा वृक्षस्य प्रधानम् उपादानं कारणं भवति तथा शक्तिः काव्यवृक्षस्य मुख्यं कारणं वर्तते। शक्तेरभावे काव्यस्याप्यभावं मम्मटाचार्येण वृत्तौ एवं दर्शयति – 'यां विना काव्यं न प्रसरेत् प्रसृतं वा उपहसनीयं स्यात्'[9] इति। गोकुलनाथेन काव्यप्रकाशस्य विवरणटीकायाम् इत्यस्मिन् विषये उक्तम् - 'प्रतिभाव्यतिरेके शब्दतदर्थप्रतिसन्धानं विना प्रवचनमनुपपन्नमिति भावः। उल्लासकशक्तेः काव्यार्थपरामर्शे व्यतिरेकमाह- प्रसृतं वेति। बाणादिशक्त्या प्रसृतं कादम्बर्यादिकाव्यं विभावादिपरामर्शरहितैः मीमांसकादिभिरुपहसनीयं स्यात्।.प्रसृतं वेत्यत्रवाकारोऽप्यर्थः। तेन काव्यप्रसणाभावप्रयोज्यत्वम् उपहसनीयत्वे बोध्यमानं प्रतिभाव्यतिरेकप्रयोज्यत्वं प्रकटयति'[10]। उक्तवृत्तौ प्रयुक्तं काव्यपदं वर्णनासामान्यस्य बोधकं वर्तत इति मधुमतीटीकायाम् एवं कथितं– 'यां विनेति। काव्यपदं वर्णनासामान्यपरम्। न प्रसरेत्। प्रायेणेति शेषः। प्रसृतं वेति। अत्राऽव्ययानाम् अनेकार्थत्वात् 'वाशब्द' एवकारार्थो भिन्नक्रमश्च। तेन तया विना यत् प्रसृतं तद् उपहसनीयमेव स्यात् - काव्यमेव न भवतीत्यर्थः'[11]।

राजशेखरः काव्यमीमांसायां प्रतिभाव्युत्पत्त्योर्मध्ये प्रतिभा श्रेष्ठतमा इति आनन्दवर्धनाचार्यस्याशयं समुपवर्णितवान्। देवताप्रसादलब्धा प्रतिभा-व्युत्पत्तिराहित्यकृतं दोषमाच्छादयितुं शक्नोति। प्रतिभालोपजातो दोषस्तु शीघ्रं प्रस्फुरति।

अव्युत्पत्तिकृतो दोषश्शक्त्या संवियते कवेः।
यस्त्वशक्तिकृतस्तस्य झटित्येवावभासते॥[12]

इत्ययम् आनन्दवर्धनाशयः। एतेन व्युत्पत्त्यभ्यासजनित-प्रतिभापेक्षया, देवताप्रसादलब्धायाः प्रतिभायाः प्राशस्त्यं निरूपितं भवति। अस्मादेव प्रतिभागुणात् दृष्टपूर्वा अप्यर्था मधुमासे द्रुमा इव नवनवा आभान्ति । यो जन्मना कविः सञ्जायते तस्मिन्नेवास्याः प्रतिभायास्साकल्यमुपलक्ष्यते।

**निपुणता**

निपुणता-शब्दस्यार्थः वर्तते व्युत्पत्तिः। निपुणता-विषये कारिकायाम् उक्तं मम्मटाचार्येण – 'निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्' इति। प्रसङ्गेऽस्मिन् वृत्तौ व्याख्यायते मम्मटाचार्येण – लोकस्य= स्थावरजङ्गमात्मकलोकवृत्तस्य, शास्त्राणाम् = छन्दोव्याकरणाभिधानकोशकलाचतुर्वर्गगजतुरग खड्गा-दिलक्षणग्रन्थानां, काव्यानां = महाकविसम्बन्धिनाम्, आदिग्रहणाद्= इतिहासानां च, विमर्शनात्= पुनः पुनस्तत्तत्पदपदार्थादिविचारणात्, व्युत्पत्तिः = दृढतरः संस्कारः भवति[13] । इतिहासस्य लक्षणं नागेश्वरीटीकायां दृश्यते –

धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्।
पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते॥[14]

**अभ्यासः**

कारिकायाम् अभ्यासविषये मम्मट एवं लिखति - 'काव्यज्ञशिक्षयाभ्यासः' इति। अभ्यासपदस्यार्थो वृत्तावेवं प्रतिपादितः - 'करणे योजने च पौनःपुन्येन

---

[8] काव्यप्रकाशविवरणटीका, कारिका – ३
[9] काव्यप्रकाशः, वृत्ति- ३
[10] काव्यप्रकाशविवरण-टीका, कारिका – ३
[11] मधुमतीटीका, कारिका – ३
[12] काव्यमीमांसा - २/२६
[13] काव्यप्रकाशः वृत्ति- ३
[14] नागेश्वरीटीका, कारिका – ३

प्रवृत्ति[15] इति। अत्र करणशब्दः कविमपेक्ष्य योजनशब्दस्तु सामाजिकमपेक्ष्य प्रयुक्तः। तेन कवेरपेक्षया काव्यस्वरूपस्य काव्यगतगुणदोषादीनां च विचारेण सह काव्यस्य निर्माणे पुनः पुनः प्रवृत्तिरभ्यास उच्यते।

'काव्यज्ञशिक्षया' इति कारिकास्थस्य पदस्य विवरणं वृत्तावेवं वर्तते - 'काव्यं कर्तुं विचारयितुं च ये जानन्ति तदुपदेशेन'[16] इति। एवं कविना काव्यस्य पुनः पुनः करणं सामाजिकेन काव्यस्य पुनः पुनरनुसन्धानं चाऽभ्यास उच्यते। उक्तं काव्यप्रकाशस्य विवरणे गोकुलनाथेन- 'काव्यज्ञपदं विवृणोति - काव्यमित्यादि। योजयितुं दोषगुणालङ्कारादिमत्तया बोधयितम्। विचारयितुमिति पाठेऽप्ययमेवार्थः। तदुपदेशेन दोषगुणालङ्कारपरीक्षारूपेण करणे पुनः पुनः प्रवृत्तिः काव्यसन्दर्भं जनयति। तेन प्रथमप्रवृत्त्या काव्याभास एव जन्यत इति व्यज्यते। यत्र प्रथमत एव काव्यं कस्यचिद् बालस्य दृश्यते, तज्जन्मान्तराभ्यासात्। एवं काव्यज्ञोपदेशजनिता असंलक्ष्यक्रमध्वनिप्रक्रियाज्ञाने व्यङ्ग्यार्थप्रत्ययार्थं पुनः पुनः प्रणिधानमुल्लासे जनकम्, न तु प्रथमप्रणिधानेनोल्लास इति समुदायार्थः[17] इति। अन्येषां टीकाकाराणां मते - 'करणे योजने च पौनःपुन्येन प्रवृत्तिः' इति वृत्तिग्रन्थस्यार्थोऽन्यथा विधीयते। माणिक्यचन्द्रः संकेते वृत्तिग्रन्थमिमं द्विधा व्याख्याति - 'करणे योजने चेति। विशकलितरूपे, प्रबन्धादीनां गुम्फरूपे च। यदि वा काव्यं कर्तुं ये जानन्ति तदुपदेशेन करणे निष्पादने, ये च काव्यं विचारयितुं जानन्ति तदुपदेशेन योजने विचारणे चेत्यर्थः'[18]। एवं काव्यज्ञस्य शिक्षया=उपदेशेन काव्यस्य करणे योजने च पुनः पुनः प्रवृत्तिरभ्यास उच्यते।

**इति हेतुस्तदुद्भवे**

'इति'-शब्देन शक्तिः, निपुणता, अभ्यासश्चेति त्रयः समुदिता एव परामृश्यन्ते। उद्भवशब्द उद्भवनम् उद्भव इति व्युत्पत्त्या निर्माणम्, उत्कृष्टं भवनमिति व्युत्पत्त्या समुल्लासं च बोधयति। तेनोद्भवशब्दस्य निर्माणं समुल्लासश्चार्थौ विवक्षितौ। ततः शक्तिः, निपुणता, अभ्यासश्च समुदिताः तस्य काव्यस्योद्भवे= निर्माणे समुल्लासे च हेतुरित्यक्षरार्थो लभ्यते। कारिकायां हेतुरित्यत्रैकवचनं प्रयुक्तम्। तस्याभिप्रायो वर्तते यत् समुदिताः=मिलिता एव शक्त्यादयः काव्यं जनयन्ति समुल्लासयन्ति च, न तु व्यस्ताः। तृणारणिमणिन्यायेन प्रत्येकं हेतवः। एतच्च हेतुरित्येकवचनोपादानादेव लभ्यते।

नागेश्वरी टीकायाम् 'इति हेतुस्तदुद्भवे' पदस्य व्याख्या एवं दृश्यते - 'त्रयः समुदिता इति। त्रयः शक्तिनिपुणताभ्यासाः। तदुद्भवे इति व्याकरोति- तस्येति । समुल्लासे उत्कटत्वे। कुतः समुदितानां हेतुत्वमत आह - हेतुरिति। 'जात्याकृतिव्यक्तयः पदार्थः' इति गौतमतूत्रे पदार्थ इत्यत्रैकवचनेन यथा त्रिष्वेव पदशक्यत्वं तथा हेतुरित्यत्रैकवचनेन दण्डचक्रादिन्यायेन परस्परसापेक्षाणामेव हेतुत्वमिति लभ्यते, न तु तृणारणिमणिन्यायेन व्यस्तानामिति फलितोऽर्थ इति दिक्'[19]।

प्रदीपटीकाकारेण अपि स्पष्टतया उक्तम् – 'इतिशब्दो मिलितोपस्थानपनाय। अन्यथा तद्वैयर्थ्यमेव स्यात्। तथा च काव्यस्योद्भवः उत्कृष्टोत्पत्तिः। तया, कार्येण मिलितानामुपधानम्। दण्डचक्रादीनामिव घटेन। न तु मिलितत्वेन कारणतैवेति भ्रमः कार्यः।'[20]

[15] काव्यप्रकाशः वृत्ति- ३

[16] काव्यप्रकाशः वृत्ति- ३

[17] काव्यप्रकाशविवरणटीका, कारिका – ३

[18] संकेतटीका, कारिका – ३)

[19] नागेश्वरीटीका, कारिका – ३)

[20] प्रदीपटीका, कारिका – ३

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

## सहायकग्रन्थसूची


- *प्रतिभाविमर्शः*। सम्पा. देशराजः। वाराणसीः भारतीय विद्या प्रकाशन , २००९ प्रथमवर्षसंस्करणम्।
- भामहः । *काव्यालङ्कारः* । सम्पा. देवेन्द्रनाथ शर्मा । पटनाः बिहार-राष्ट्रभाषा-परिषद्, १४२२ वङ्गाब्दः (द्वितीयप्रकाशः)
- मम्मटः । *काव्यप्रकाशः* । सम्पा. विमलाकान्त मुखोपाध्यायः । कोलकाताः संस्कृत-पुस्तक-भाण्डारः, १४२४ वङ्गाब्दः (द्वितीयप्रकाशः)
- मम्मटः । *काव्यप्रकाशः* । सम्पा. सुनील कुमार जाना। कोलकाताः संस्कृत-वुक्-डिपो, २०२१ प्रथमप्रकाशः।
- मम्मटः । *काव्यप्रकाशः* । सम्पा. विजया गोस्वामी। कोलकाताः पश्चिमवङ्ग राज्य पुस्तक पर्षत्, २०१४ प्रथमप्रकाशः।

# वैदिककाले दण्डनीतिः

**डॉ. पङ्कजकुमार-माहाना**
अतिथि-अध्यापकः, स्नातकोत्तरसंस्कृतविभागः, धरणीधरविश्वविद्यालयः
केन्दुझरः, ओडिशा

**प्रबन्धसारः**

*प्राचीनभारते दण्डस्य दण्डव्यवस्थायाश्च विचारः वैदिककालादेव अभूत्। यतो हि प्रभुसम्मितोपदेशेन वेदेषु तत्तत्कर्मपालने धर्मस्यानुसरणे च मार्गदर्शनं विहितम्। तस्य अकरणे दण्डव्यवस्थाया विधानमपि दृश्यते। वेदोपरान्तं ब्राह्मण-आरण्यक-उपनिषद्ग्रन्थेषु तथा रामायण-महाभारत-पुराण-स्मृति-काव्यनाटकादिष्वपि दण्डनीतेः विषयाः विमृष्टाः सन्ति। तदाधारेण मानवानां जीवनशैली सुष्ठु परिचालयितुं शक्यते। शोधपत्रेऽस्मिन् तस्य दण्डस्य दण्डव्यवस्थायाश्च विषयाः आलोच्यन्ते।*

**कुञ्चीशब्दाः** - श्रीः,यशः, दीप्तिः, दण्डः, सम्राट् चेत्यादयः।

**********************************************************************************

**"आ ब्रह्मन् ब्रह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायताम् ।[1]**

यजुर्वेदे विंशतितमाध्याये राज्याभिषेकस्य सविस्तरं वर्णनावसरे निगदितं यत्- राज्याभिषिक्तो राजा स्वस्य प्रत्येकस्मिन् अङ्गे यशो-दीप्ति-विजयप्राप्तेः प्रार्थनां विदधाति। एकस्मिन्मन्त्रे-

**शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि।**
**राजा मे प्राणो अमृतं सम्रट् चक्षुर्विराट् श्रोत्रम्।।[2]**

यजुर्वेदे विंशत्यध्याये राज्याभिषेकस्य सविस्तरवर्णनं दृश्यते। तत्र राज्याभिषिक्तराजा स्वस्य प्रत्येकस्मिन्नपि अङ्गे श्रियं, यशो, दीप्तिं, कीर्तिं च प्राप्तुं प्रार्थयते। ब्राह्मणक्षत्रियाणां पारस्परिकसहयोगेन देशस्य विकाशः वृद्धिश्च जायते।

यत्र ब्राह्मणक्षत्रियाः पारस्परिकसहयोगेन निवसन्ति, तत्र श्रीः अवश्यम् आयाति । स च लोकः स्वर्गलोकः पूर्णलोकश्च इति ज्ञायते ।

ऋग्वेदस्य दशममण्डले स्त्रीधर्मस्य प्रकरणे वधूः श्वशुरस्य श्वश्र्वाश्च सम्राज्ञीरूपेण अभूत् इति समुल्लिखितम्। उक्तं यथा-

**सम्राज्ञी श्वसुरे भव सम्राज्ञी श्वश्र्वां भव।**
**ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु।।[3]**

अत्र साम्रज्ञी सम्राजः स्त्रीरूपेण वर्णिता। तेन ज्ञायते समाजे उभयोरपि साम्रज्ञीसम्राजोः प्रकामं प्रतिष्ठा आसीत्। तत्र सम्राजः उपरि आधिपत्यं स्वामित्वस्य भावना अन्तर्निहिता अस्ति ।

अतः तस्मिन् समये शासने राजपत्न्याः महत्त्वमन्तर्भावश्च आसीत्। अनेन स्पष्टतया प्रतीयते यत् वैदिकयुगे शासनव्यवस्था तथा दण्डनीतिविषयः चर्चनीयविषय आसीत्। तदारभ्य राज्यानामुपरि शत्रूणाम् आक्रमणं च अभूत्। तस्मिन् ऋग्वेदे वक्ष्यमाणमन्त्रे मरुद्देवेभ्यः सर्वोऽपि संसारो बिभेति स्म। राजानो मरुद्देवा इव तेजस्विनः आसन्। तत्र दण्डनीतिव्यवस्था सुस्पष्टा। उक्तं हि-

**भयन्ते विश्वा भुवना मरुद्भयो राजान इव**
**त्वेषसन्दृशो नरः।[4]**

ऋग्वेदस्य चतुर्थमण्डलेऽपि कस्मिंश्चित् मन्त्रे निरुपितं यत् यो राजा बृहस्पतेः सेवां विदधाति, तं स्तौति च, सः स्वबलेन सर्वस्यापि युद्धस्योपरि विजयमाप्नोति, तेन च स्वगृहे सुखी भवति,

---

[1] यजु.२२/२२
[2] यजु.-२२/२४
[3] ऋ.वे. १०/८५/४६
[4] ऋ.वे-१/८५/८

तादृशस्य विजितस्य कृते अन्नस्याभावः नैव भवति, तथा सर्वे तं प्रशंसन्ति। अत्रापि शासनव्यवस्थाया दण्डव्यवस्थायाश्च परिकल्पना कृता संविलोक्यते। तथाहि प्रतिपादितम् –

**स इन्द्राजा प्रतिजन्यानि विश्वा शुष्मेण तस्थावभि वीर्येण।**
**बृहस्पतिं यः सुभृतं बिभर्ति वग्लूयति वन्दते पूर्वभाजम्।**
**स इत्क्षेति सुधित ओकसि स्वे तस्मा इळा पिन्वते विश्वदानीम्।**
**तस्मै विशः स्वयमेवा नमन्ते यस्मिन् ब्रह्मा राजनि पूर्व एति ।।**[5]

ऋग्वेदस्य पञ्चममण्डलेऽपि सुस्पष्टीकृतं यं जनं मरुद्देवः संरक्षति तं राजानं ऋषिं वा न कोऽपि जेतुं शक्नोति, न वा मारयितुं, हिंसां विधातुं वा शक्नोति। स राजा कदापि दुःखितो नैव भवति। तथा तस्य धनं न कोऽपि अपहर्तुं शक्नोति।

एवं च ऋग्वेदे नैकेषु मन्त्रेषु दण्डनीतेः परिशीलनं विहितम्। ततः यर्जुर्वेदेऽपि केषुचित् मन्त्रेषु तस्याः दण्डनीतेः परिशीलनं कृतम्। एतस्याः दण्डनीतेः परिकल्पना निरुक्तग्रन्थेऽपि यास्कमुनिना कृता।

तत्र निरुक्ते तृतीयाधिकरणस्य पञ्चमाध्याये प्रथमसूत्रे स्थाणुशब्दस्य प्रयोगः कृतः। स च स्थाणुः आधुनिकन्यायालयस्य कोष्ठगृहम् इत्युच्यते। तत्र गमने सदा सत्यमेव संभाषयेत्। तदर्थं तदेव गर्त इत्युच्यते। उक्तं च -

**गर्तः सभास्थाणुर्गृणातेः सत्यसंगरो भवति।**[6]

तत्र निरुक्तकारेण यास्कमुनिना दण्ड इति तद्धितान्तशब्दस्य निर्वचनं कृतम्। यः दण्डं प्राप्तुं योग्यः स दण्ड्यः इत्युच्यते। तस्मिन् प्रसङ्गे उक्तं हि- **दण्डमर्हति।**[7]

वैदिकयुगे सर्वेऽपि स्वीयधर्मेषु विलीनाः अभुवन्। प्रायः सर्वेऽपि जनाः तस्मिन् काले सत्त्वगुणसम्पन्ना आसन्। ते कदापि दुराचारमार्गेण प्रवर्तिता नाभुवन्। यदि कदाचित् तयोः जनयोः अपराधः पापं वा भवति स्म, तदा ते भगवन्तं प्रति क्षमायाचनं प्रार्थयन्ति स्म। वैदिककाले वरुणरुद्रौ अतीव कुपितौ देवौ आस्ताम्।

तयोः कोपेन विचलिताः सन्तः जनाः तयोः अस्त्राणि प्रार्थयन्ति स्म। यजुर्वेदे षोडषाध्याये रुद्रस्य वर्णनाप्रसङ्गे तस्य कोपो निरूपितः। उक्तम्-

**नमस्ते रुद्र मन्यवे उतो त इषवे नमः।**[8]

कठोपनिषदि नैकेषु मन्त्रेषु शासनव्यवस्थायाः दण्डनीतेश्च निरूपणं विहितम्। तत्र कश्चन विवेकेन संयमेन च हीनः भवति चेत् तस्य (पुरुषस्य) का गतिः जायते इति निर्दिष्टम्। यदि मनुष्यः स्वविवेकेन बुद्ध्या वा आत्मनः नियन्त्रणपूर्वकम् इन्द्रियाणां संयमनं न करोति, तर्हि सः पापभाग् भवति। संसारचक्रे पौनःपुन्येन निपतितो भवति। प्रसङ्गेऽस्मिन् उक्तं यथा-

**यस्त्वविज्ञानवान्भवत्यमनस्कः सदाशुचिः।**
**न स तत्पदमाप्नोति संसारं चाधिगच्छति।।**[9]

वैदिकमन्त्रेषु यत्र यत्र अपराधानां परिगणनं दृश्यते, तत्र एकस्य मन्त्रस्य आधारेण कामजक्रोधजादयः सप्तप्रकाराः अपराधाः निर्दिष्टाः। तेषु अपराधेषु एकोऽपि अपराधः क्रियते चेत् मनुष्यः पापभाग् भवति। तेषां सप्तापराधानां नामानि यथा-

१. पातनम्
२. अक्षाः
३. स्त्रियः
४. मृगया

[5] ऋ.वे-५/५०/७
[6] निरु.३/८/१
[7] तत्रैव.२/२/११
[8] यजु.१६/१
[9] कठो-१.३.७

५. दण्डः
६. पारुष्यम्
७. अन्यदोषः

एतेषां पूर्वोक्तानां सप्तापराधानां परिगणना निरुक्तकारेण यास्कमुनिना इत्थं कृता -

१. स्तेयम् (चौर्यम्) ।
२. गुरुतल्पारोहणम् (गुरुपत्नीगमनम्) ।
३. ब्रह्महत्या(ब्रह्मणानां हत्या) ।
४. भ्रूणहत्या (गर्भपातनम्) ।
५. सुरापानम् ।
६. असकृत् अनुचितकर्मणि प्रवृत्तिः ।
७. मिथ्याभाषणम् चेति।

ऋग्वेदस्य एकस्मिन् मन्त्रे दण्डव्यवस्थायाः अपराधस्य च स्वरूपम् इत्थं निरूपितं यत्- यदि कश्चन अपरं यातुधान इति कथयति तदानीम् आत्मग्लानिवशात् स कथयति यद्यहं यातुधानः तर्हि अद्यैव मम मरणमस्तु। अन्यथा येनाहं व्यर्थं यातुधान इति आक्षिप्तः सः मरणं प्राप्नोतु। पक्षान्तरे यदि कोऽपि पापी राक्षसः आत्मनं पवित्रं चिन्तयति तर्हि राजा अतिप्रभाववता मारकेण आयुधेन तं जनं मारयति, निकृष्टस्थानं च प्रापयति। तथाहि समाम्नातम्-

**अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस्ततप पूरुषस्य।**
**अधा स वीरैर्दशभिर्वि यूया यो मा मोघं यातुधानेत्याह॥**
**यो मायातुं यातुधानेत्याह यो वा रक्षाः शुचिरस्मीत्याह।**
**इन्द्रस्तं हन्तु महता वधेन विश्वस्य जन्तोरधमस्पदीष्ट ।।**[10]

ऋग्वेदीयसारस्वतमन्त्रे निरूपितं यत् पुरुषः स्त्रीर्वा यदि राक्षसवत् आचरति, तर्हि समयानुसारेण ते वध्याः स्युः। तेषां ग्रीवाच्छेदनं सूर्योदयात् प्राक् विधेयमिति रीत्या प्राणदण्डः प्रदातव्यः। उक्तं हि-

**इन्द्र जहि पुमांसं यातुधानमुत स्त्रियं मायया शाशदानाम्।**
**विग्रीवासो मूरदेवा ऋदन्तु मा ते दृशन्त्सूर्यमुच्चरन्तम्।।**[11]

वैदिकसंहितासु नैकेषां तस्कराणां वर्णनमपि विहितम्। तत्र रुद्राध्याये अधोलिखितानां चौराणां नामानि यथा-

१. **स्तेनः** (गृहे गर्तं विधाय गुप्तरूपेण चौर्यम् )।
२. **स्थायुः** (दिवारात्रौ अज्ञातरूपेण चौर्यम्) ।
३. **तस्करः** (प्रकटं विधाय चौर्यम् ) ।
४. **मुष्णान्तः** (शस्यक्षेत्रे धान्यादिकं चौर्यम् )।
५. **निचेरवः** (चौर्यप्रवृत्त्या निरन्तरं विचरणम् )।
६. **परिचरः** (आपणेषु चौर्यप्रवृत्तिः)।
७. **कुलुञ्चः** (गृहाणां सस्यक्षेत्राणाञ्च अपहरणम् )।

उक्तं हि-

**को नु मर्या अमिथितः सखा सखायमब्रवीत् । जहा को अस्मदीषते ।**[12]

मन्त्रोऽयं निरुक्तकारेण चतुर्थाधिकरणे उद्धतः। मन्त्रस्य अस्य भाष्यावसरे दुर्गाचार्येण स्पष्टीकृतं यत्- अहं कदापि कोऽपि अपापिजनं न हतवान्। अत्र दण्डनीतेरुपरि परिकल्पना कृता। अर्थात् यदि पापी पापमाचरति तर्हि बहूनाम् अपराधानाम् आचरणे सति मां न मारय इति प्रार्थयति चेदपि तस्य कृते दण्डव्यवस्था अवश्यं भवेदिति।

यदि पापिनां कृते दण्डो न दीयते तदा सामाजिकव्यवस्थापि इतस्ततः आपतेत्। एतदेव निरुक्तग्रन्थस्य एकस्य मन्त्रस्य भाष्ये दुर्गाचार्येणापि समर्थितम्।

[10] ऋ.वे.-७/१०४/१५-१६
[11] ऋ.वे.-७/१०४/२४
[12] ऋ.वे.८/४५/३७

उक्तं हि- **यत् पुनरेतदुक्तं भवद्भिः भूरिष्वप्यागस्सु मास्मान् वधीः इति कथमागस्कारी न हन्यते? श्वा पुरोडाशमवलिह्यात्, न च कस्यचित् कस्मिंश्चिदपि स्वता स्यात्। सर्वं वा असमञ्जसमेव स्यात् यदि पापकारिणो न हन्येरन् ।**[13]

क्वचित् प्रतीयते यत् तादृश्याः दण्डनीतेः परिकल्पना मनुस्मृतेः आधारेण कृता। तत्र मनुस्मृतावपि सप्तमाध्याये निरूपितं - यदि राजा दण्डं नाचरिष्यत् तर्हि यज्ञेषु प्रदत्तं पुरोडाशं काकः अखादिष्यत्। तथा कुक्कुरः पायसादिहविः लिह्यात्। उच्चनीचभावस्य नाशो भविष्यति। सामग्रिकरूपेण शिष्टाचारस्याभावेन समाजः नश्यति। उक्तं यत्-

**अद्यात् काकः पुरोडाशं श्वा च लिह्याद्धविस्तथा।**
**स्वाम्यं च न स्यात्कस्मिंश्चित् प्रवर्त्तेताधरोत्तरम्।।**[14]

वेदोपनिषदादीनाम् अनन्तरं रामायणे तथा महाभारते दण्डनीतेः विचारः विहितः। ततः धर्मशास्त्रस्य सुप्रसिद्धः ग्रन्थः मनुस्मृतिरपि दण्डस्य स्वरूपं दण्डनीतेश्च व्याख्यानं व्यधात्।

यतो दण्डः सर्वाः प्रजाः शास्ति, स च दण्डः प्रजानां रक्षणमपि विदधाति, तथा ये सुप्तावस्थायां भवन्ति तेषां कृते दण्ड एव जागर्ति, तद्भयेनैव चौरादीनां निवृत्तिः जायते। तेनैव वृद्धाः दण्डमेव धर्ममिति आमनन्ति। उक्तं हि -

**दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ।**
**दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ।।**[15]

यजुर्वेदे एकस्मिन् मन्त्रे प्रार्थितं यत् – 'स्तेनं तस्करं समितं निर्ऋतिर्देवी गच्छेत् । सा च निर्ऋतिं कष्टं मृत्युं वा भवति।' **"निर्ऋतिः: कृच्छ्रापत्तिरितरा"** इत्येव निरुक्तकारेण उक्तम्।

उक्तं हि- **असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य।**[16]

ऋक्संहितायां एकस्मिन् मन्त्रे यः वस्त्रं चोरयति सः तायुः इत्युच्यते। तादृशं दण्डविधानं पापकृतां कृते परिकल्पितम्।

ऋग्वेदे अपराधस्य पापस्य च कृते पृथक्तया शब्दद्वयं निर्दिष्टम्। तत्र अपराध आग इति नाम्ना तथा पापम् एन इति नाम्ना द्योतितं परिलक्ष्यते। प्रोक्तं यथा-

**यो नो आगो अभ्येनो भरात्यधीदघमघशंसे दधात।**
**जही चिकित्वो अभिशस्तिमेतामग्ने यो नो मर्चयति द्वयेन॥**[17]

एवं च यदि सूक्ष्मं विचार्यते तर्हि वैदिककाले राजशासनस्य दण्डव्यवस्थायाश्च प्रचलनम् आसीदेव इति निश्चयेन वक्तुं शक्यते।

## सहायकग्रन्थसूची


- ऋग्वेदः - अजमेरीययन्त्रालये मुद्रितः, सि. सं. २०१०
- निरुक्तम् - सं. श्रीमुकुन्दशर्मा, चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली, १९८८
- कठोपनिषद् -आनन्दाश्रममुद्रणालयः, १९१४
- निरुक्तम् - सं. श्रीमुकुन्दशर्मा, चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली, १९८८
- यजुर्वेदः - महर्षि व्यासदेवः(सं)महर्षि दयानन्द सरस्वती, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, १९८८
- मनुस्मृतिः -कुल्लूकभट्टकृत मन्वर्थमुक्तावली, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, १९८८
- मनुस्मृतिः - मेधातिथिभाष्यसहिता, एसियाटिक् सोसाईटी आफ् बेङ्गल, कलिकता, १९६९
- मनुस्मृतिः - व्या.श्री कुल्लुकभट्टः, मोतीलाल बनारसीदास, १९९०


[13] निरु.४/१
[14] मनु.७/२१
[15] मनु.७/१८
[16] यजु.१२/६२
[17] ऋ.वे.५/३/७

# संस्कृतवाङ्मये पर्यावरणचिन्तने वनस्पतीनामन्यवृक्षाणां च भूमिका

**डॉ. रत्नाकर-खुण्टिया**

**अध्यापकः, नीलगिरिसंस्कृतमहाविद्यालयः**

**राजनीलगिरिः, बालासोरः, ओडिशा**

**प्रबन्धसारः**

*शब्दद्वयसहयोगेन निष्पन्नः पर्यावरणशब्दो निष्पद्यते। वनस्पति-प्राणि-मानवजातिभिः सह सजीवपदार्थसम्बन्धी भौतिकपरिसर एव पर्यावरणम् इत्युच्यते। पर्यावरणे वनस्पतीनां महती भूमिका वर्तते। पुष्पं विना एव यः फलमुत्पादयति स वनस्पतिरित्युच्यते। पुष्पमुत्पाद्य पुष्पमुत्पाद्य यः फलमुत्पादयति स भवति वृक्षः। मनुष्याणां जीवनधारणार्थं खाद्यवस्त्रादिभिः सह पर्यावरणस्यापि शुद्धताया आवश्यकता अस्ति। द्यौः शान्तिरन्तरीक्षः शान्तिः पृथिवी शान्तिरित्येवं वैदिकवाक्यानि सुपरिवेशविषये सचेतनतां सूचयन्ति। वृक्षरोपणद्वारा परिवेशप्रदूषणाद् रक्षणं मिलति। वृक्ष एव अस्माकं परममित्रम् अस्ति। वृक्षद्वारा एव वायुमण्डलं निर्मलं भवति। शुद्धनिर्मलवायुद्वारा अस्माकं जीवनयात्रा सुखमयी आनन्दमयी च भवति। परिवेशरक्षणाय सर्वे नागरिका यत्नशीला भवेयुः। सुखस्य अयं विषयो यत् अद्यत्वे सर्वकारैः परिवेशस्य सुरक्षार्थम् एकः मन्त्रणालयः संस्थापितः। सा संस्था यद्यपि परिवेशविषये कार्यारम्भं करोति परन्तु जनसहयोगं विना किमपि सफलं नैव भवति। अत एव अस्मिन् विषमे समये परिवेशः यथा अस्माकं हिताय, सुखाय च भवेत् तदर्थं चेष्टा कर्तव्या।*

**कुञ्चीशब्दाः –** पर्यावरणम्, वनस्पतिः, वृक्षः, वायुः, मानवजीवनं चेत्यादयः।

*******************************************************************************

पर्यावरणम् इत्येको व्यापकशब्दोऽस्ति। अयं शब्दः व्युत्पत्त्यानुसारं परि-आङ्पूर्वकात् वृञ्-धातोः भावार्थे ल्युट्प्रत्यये सति निष्पद्यते। पर्यावरणम् इत्यत्र पदद्वयम् अस्ति – परि, आवरणञ्च। 'परि' इति शब्दस्य अर्थोऽस्ति 'चतुःपार्श्वम्', तथा 'आवरणम्' इति शब्दस्यार्थः परिवेशः इति। पुनश्च अस्य शब्दस्य व्यापकोऽर्थः अस्ति – वनस्पति-प्राणि-मानवजातिभिः सह सजीवपदार्थसम्बन्धी भौतिकपरिसर एव पर्यावरणम् इत्युच्यते। वास्तवतः पर्यावरणे वायुः, जलं, भूमिः, आकाशः, वृक्ष-लता-तरु-गुल्म-पर्वत-नदी-जीवजन्तु-मानवजातिप्रभृतयः विद्यन्ते। एतेषाम् एतासां वा विविधानां गतिविधीनां परिणामादिसमावेशः एव पर्यावरणम् इति कथ्यते। वयं मानवाः वायु-जल-मृद्भिः आवृत्ते वातावरणे निवसामः। एतदेव वातावरणं पर्यावरणम् इत्युच्यते। पर्यावरणेनैव वयं जीवनोपयोगिवस्तुनि प्राप्नुमः, येन सुखेन आनन्देन च जीवामः।

संस्कृतसाहित्ये पर्यावरणस्य शुद्धतानिमित्तं वनस्पतीनामन्यवृक्षाणां च भूमिका महत्वपूर्णास्ति। पुष्पं विनैव यः फलमुत्पादयति स वनस्पतिरित्युच्यते। तद्यथा-

**"अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः।**
**पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः।।"**

(म. स्मृ., ३-१-४७)

पुष्पमुत्पाद्य यः फलमुत्पादयति सः वृक्षः भवति। वनस्पतिः अस्मान् संजीवनीशक्तिं प्रयच्छति तथा च परिवेशप्रदूषणात् रक्षति। तदर्थम् ऐतरेयब्राह्मणे उच्यते-

**"प्राणो वै वनस्पतिः**
**वीरुधो वैश्यदेवीरुग्राः पुरुष जीवनीः"**

(ऐ.ब्रा.-२/४)

पुनश्च शतपथब्राह्मणे वृक्षः शिवौषधिरूपेण वर्ण्यते। तथा च यजुर्वेदे रुद्ररूपेण वृक्षाणां वर्धनं क्रियते। तद्यथा-

**"औषधयो वै पशुपतिः।**

**नमो वृक्षेभ्यो हरिकेशेभ्यो वनानां पतये नमः"**

(श.ब्रा.-६/१/३/१२)

अथर्ववेदे कथ्यते - वृक्षारोपणद्वारा अस्माकं परिवेशः निर्मलः भवति। यतः वृक्षः प्राणवायोः (अक्सीजन्) तथा जलस्रोतसां रक्षां करोति। अस्य उल्लेखः वर्तते-

**"वनस्पतिं वन आस्थापयध्वं**
**नि षू दधित्वमखनन्त उत्सम्"**

(अ.वे.-१८/७/४)

वेदे पर्यावरणसंरक्षणनिमित्तम् अनेकाः मन्त्राः प्राप्यन्ते। पुनश्च अथर्ववेदे उच्यते पर्यावरणे मुख्यतः नल्वत्रयाणां महती भूमिका दृश्यते। यथोक्तं-

**"त्रीणि छन्दांसि कवयो वियेतिरे,**
**पुरुरूपं दर्शत विश्वचक्षणम्**
**आपो वाता औषधयः**
**तान्येकस्मिन् भुवन अर्पितानि।"**

(अ. वे.-१८/१/१७)

यजुर्वेदे दिवः तथा पृथ्व्याः रक्षणाय निर्देशः विहितः। यतः वृक्षः पितृमातृवत् अस्मान् पालयति पोषयति च। तद्यथा-

"**पृथिवी माता द्यौर्पिता।**" (य. वे.-२.१०.११)

**"अवतां त्वा द्यावापृथिवी अव त्वं द्यावापृथिवी।"**

(य. वे.-२.९)

उद्भिनत्ति भूमिम् इति उद्भिज्जः वृक्षः भवति यः पृथिवीं उद्भिद्य जायते जीवः सः उद्भिज्जशब्देन कथ्यते। वृक्ष-गुल्म-लता-तृण-औषधिवनस्पतयः उद्भिज्जा भवन्ति। एते पृथिव्याः विषयाः सन्ति इति वैशेषिका वदन्ति। मनुना उक्तं-

**"उद्भिजाः स्थावराः सर्वे बीजकाण्डप्ररोहिणः।**
**औषध्यः फलपाकान्ता बहुपुष्पफलोपगाः।।"**

(म.स्मृ.-१/४६)

बीजात् काण्डात् (शाखायाः) वा उत्पद्यमानः वृक्षः लता स्थावरजीवः उद्भिज्जपदवाच्यो भवति। केचन फलपाकानन्तरं नष्टा भवन्ति। यस्मात् बहुफलानि पुष्पाणि च उत्पद्यन्ते स जीवः औषधिः इति कथ्यते। औषधीनामपि उत्पत्तिः पृथिवीम् उद्भिद्य एव भवति। अतः औषधिः अपि उद्भिज्जः एव अस्ति। शुश्रूते तु इन्द्रगोपमण्डूकप्रभृतयः उद्भिज्जाः इति प्रतिपादितं विद्यते। इन्द्रगोपः सूक्ष्मकृमिविशेषः मण्डुकपक्षी लतादयः उद्भिज्जाः भवन्ति।

मानवजीवनस्य वृक्षेण सह सम्पर्कः निविडोऽस्ति। वृक्षं विना क्षणमपि वयं जीवितुं न पारयामः। वृक्षात् निर्गतः (अक्सीजन्) अस्माकं जीवनधारणस्य मूलस्रोतोऽस्ति। एतदर्थम् उच्यते-

**"श्वसतश्चोऽच्छ्वसन्तश्च शुद्धां कुर्वन्त्यर्हनिर्शं**
**विवाहसं विनायासं वृक्षान्तान्नभिवादये।।**
**प्रपूरयन्तो वियतं सततं प्राणवायुना।**
**तारयन्ति जगत्सर्वं तदेते तरवो मताः।**
**छिन्नामपि वृक्षाणां लुब्धैः स्वार्थपरायणैः।**
**वद्धनं द्विगुणं भूयात्तद्धिताय हितैषिणाम्।।"**

वृक्षाः अस्माकं हितकारकाः सन्ति। औषधरूपेण अस्मान् रोगात् त्रायन्ते। अधुना नराः प्रतिदिनं वृक्षच्छेदनं कुर्वन्ति। एवं यदि स्यात् तर्हि कियद्दिनान्तरम् अस्माकं देशः वृक्षशून्यो भविष्यति। वने ईदृशाः सुदुर्लभाः वृक्षाः लभ्यन्ते ये तु दुरारोगस्य व्याधिविनाशकः अस्ति। पुराणेषु कथितमस्ति - व्याधिनिवारणाय अग्निदेवेन खाण्डवं वनं भक्षितं दग्धीकृत्य पुनश्च वृक्षैः वृष्टिः वृष्टिभिः अन्नं, तथा अन्नात् प्रजाः जायन्ते। गीतायाम् उक्तं-

**"अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः"**

(भ. गीता.-३/१४)

पुरा सज्जनाः समग्रजीवनम् अरण्ये एव यापयन्ति। एतत्तु मानवजीवनस्य आश्रमव्यवस्थायाम् आसीत्। वने परिवेष्टिताः वृक्षाः तेभ्य आनन्दं, सुखं, शान्तिं च प्रयच्छन्ति। अधुना सर्वकारः अरण्यानां पुनरुद्धाराय चेष्टते। वनीकरणाय जनान् प्रवर्त्तयति च। अनेन परिवेशः निर्मलो

भविष्यति। प्रकृतिः शान्ता भविष्यति। वृक्षरोपणं तु एकं पुण्यकर्मं भवति। उक्तं च वराहपुराणे-

**“भूमिदानेन यो लोकाः गोदानेन च कीर्त्तिताः।**
**ते लोका प्राप्यन्ते पुंभिः पादपानां प्ररोहणे।।”**

“नरत्वं दुर्लभं लोके” इति वचनं स्मारं स्मारं प्रतिदिनं वृक्षरोपणम् अस्माकं प्रधानं कर्तव्यम्। येन अस्माकं वातावरणं परिवेशप्रदूषणात् विनिर्मुक्तं भविष्यति। वृक्षः अस्माकं मित्रम् अस्ति इति हेतोः वृक्षस्य सुरक्षार्थं समाजे सचेतनतावार्ता अस्माभिः प्रदातव्या, येन वयं दीर्घायुषः भविष्याम इत्यलं विस्तरेण।

**सहायकग्रन्थसूची**


- The Environment Studies- Panchsila Prakashna - Jan-2020
- The Conservation & Environmentalism Robort C Paehike Publication-1995
- The Environment Science Studies Perfect Books Prakashan Daraganj Delhi-1997
- The Environmental Education Studies Kaniska Publication Punjab-2006

# वैदिकयुगे दैनन्दिनजीवने सामाजिकी आर्थिकी च परिस्थितिः

**डॉ. विकाश-मण्डलः**
संस्कृतविभागः, पाण्डिचेरी-विश्वविद्यालयः
पाण्डिचेरी

***प्रबन्धसारः***

*अस्मिन् निबन्धे वैदिककालस्य दैनन्दिनजीवनस्य, सामाजिकस्य, आर्थिकस्य च सूचनाः सङ्गृह्य प्रस्तुतीकरणस्य प्रयासः कृतः अस्ति। यथा - वैदिकसामाजिकव्यवस्था, परिवारव्यवस्था, अन्न-पेय-वेष-अङ्गाः, आर्थिकविनिमयः, आर्थिकव्यवस्था, जीवनयापनम्, आयः श्रमविभागः च इति विषयाः सन्ति। हिन्दुधर्मस्य प्राचीनतमाः पवित्रग्रन्थाः वेदाः उत्तरभारतीय-उपमहाद्वीपे एव रचिताः आसन्। वेदाः धर्मग्रन्थाः हिन्दुधर्मस्य आधारं निर्मान्ति । तस्मिन् काले जनाः कथं जीवन्ति स्म, कथं वर्तन्ते स्म इति अपि वेदाः व्याख्यायन्ते । एतानि तथ्यानि वैदिकसमाजस्य तस्य संस्कृतेश्च अध्ययने सहायकानि भवन्ति । आर्याणाम् आर्थिकसामाजिकजीवनस्य विषये ज्ञातव्यम्। परिवारः सामाजिकः राजनैतिकः च एककः इति गण्यते स्म। पिता परिवारस्य प्रमुखः आसीत्, "गृहपतिः" इति नाम्ना प्रसिद्धः आसीत्। आर्याणां संयुक्तपरिवाराः आसन्। आर्याः शाकभोजनं पशुभोजनं च कुर्वन्ति स्म। तण्डुलः, यवः, ताम्बूलः, तिलः च मुख्याहारा भवन्ति स्म। तस्मिन् काले रोटिका, क्षीरं, घृतं, दधि, फलानि च खाद्यन्ते स्म। वैदिकजनानाम् अर्थव्यवस्था कृषिं, पशुपालनं च आधारीकृत्य आसीत्, यतः तेषां पशवः आसन् । तैः सह अश्वः, मेषः, वृषभः, कुक्कुरः, गौः चेत्यादीन् गृहपशून् अपि जनाः पालयन्ति स्म । तेषां कर्पासस्य गोधूमस्य वा कृषिविषये ज्ञानं नासीत्। वैदिकजनाः पशूनां मध्ये गां स्वस्य महत्त्वपूर्णां सम्पत्तिं मन्यन्ते स्म। आर्थिकस्रोतोरूपेण विशेषतः कृषिः, पशुपालनं, व्यापारः, विविधजीविकाः चेत्यादीनां विषये अत्र चर्चा कृता अस्ति।*

**कुञ्चीशब्दाः** - वैदिककालः, सामाजः, आर्थिकव्यवस्था, ऋग्वेदः, अथर्ववेदः चेत्यादयः।

*******************************************************************************

## प्रस्तावना

वैदिकसाहित्यं प्राचीनभारतीयसंस्कृतेः धारकं वाहकं च अस्ति। वैदिकसाहित्यस्य विशेषतः ऋग्वेद-यजुर्वेद-अथर्ववेद-सम्बद्धेषु ग्रन्थेषु वैदिकजनानां सामाजिक-आर्थिक-दैनिकजीवन-सम्बद्धानां सूचनानां संग्रहः अस्ति। ऋषिः स्वस्य दिव्यदृष्ट्या वैदिकमन्त्रान् दृष्टवान्। एते अपौरुषेयमन्त्राः ऋषिभिः उक्ताः। भारतीयाध्यात्मिकचेतना वैदिकमन्त्रेषु प्रतिबिम्बितम् अस्ति। वैदिकमन्त्राः न केवलम् आध्यात्मिकचेतनया अपि तु दैनन्दिनजीवनस्य सामाजिक-आर्थिक-चेतनाभ्याम् अपि समृद्धाः भवन्ति। वैदिकसाहित्यस्य अनुशीलनेन सामाजिकपरिस्थितिः, आर्थिकव्यवस्था, वैदिकयुगे दैनन्दिनजीवनं कीदृशम् आसीत्? चेत्यादिविषये अन्वेषणं प्राप्यते। एतान् सर्वान् दृष्ट्वा वैदिकसाहित्यस्य सम्यक् मूल्याङ्कनम् अद्यत्वे अपि सम्यक् न कृतम् इति वक्तुं शक्यते। स्वल्पशब्देन वक्तुं शक्यते यत् वैदिकसाहित्यं विशेषतः वेदाः वैदिकसभ्यतायाः भारतीयपरम्परायाः च प्रतीकाः सन्ति। प्रागैतिहासिकयुगस्य साक्षिस्वरूपाः वेदाः भारतीयमीमांसायाः अद्भुतम् उदाहरणम् अस्ति। अतः एतस्या विपुलज्ञानसम्पत्त्याः ज्ञानं निष्कास्य मानवजातेः समक्षं प्रस्तोतव्यम्।

## वैदिककाले सामाजिकव्यवस्था

वैदिकसमाजः मुख्यतया पितृसत्तात्मकः आसीत्। प्रत्येकं गृहे पिता प्रमुखः आसीत्। तस्य पत्नी, पुत्रकन्ये, स्नुषा, पौत्रः, अन्ये कुटुम्बजनाः च तस्य अधीने निवसन्ति स्म। पिता न केवलं पुत्रस्य अपितु कन्यायाः अपि शिक्षणस्य व्यवस्थां करोति

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

स्म। समाजे संगठितविवाहाः अपि प्रचलिताः आसन्। पुनः समाजे विधवा-विवाह-व्यवस्था प्रचलिता आसीत्[1]। अथर्ववेदे ऋग्वेदस्य पारम्परिकविवाहव्यवस्थायाः किञ्चित् परिवर्तनं दृश्यते। ऋग्वेदस्य पुरुषसूक्ते[2] चतुर्णां वर्णानाम् उत्पत्तिविषये उल्लेखः अस्ति। अथर्ववेदकाले तृतीयो वर्णः (वैश्यः अथवा विश्) चतुर्थस्य अथवा अधमजातिशूद्रस्य समीपे आजीविकायाः विद्वत्तायाः च कृते आगता। सम्भवतः कृषिः, व्यापारः, वाणिज्यं च वैश्यानां मुख्यजीविकारूपेण स्थानं प्राप्तवन्तः, शूद्रसमाजः श्रमवर्गरूपे गण्यते स्म अर्थशास्त्रानुसारम्। अथर्ववेदसंहिता, काठकसंहिता, तैत्तिरीयसंहिता, वाजसनेयीसंहिता च अस्य प्रमाणं प्रस्तौति। चतुर्वर्णः त्रिवर्णाद् भिन्नः इति कथयितुं अद्भुतः मार्गः स्वीकृतः[3]। एतेषु वेदेषु ब्राह्मणानां लोभः, वञ्चनं, तेषां विशेषाधिकारस्य आग्रहः चेति सम्यक् वर्णितम् अस्ति[4]। अन्येषु ग्रन्थेषु अपि अस्य उल्लेखः अस्ति, परन्तु समाजे सर्वेषां ब्राह्मणानां समाना मर्यादा नासीत्। तेषु बहवः चरितबुद्ध्या समाजे श्रेष्ठासनयोग्याः आसन् इति न संशयः।

**परिवारव्यवस्था**

वैदिकसमाजस्य परिवारप्रमुखः पिता, यस्य तन्त्रे सर्वे सुखेन वसन्ति। वैदिककाले अस्य नगरस्य अस्तित्वविषये पर्याप्तं मतभेदः आसीत्। वैदिकसमाजः प्रधानतया ग्राम्यसमाजः आसीत्, परन्तु अस्य एतन्नात्पर्यं नास्ति यत् नागरिकजीवनं नासीत्। नगरशब्दः आरण्यके विशिष्टतया दृश्यते[5]। पुनः ऐतरेयब्राह्मणे[6] नागरिकजनविषये व्यक्तिवाचक इति पदं प्राप्यते। परन्तु वैदिकसाहित्ये प्राप्यमाणं पुर् पुरश्चेति शब्दद्वयं संशयास्पदम् अस्ति। त्रिपुरं[7] महापुरं[8] चेति पदद्वयं विशालनिवासस्य कृते उपयुज्यते इति न संशयः। पूर्वोक्तः वैदिकसमाजः ग्रामकेन्द्रिकः समाजः आसीत्। वैदिकजातेः आवश्यकवस्तूनि वैदिकग्रामेभ्यः पूर्यन्ते स्म। तेषां आवश्यकानां कृते ते कदापि अन्यग्रामेषु आश्रिताः न आसन्। ग्रामेषु निवसन्ती वैदिकजातिः कृषिद्वारा अन्नं, खाद्यपदार्थः चेत्यादीनि, पशुपालनद्वारा च दुग्धं, घृतम् इत्यादीनि च उत्पादयति स्म। परिवारे सर्वे एवम् अकुर्वन्। समग्रपरिवारस्य कृते स्थायिगृहाणि निर्मितानि आसन्। वैदिकमन्त्रेषु वास्तु, आयतनं, दुरोणं, हरम्यं, पस्त्यं, सुवास्तु चेत्यादीनि पदानि गृहनिर्देशार्थं प्रयुज्यन्ते। एते सर्वे शब्दाः नानाकाराणां गृहाणां कृते व्यवह्रियन्ते। अथर्ववेदस्य[9] द्वे सूक्ते गृहनिर्माणप्रक्रियां निर्दिशतः। प्रत्येकस्मिन् गृहे आवश्यकतानुसारं पृथक् पृथक् कक्षाः निर्मिताः आसन्। एतेषां गृहाणां मापनार्थं निमितः मितः चेति शब्दद्वयं प्रयुज्यते -

**"ब्रह्मणा शालां निमितां कविभिर्निमितां मिताम्।**
**इन्द्राग्नी रक्षतां शालाममृतौ सौम्यं सदः"॥**[10]

वैदिकपरिवारजीवनविषये सम्पूर्णं सूक्तम् अथर्ववेदे[11] प्राप्यते। अस्मिन् सूक्ते आतिथ्यं प्रशंसितम्। ऐतरेय-आरण्यके अस्मिन् सन्दर्भे विशेषं बलं दत्तम् अस्ति। दैनन्दिनजीवने अतिथिभ्यः अर्पणं आतिथ्यं वा गृहकार्यस्य अभिन्नः भागः आसीत्।

---

[1] "या पूर्वं पतिं वित्त्वाथान्यं विन्दतेऽपरम्।
पञ्चौदनं च तावजं ददतो न वि योषतः"॥ अ. वे. ९/५/२७

[2] "ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत"॥ ऋ. वे.- १०/९०/१२

[3] "ये राजानो राजकृतः सूता ग्रामण्यश्च ये।
उपस्तीन् पर्ण मह्यं त्वं सर्वान् कृण्वभितो जनान्"॥ अ. वे. – ३/५/७

[4] अ. वे. – ३५/१७/९, ५/१८/९-१०

[5] तै. आ. – १/११८

[6] ऐ. ब्रा. ५/३०

[7] वा. सं. – ६/२३, श. ब्रा. – ६/३/३/२५, ऐ. ब्रा. – २/११

[8] तै. सं. – ६/२/३/१

[9] अ. वे. – ३/९, ९/३

[10] अ. वे. – ९/३/१९

[11] अ. वे. – ९/६

**अन्नपानं वस्त्रं च**

वैदिक आहारः सरलः, पौष्टिकः, स्वास्थ्यवर्धकश्चेति सात्त्विकाहारा यथा आसन् तथैव तामसाहारे दुग्धघृतयोः प्रचुरता आसीत्। ऋग्वेदस्य अध्ययनेन ज्ञायते यत् प्राचीनतमं भारतीयभोजनं यवरोटिका, तण्डुलः (धानम्) च अस्ति। ऋग्वेदस्य नानामन्त्रेषु यवस्य उल्लेखः अस्ति, परन्तु ऋग्वेदे ब्रीहिशब्दस्य प्रयोगः न दृश्यते। परन्तु पश्चात् संहितासु अस्य शब्दस्य उल्लेखः दृश्यते। पिष्टशिलायां यवं पिशित्वा रोटिकानिर्माणं भवति स्म[12]। आर्यजातयः सोमरसं पिबन्ति स्म। अथर्ववेदकाले नानाप्रकाराहारस्य सन्दर्भाः सन्ति। कामोद्दीपकः पेयः सुरा ऋग्वेदकाले प्राप्यते स्म, अथर्ववेदेऽपि तस्य उल्लेखः अस्ति। यद्यपि सुरा सामान्यपानरूपेण प्रचलति स्म, तथापि सुरा अधर्मत्वेन उल्लिखिता आसीत् -

**"यथा मांसं यथा सुरा यथाक्षा अधिदेवने।**
**यथा पुंसो वृषण्यत स्त्रियां निहन्यते मनः।**
**एवा ते अघ्न्ये मनोऽधि वत्से नि हन्यताम्॥"[13]**

ब्रीहिः, धानं, क्षीरं च अस्य कालस्य मुख्या आहारपदार्था आसन्। यज्ञस्य पुरोडाशः, सोमरसः च पुरोहितानां कृते आसीत्। वैदिकसाहित्येषु वस्त्रविषये उपलब्धा सूचना एतावता अल्पा अस्ति यत् तत्कालस्य सम्पूर्णं परिचयं न प्रकाशयति। तथापि विकीर्णसूचनाः एकत्र कृत्वा तत्कालीनवेषस्य कश्चन भागः प्रस्तोतुं शक्यते। सामान्यतः वस्त्रभागाः कर्पासः, क्षौमः, ऊनः चेत्यादिभिः निर्मिताः आसन्। तत्कालीनजनाः अजिनं चर्मकृतं कुशं पटं च धारयन्ति स्म। ऋग्वेदस्य अनेकेषु मन्त्रेषु अजिनानां भिन्नप्रकाराणाम् उल्लेखः अस्ति। अथर्ववेदोक्तानि अन्यानि वस्त्रवस्तूनि ऋग्वेदवर्णितवस्त्रैः सदृशानि सन्ति। अथर्ववेदे यः प्रवर्तः[14] इति शब्दः प्रयुक्तः सः सम्भवतः कर्णबलस्य द्योतक एव अस्ति। वैदिकसमाजे स्त्रीपुरुषयोः वेषभेदः आसीत् न वेति दुर्बोध्यमस्ति। तथापि स्त्रीपुरुषाणां वस्त्रेषु विशेषः भेदः नासीत् इति। स्त्रीपुरुषयोः[15] अलङ्कारः अन्तःवस्त्रं, बाह्यवस्त्रं च आसीत्। अथर्ववेदे नीविः[16] इति नाम्ना अधोवस्त्रस्य उल्लेखः अस्ति। तदतिरिक्तं ते स्वशरीरस्य अलङ्कारार्थं निष्कः, रुक्मः, मणिः चेत्यादीनि आभरणानि धारयन्ति स्म।

**आर्थिकव्यवस्था**

वैदिकजातिः प्राचीनावस्थाम् अतिक्रान्तवती यदा मानवजातिः क्षुधायाः निवृत्त्यर्थं आखेटकम् आरब्धवान्। वैदिकजातिः सुव्यवस्थितरूपेण कस्मिंश्चित् स्थानविशेषे सुव्यवस्थितसमाजं निर्मितवती। क्रमेण तेषाम् आर्थिकजीवनं मुख्यतया कृषिसमृद्धं जातम्। पशुपालनं च तेषाम् आर्थिकस्थितेः आधारः आसीत्। तस्मिन् काले कांस्यस्मिथाः, काष्ठकाराः, कुम्भकाराः, बुनकराः च आसन्, अतः वैदिककाले आर्थिकव्यवस्था सुव्यवस्थिता आसीत् इति निश्चयेन वक्तुं शक्यते।

**जीविकाश्रविभागः**

कृषिं पशुपालनं च विहायापि वैदिकजातिः अन्यैः आजीविकासाधनैः जीवनं यापयति स्म। समस्त-वैदिकसाहित्याध्ययनेन ज्ञायते यत् तस्मिन् काले वैदिकजातयः तक्षणं (काष्ठकारः), कर्मकारः (लोहारः), भिषक् (वैद्यः), शिल्पकारः, कुलालः

---

[12] ऋ. वे. – ४/१४/५

[13] अ. वे. – ६/७०/१

[14] "रात्री केशा हरितौ प्रवर्तौ कल्मलिर्मणिः।" अ. वे. – १५/२/५

[15] "अधिवस्त्रा उपरिनिहितवस्त्रा" (सायण)। ऋ. वे. – ८/२६/१३

[16] (क) "यत्ते वासः परिधानं यां नीविं कृणुषे त्वम्।
शिवं ते तन्वे३ तत् कृण्मः संस्पर्शेऽद्रूक्ष्णमस्तु ते॥" अ. वे. – ८/२/१६

(ख) "परिसृष्टं धारयतु यद्धितं माव पादि तत्।
गर्भं त उग्रौ रक्षतां भेषजौ नीविभार्यौ॥" अ. वे. – ८/६/२०

(ग) "या मे प्रियतमा तनूः सा मे बिभाय वाससः।
तस्याग्रे त्वं वनस्पते नीविं कृणुष्व मा वयं रिषाम॥" अ. वे. – १४/२/५०

(कुम्भकारः), सारथिः, कैवर्तः, निषादः (पशुपालनम्) चेत्यादीन् आजीविकायाः विभिन्नभागान् स्वीकृतवन्तः। वैदिकाः स्वतन्त्रतया एतां वृत्तिम् अङ्गीकृतवन्तः, प्रतिबन्धकनियमाः नासन्। अतः काष्ठकाराः, कुम्भकाराः, कर्मकाराः चेत्यादयः निम्नजात्यन्तर्गताः जनाः आसन् अथवा ते पृथक् जातिं निर्मितवन्तः। ऋग्वेदे[17] कर्मवृत्तिः महता आदरपूर्वकम् उक्ता। अथर्ववेदे कर्माराः, धीवनाः, रथकाराः च तान्त्रिकविज्ञानिरूपेण सूचीकृताः सन्ति।

**"ये धीवानो रथकाराः कर्मारा ये मनीषिणः।**
**उपस्तीन्पर्ण मह्यं त्वं सर्वान्कृण्वभितो जनान्"॥**[18]

अपि च तन्तुवायस्य विषये विविधाः सूचनाः तेषां क्रियाकलापाः च वैदिकसाहित्येषु उपलभ्यन्ते[19]। सिन्धुनद्याः वर्णनस्य सन्दर्भे सिन्धुप्रदेशः कर्पासस्य ऊनस्य (उर्णस्य) च केन्द्रत्वेन उल्लिखितः अस्ति। अत एव सिन्धुः सुबसा उर्णवती इति उपमाभिः अलङ्कृतः[20]। पुनश्च मरुद्देवता परुष्णीनिर्मित-स्वच्छवस्त्रधारिरूपेण उल्लिखिता[21]। वैदिकयुगे कृषिजन्यपदार्थाः औद्योगिकपदार्थाः च क्रियन्ते विक्रीयन्ते स्म। तस्मिन् समये व्यापारः प्रचलितः आसीत्। व्यापारिणां वणिक् इति तद् कर्म व्यापारः इत्यभिधीयते स्म। वैदिककाले पणिः इति जातिः (वणिजवर्गः) स्थलजलमार्गेण विविधवस्तूनां व्यापारं कुर्वन् आसीत्। अथर्ववेदे[22] दूर्शस्य (वस्त्रस्य), पवस्तस्य (अजिनचर्मणः) क्रयणस्य उल्लेखः अस्ति। तस्मिन् काले समुद्रमार्गेण अपि व्यापारः क्रियते स्म। पाश्चात्त्यविद्वांसः तु ऋग्वेदकाले वेदाः समुद्रेण सह परिचिताः न आसन् इति मतम् आसीत्। परन्तु ऋग्वेदस्य अध्ययनेन स्पष्टतया ज्ञायते यत् एषः विचारः सर्वथा दोषपूर्णः अस्ति। साधारणनौकानाम् अतिरिक्तम् ऋग्वेदमन्त्रेषु शतारित्रयुक्ताः बृहत्-नौकायाः स्पष्टतया उल्लेखः अस्ति[23]। एतानि पतत्रि इति नाम्ना उच्यन्ते। अत्र पतत्रिः इत्युक्ते नावः दिशानिर्धारकवस्तुविशेषः[24]। वरुणदेवस्य स्तुतिं कुर्वन् ऋषिः शुनःशेपः अवदत् -

**"वेदा यो वीनां पदमन्तरिक्षेण पतताम्।**
**वेद नावः समुद्रियः"॥**[25]

अतः ऋग्वेदकाले वैदिकाः समुद्रेण सह सुपरिचिताः आसन्। अतः वैदिकाः समुद्रमार्गे जहाजयानैः व्यापारं कृतवन्तः स्यात्। अथर्ववेदे एकस्मिन् सम्पूर्णे सूक्ते[26] व्यापारस्य सफलता उच्यते। ऋग्वेदकाले श्रमविभागः न प्रचलति स्म इति पूर्वमेव

---

[17] ऋ. वे. – १०/७२/२

[18] अ. वे. – ३/५/६

[19] (क) "आधीषमाणायाः पतिः शुचायाश्च शुचस्य च।
वासोवायोऽवीनामा वासांसि मर्मृजत्॥" ऋ. वे. – १०/२६/६

(ख) "नाहं तन्तुं न वि जानाम्योतुं न यं वयन्ति समरेऽतमानाः।
कस्य स्वित्पुत्र इह वक्त्वानि परो वदात्यवरेण पित्रा॥" ऋ. वे. – ६/९/२

(ग) "पुमाँ एनं तनुत उत्कृणत्ति पुमान्वि तत्ने अधि नाके अस्मिन्।
इमे मयूखा उप सेदुरू सदः सामानि चक्रुस्तसराण्योतवे॥" ऋ.वे.– १०/१३०/२

(घ) तै. सं. – ६/१/१/४, वा. सं. १९/८०

[20] "स्वश्वा सिन्धुः सुरथा सुवासा हिरण्ययी सुकृता वाजिनीवती।
ऊर्णावती युवतिः सीलमावत्युताधि वस्ते सुभगा मधुवृधम्॥" ऋ.वे.–१०/७५/८

[21] "उत स्म ते परुष्ण्यामूर्णा वसत शुन्ध्यवः।
उत पव्या रथानामद्रिं भिन्दन्त्योजसा॥" ऋ. वे. – ५/५२/९

[22] "पवस्तैस्त्वा पर्यक्रीणन् दूर्शेभिरजिनैरुत।
प्रक्रीरसि त्वमोषधेऽभ्रिखाते न रूरुपः॥" अ. वे. – ४/७/६

[23] "अनारम्भणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे।
यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसम्॥" ऋ. वे. – १/११६/५

[24] "युवं भुज्युं समुद्र आ रजसः पार ईङ्खितम्।
यातमच्छा पतत्रिभिर्नासत्या सातये कृतम्॥" ऋ. वे. – १०/१४३/५

[25] ऋ. वे. – १/२५/७

[26] अ. वे. – ३/१५

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

उक्तं, यतः तदा एकस्यैव गृहस्य सदस्याः भिन्न-भिन्न-जीविकासु प्रवृत्ताः आसन्।

**आर्थिकविनिमयः**

विश्वस्य इतिहासे सर्वेषु प्राचीनदेशेषु आदिमम् आदानप्रदानं विनिमयद्वारा, एकं वस्तु अन्यस्य वस्तुनः विनिमयरूपेण दानाय वा प्रापणाय वा आसीत्। सरलस्य विनिमयस्य युगः आसीत्। क्रमेण समाजे जटिलता प्रादुर्भूता, धातुयुगे यत्किमपि सामान्यं वस्तु वा पशुर्वा आदानप्रदानस्य माध्यमं मन्यते स्म, वैदिकानां कृते गौः निधिः आसीत्। अत एव गोः गो-धनम् इति नाम आसीत्, गोभिः सोमक्रयणं, गावः पुरस्काररूपेण विजेतारं प्रति गोदानं च प्रथा आसीत्। गोः, तस्याः द्विगुणस्य, तस्याः अर्धस्य वा मूल्यस्य समं मूल्यं निर्धार्य द्रव्यस्य क्रयविक्रयः भवति स्म। परन्तु अस्मात् न्यूनांशानां मूल्यनिर्धारणं कठिनम् आसीत्। अतः सरलतरस्य लघुतरस्य च आदानप्रदानमाध्यमस्य आवश्यकता आसीत्। अस्मिन् सन्दर्भे धातुः सरलतरः सुलभतरश्च माध्यम आसीत्। धातुमुद्राः प्रारम्भिकं विनिमयमाध्यरूपेण प्रसिद्धा आसन्। वैदिककाले गावः आदानप्रदानसाधनरूपेण उपयुज्यन्ते स्म। सुवर्णरजतमुद्राः अपि तदा प्रचलिताः आसन्। वैदिककाले आदानप्रदानमाध्यमरूपेण सुवर्णस्य उपयोगः आसीत् वा न वा इति अद्यापि विवादः अस्ति। ऋग्वेदे निष्कस्य मनायाः च चर्चा वर्तते। ऋग्वेदसंहितायां निष्कस्य विविधाः अर्थाः प्राप्यन्ते। कुत्रचित् १००-निष्काः कस्यचित् श्रमस्य पुरस्काररूपेण दीयन्ते, केषुचित् निष्कः हाररूपेण उपयुज्यते, केषुचित् निष्कः गिनिमुद्रारूपेण उपयुज्यते। निष्कविषये मैक्डोनेल्-कीथ्महोदययोः मतं विचारणीयम्[27] अस्ति। अवश्यं सर्वदा सुवर्णभूषणम् इति अर्थः न स्यात्। प्रो.नारायणचन्द्रवन्द्योपाध्यायस्य मते निष्कः विशेषसुवर्णः, रजतं, मुद्रा वा स्यात्। एतानि मुद्राणि कण्ठावरणरूपेण एकत्र बद्धानि आसन्। अतः ऋग्वेद-अथर्ववेदकाले स्वर्णमुद्राणां व्यापकप्रयोगः अवगन्तुं शक्यते।

**आर्थिकस्रोतः**

वैदिकयुगे आर्थिकजीवनस्य उन्नतिः वैदिकग्रन्थेषु दृश्यते। तत्कालीन-आर्थिकस्रोतस्सु कृषिः, पशुपालनं, व्यापारः, विविधाः आजीविकाः चेत्यादयः आसन्। एतेषां स्रोतसां संक्षिप्तः परिचयः अधः दत्तः अस्ति -

**कृषिः**

भारतं कृषिप्रधानः देशः अस्ति। सामान्यतया कृषिप्रधानः देशः इति कारणतः भारतीयानां कृते भूमेः अत्यन्तं महत्त्वम् अस्ति। वैदिकविचारः आसीत् यत् प्रथमं देवैः मानवकल्याणार्थं कृषिः आरब्धा। कृषिकार्यस्य मुख्योपादानं भूमिः एवास्ति। यजुर्वेदे उक्तं -

**"भुमिरावपनं महत्॥"**[28]

अर्थात् कृषिः भूम्यर्थं, भूमिश्च कृषिकार्यार्थम्[29]। यजुर्वेदे उर्वरभूमिः तया उत्पन्नं सस्यं च पूज्यते -

**"नमः उर्वराय च खल्याय च॥"**[30]

अस्मिन् मन्त्रे प्राप्यमाणस्य 'उर्वराय' इति पदस्य उवटः महीधरः च समानार्थं निर्दिशतः -

**"उर्वरः सीतयोः सर्वसस्याढ्ययोः**
**सीतयोर्लाङ्गलमार्गद्वयोरन्तरम्॥"**[31]

[27] "As early as the R. V., traces are seen of the use of Niska as assort of currency, for, a singer celebrates the receipt of a hundred studs and a hundred Niska's. He could hardly require the Niska's merely for purposes of personal adornment" (Vedic Index 1, p-455)

[28] य. वे. (वा. सं.) – २३/४६

[29] "आयुषे त्वा वर्चसे त्वा कृष्यै त्वा क्षेमाय त्वा"॥ वा. सं. – १४/२१

[30] य. वे. (वा. सं.) – १६/३३

[31] शु. य. वे. (उवटः) – १६/३३

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

एवं च

**"उर्वरा सर्वसस्याढ्या भूः तत्र धान्यरूपेण भव उर्वर्यस्तस्मै नमः॥"[32]**

यत्र सर्वाणि सस्यानि वर्धन्ते सा भूमिरित्यर्थः। उर्वरायां भूमौ रोपितानि बीजानि सम्यक् प्ररोहन्ति इति अथर्ववेदे उल्लेखः अस्ति -

**"यथा बीजमुर्वरायां कृष्टे फालेन रोहति॥"[33]**

शतपथब्राह्मणे कृषिभूमिः क्षेत्रम् उर्वरा वा उच्यते[34]। एतत्तथ्याधारेण ज्ञायते यत् वैदिककाले उर्वरभूमिः कृषकाणां कृते कृषिकार्यस्य मुख्यं स्रोतः आसीत्। प्रतिवर्षम् उर्वरभूमिः कृष्यते स्म, येन विभिन्नप्रकाराणां सस्यानाम् उत्पादनं भवति स्म। अतः प्रतिवर्षं नियमितरूपेण कृषिकार्यार्थं कृषकाणां कृते उर्वरभूमिः मुख्यजीविकायाः साधनं मन्यते स्म। मैक्डोनेल्-कीथ्-महोदययोः मते क्षेत्रपदस्य अर्थः सर्वदा सर्वथा स्पष्टः न भवति, परन्तु कथञ्चित् एतत् पदं कृषिकार्येण सह सम्बद्धां भूमिं निर्दिशति[35]। यथा वयं भूमिं विना कृषिं कल्पयितुं न शक्नुमः, तथैव जलं विना कृषिः अपि असम्भवयोजना अस्ति। कृषिकार्याय जलस्य महत्त्वम् आवश्यकता च यजुर्वेदस्य एकस्मिन् मन्त्रे स्पष्टतया दर्शितम् -

**"सं मा सृजामि पयसा पृथिव्याः सं मा सृजाम्यद्भिरोषधीभिः। सोऽहं वाजं सनेयमग्ने॥"[36]**

ऋग्वेद-यजुर्वेद-अथर्ववेद-तैत्तिरीयसंहिता-ग्रन्थेषु सेचनार्थं प्रयुक्ताः जलस्य विविधाः प्रकारा वर्णिताः सन्ति। चतुर्विधं जलं ऋग्वेदे[37] वर्णितम् अस्ति। यजुर्वेदे[38] जलानां विभिन्नप्रकाराणां, सेचनार्थं प्रयुक्तानां च प्रथानाम् उल्लेखः कृतः अस्ति। तैत्तिरीयसंहितायाम्[39] अपि तथैव मन्त्रः प्राप्यते, यत्र समानजलव्यवहाराः उल्लिखिताः सन्ति। अन्यस्मिन् तु मन्त्रे[40] उपर्युक्तजलप्रकारान् विहाय सरोवराणि अपि उल्लिखितानि सन्ति। अथर्ववेदे त्रिषु सूक्तेषु[41] जलप्रकाराणां वर्णनं कृतम् अस्ति। अन्यः मन्त्रः[42] कृषिभूमिम् अधिकं वृष्टिं सोढुं समर्थां कथयति। पुनः अथर्ववेदे[43] धान्यतृणादीनाम् उत्पत्तिः, अधिकवृष्ट्या धनवृद्धेः च उल्लेखः अस्ति। अस्मिन् वेदे यज्ञेन वर्षाणाम् उत्पत्तिः अपि उक्ता अस्ति -

**"तन्वतां यज्ञं बहुधा विसृष्टा आनन्दिनीरोषधयो भवन्तु॥"[44]**

अर्थात् यदा वर्षारम्भस्य आवश्यकता भवति तदा सर्वविधयज्ञाः भिन्नभिन्नरूपेण कर्तव्याः। वैदिककाले भारतीयः कृषकः कृषेः प्रत्येकं नियमैः सह सुविदितः

---

[32] शु. य. वे. (महीधरः) – १६/३३

[33] अ. वे. – १०/६/३३

[34] "क्षेत्रतरमिव ब्राह्मणा उ हि नून्यमेनद्यज्ञैरसि ष्वदंत्सापि जघन्य"॥ श. ब्रा. – १/४१/१६

[35] Vedic Index, Part - 1, Page - 234

[36] य. वे. (वा. सं.) – १८/३५

[37] "या आपो दिव्या उत वा स्रवन्ति खनित्रिमा उत वाप याः स्वयञ्जाः। समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिह मामवन्तु"॥ ऋ. वे. – ७/४९/२

[38] (क) "नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च॥" वा. स. – १६/३७

(ख) "नमः कूप्याय चाऽवाट्याय च नमो वीध्र्याय चातप्याय च नमो मेध्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च॥" वा. स. – १६/३८

[39] तै. स. – ४/५/७/१-२

[40] तै. स. – ७/४/१३

[41] (क) "शं न आपो धन्वन्या३ शमु सन्त्वनूप्याः।
शं नः खनित्रिमा आपः शमु याः कुम्भ आभृताः शिवा नः सन्तु वार्षिकीः"॥ अ. वे. – १/६/४

(ख) "शं त आपो हैमवतीः शमु ते सन्तूत्स्याः।
शं ते सनिष्पदा आपः शमु ते सन्तु वर्ष्याः"॥ अ. वे. – १९/२/१

(ग) "शतं त आपो धन्वन्या३ शं ते सन्त्वनूप्याः।
शं ते खनित्रिमा आपः शं याः कुम्भेभिराभृताः"॥ अ. वे. – १९/२/२

[42] "प्र नभस्व पृथिवि भिन्द्धी३ दं दिव्यं नभः।
उद्नो दिव्यस्य नो धातरीशानो वि ष्या दृतिम्"॥ अ. वे. – ७/१९/१

[43] (क) "इदं तद् युज उत्तरमिन्द्रं शुम्भाम्यष्टये।
अस्य क्षत्रं श्रियं मही वृष्टिरिव वर्धया तृणम्"॥ अ. वे. – ६/५४/१

(ख) "यदा प्राणो अभ्यवर्षीद् वर्षेण पृथिवीं महीम्।
ओषधयः प्र जायन्तेऽथो याः काश्च वीरुधः"॥ अ. वे. – ११/६/१७

[44] अ. वे. – ४/१५/१६

आसीत्। प्रत्येकं कृषिनियमः शतपथब्राह्मणे[45] उल्लिखितः अस्ति। नियमाः क्रमशः कृशन्तः (भूमिकृषिः), वपन्तः (बीजवपनम्), लुनन्तः (धान्यस्य कर्तनं) मृणन्तः (धान्यस्य मर्दनं वा) च सन्ति। कृषेः प्रथमं कार्यं कर्षणेन कृषियोग्यभूमिनिर्माणम्। कर्षणं विना भूमौ कृषिकार्यम् असम्भवमेव। अत एव अन्नस्य उत्पादनार्थं कृषिभूमिः महत्त्वपूर्णा अस्ति। प्रारम्भे एतत् कार्यं बिल्वकाष्ठेन उदुम्बरकाष्ठेन निर्मितया तीक्ष्णयष्ट्या क्रियते स्म[46]। अश्विनीद्वयं हलसाहाय्येन भूमिं कर्शित्वा कृषिं पाठयति स्म इति ऋग्वेदे[47] उक्तम्। वैदिककृषौ हलः महत्त्वपूर्णम् आवश्यकं च साधनम् इति विविधमन्त्रेषु प्राप्यते। सामान्यतः वैदिककाले अद्यत्वे च हलवृषभसाहाय्येन कृषिकार्यस्य प्रथमं सोपानं निर्मीयते स्म।[48]। ऋग्वेदे एतस्मिन् विषये उच्यते -

**"युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम्॥"**[49]

अत्र सीरापदं हलार्थे प्रयुक्तम्। युगपदस्य अर्थः युगन्धरः, यः हलस्य मुख्यः भागः अस्ति। अतः युगे वृषभं योजयित्वा कर्षणम् अस्मिन् मन्त्रे उक्तम्। सायणाचार्येण ईदृशः अर्थः कृतः। सूक्तस्य अन्यस्मिन् मन्त्रे अपि कर्षणस्य उल्लेखः अस्ति[50]। अतः प्रशिक्षिताः कृषकाः हलस्य सम्यक् संचालनं कर्तुं समर्थाः आसन् तथा च एषा शिक्षा पुस्तिकातः वंशपरम्परां यावत् प्रचलिता आसीत्।

अथर्ववेदे उल्लेखः अस्ति यत् पृथीवैन्यः प्रथमं कृषिद्वारा मनुष्याणां कृते सस्यानाम् उत्पादनं कृतवान्[51]। सस्यानि यदा पूर्णतया वर्धितानि परिपक्वानि च भवन्ति तदा तेषां कर्तनं क्रियते। वैदिककाले कर्तनस्य मुख्यं साधनम् आसीत् सृणी। ऋग्वेदस्य अनेके मन्त्राः फलानां कर्तनकाले सृण्या व्यवहारं निर्दिशन्ति -

**"गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत् सृण्यः पक्वमेयात्॥"**[52]

अथर्ववेदे[53] सस्यानां कर्तनात् परं कृषकाणाम् आनन्दस्य सजीवं वर्णनं दृश्यते। कर्तितानि सस्यानि लघुमुष्टिभिः बद्ध्वा कृषिक्षेत्रं नीयन्ते स्म।[54]। अथर्ववेदे[55] उक्तं यत् सस्यानि उलूखले स्थापयित्वा मौसलेन प्रक्षालितानि भवन्ति स्म। मौसलानन्तरं तृणं च चालन्या[56] वा शूर्पेण[57] वा सस्यात् पृथक् भवति स्म। सूर्यकिरणाः बीजानाम् उत्पत्तिवृद्धिकारकाः इति यजुर्वेदे[58] उल्लिखितम् अस्ति। अथर्ववेदे[59] पशूनां प्राकृतिकगोमयस्य महत्त्वम् अस्ति। अस्मिन् मन्त्रे गोमयः 'करीषिणी' इति पदेन प्राकृतिक 'उर्वरकम्' (जैव-सार) इति

---

[45] श. ब्रा. १/६/१३

[46] "महान् वै भद्रो बिल्वो महान् पक्वोदुम्बरः॥" ऋ. वे. (खिलसूक्तम्) – ५/२२/१०

[47] "यवं वृकेणाश्विना वपन्तेषं दुहन्ता मनुषाय दस्रा।
अभि दस्युं बकुरेणा धमन्तोरु ज्योतिश्चक्रथुरार्याय॥" ऋ. वे. १/११७/२१

[48] "उतो स मह्यमिन्दुभिः षड्युक्ताँ अनुसेषिधत्।
गोभिर्यवं न चर्कृषत्॥" ऋ. वे. १/२३/१५

[49] ऋ. वे. – १०/१०१/३

[50] "सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक्।
धीरा देवेषु सुम्नया॥" ऋ. वे. १०/१०१/४

[51] (क) "तां पृथी वैन्यो ऽधोक् तां कृषिं च सस्यं चाधोक्॥" अ. वे. – ८/१०/११
(ख) "ते कृषि च सस्यं च मनुष्या३ उप जीवन्ति।
कृष्टराधिरुपजीवनीयो भवति य एवं वेद॥" अ. वे. – ८/१०/१२

[52] ऋ. वे. – १०/१०१/३

[53] "शुनं सुफाला वि तुदन्तु भूमिं शुनं कीनाशा अनु यन्तु वाहान्।
शुनासीरा हविषा तोशमाना सुपिप्पला ओषधीः कर्तमस्मै॥" अ. वे. – ३/१७/५

[54] ऋ. वे. १०/४८/७, अ. वे. ८/६/१५, ११/३/९, वा. सं. १६/३३, निरु. ३/१०

[55] अ. वे. ९/६/१४-१५, १०/९/२६, १२/३/१३, ११/३/३

[56] ऋ. वे. – १०/७२/२, निरु. – ४/१०

[57] अ. वे. – ९/६/१६, १०/९/२६, तै. सं. – १/६/८/३

[58] "तस्यां नो देवः सविता धर्म साविषत्॥" वा. सं – ९/५

[59] "करीषिणी फलवती स्वधामिरां च नो गृहे।
औदुम्बरस्य तेजसा धाता पुष्टिं दधातु मे"॥ अ. वे. – १९/३१/३

निर्दिश्यते। वैदिकसाहित्ये कृषिहानिकारकसिद्धान्तः “ईति” इति संज्ञया उच्यते। अथर्ववेदस्य एकस्मिन् सूक्ते[60] त्रिषु मन्त्रेषु कृषिनाशकतत्त्वस्य उल्लेखं कृत्वा तेषां विनाशः व्याख्यायते। अथर्ववेदे[61] नानावर्णानां दृश्यादृश्यकृमिणां वर्णनं कृतम् अस्ति। सूर्यस्य तापः कीटनाशकत्वेन वेदेषु प्राधान्येन उक्तः अस्ति[62]। अथर्ववेदे वर्णितम् अस्ति यत् सरस्वत्याः तटे देवाः मनुष्येभ्यः मधुररसं यवं दत्तवन्तः, इन्द्रदेवः हलं चालयति स्म, मरुतः कृषकाः अभवन्। अतः अस्मात् विवरणात् अनुमानं कर्तुं शक्यते यत् उत्तरवैदिकलोकसमाजस्य राज्ञः सहकारी सक्रियभागीदारी च अपेक्षितः आसीत्।

**पशुपालनम्**

वैदिकोत्तरसाहित्ये पशुपालनविषये विस्तरेण चर्चा कृता अस्ति। वैदिकयुगस्य अर्थव्यवस्था कृषिपशुपालने आश्रित्य आसीत्। अतः वैदिकाः कृषिविषये अपि च पशुपालने बलं दत्तवन्तः। वैदिकसाहित्ये बहुधा पशूनां वर्णनं प्राप्यते। अथर्ववेदे गौः, अश्वः, पुरुषः, अजः, अविः चेति पञ्च पशवः सामूहिकरूपेण पञ्चपशवः इति उच्यन्ते -

**“तवेमे पञ्चपशवो विभक्ता गावो अश्वाः पुरुषा अजावयः॥”**[63]

अपि च ऐतरेयब्राह्मणे[64] सप्तविधाः पशवः उल्लिखिताः सन्ति - अजः, अश्वः, गोः, महिषः, मेषः, गजः, अश्वतरी (खच्चरः) इति। वैदिकयुगे ग्रामप्रमुखेषु, पालितपशुषु च गोः सर्वोपरि स्थानम् आसीत्। गां विहाय अश्वः, अश्वतरी चेत्यादयः बहवः पालिताः पशवः वेदेषु वर्णिताः सन्ति। वैदिकसूक्तेषु[65] देवाः प्रार्थ्यन्ते गोः रक्षणाय, पोषणाय च। वैदिकयुगस्य आहारे क्षीरस्य महत्त्वम् अपारम् आसीत्। अतः वैदिकाः तस्मिन् युगे पशुसङ्ख्यावर्धनार्थं सर्वदा प्रयतन्ते स्म। अत एव ऋग्वेदे[66] ऋषिः पूषन् गोधनवृद्ध्यर्थं तेषां रक्षणाय च देवान् प्रार्थयति।

**व्यापारः विविधजीविका च**

कृषिपशुपालने विहाय वैदिककाले आर्थिकविकासस्य अन्यत् साधनम् आसीत् व्यापारः। कृषिः, पशुपालनम् चेत्यादयः देशस्योत्पादनेन सह सम्बद्धाः आसन्, यत् प्राचीनकाले आर्थिकोत्पादनस्य केन्द्रम् आसीत्। अधिकांशतया दैनन्दिनसामग्री स्वदेशीयरूपेण उत्पाद्यते स्म। कृषिमाश्रित्य वैदिककाले कृषि-उद्योगीकरणस्य प्रवर्तनं जातम् इति निःसंदेहं वक्तुं शक्यते। अस्मिन् काले कृषिजन्यपदार्थानाम् आधारेण अनेके विशेषोद्योगाः विकसिताः, यथा - वस्त्रनिर्माणकार्यं, लाहपात्रं, सोमरसस्य उत्पादनं, सुरायाः उत्पादनं, यज्ञसामग्री च। वैदिककालस्य उद्योगेषु वस्त्रनिर्माणकार्यस्य प्रमुखं स्थानम् आसीत्। वैदिकसाहित्ये नानास्थानेषु वस्त्रप्रयोगस्य उल्लेखः अस्ति[67]। स्त्रीपुरुषौ वस्त्रनिर्माणे प्रवृत्तौ आस्ताम्। वैदिकसाहित्ये सुवर्णनस्य[68], तस्य धनिकत्वस्य इच्छायाः च बहवः सन्दर्भाः सन्ति[69]। यजुर्वेदे[70] व्यापारेण प्रेरितस्य समृद्धस्य नगरजीवनस्य प्रमाणं

---

[60] अ. वे. – ६/५०/१-३

[61] अ. वे. ५/२३/४-१०

[62] “उद्यन्नादित्यः क्रिमीन् हन्तु निम्रोचन् हन्तु रश्मिभिः।
ये अन्त क्रिमयो गविः”॥ अ. वे. – २/३२/१

[63] अ. वे. – ११/२/९

[64] ऐ. ब्रा. – २/१७

[65] ऋ. वे. – ६/५४/५-७, अ. वे. – ४/२१/१, ३-५

[66] ऋ. वे. – ६/५४

[67] ऋ. वे. – १०/८५/३४, ९/९७/५०, ९/२२/६, १०/१०६/१, ९/१०७/७, ८/२/१६, अ. वे. – १४/२/४१, १८/४/३१, तै. सं. – २/४/११/६, तै. ब्रा. – १/३/७/१, श. ब्रा. ३/४/५/१३-१५, ५/२/८/१

[68] ऋ. वे. – १/४३/५, १/११७/५, ३/३४/९, ४/१०/६, ४/१७/११, ६/४७/२३, ८/७८/९

[69] “यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्”॥ ऋ. वे. – १०/१२१/१०

[70] वा. सं. – ३०/६/६,७,११,१७,२०

प्राप्यते। वैदिकसाहित्यस्य विमर्शात्मकाध्ययनेन तत्कालीनसमाजः आर्थिकदृष्ट्या अतीव समृद्धः आसीत् इति ज्ञायते। सिन्धुनद्याः समीपे अस्य प्रदेशस्य आर्थिकसमृद्धेः सुन्दरं चित्रं ऋग्वेदेन[71] ज्ञायते। सिन्धुतीरस्थः प्रदेशः अश्व-रथ-वस्त्र-सुवर्णानाम् आभूषण-आहार-ऊन-आदिभिः पूर्णः अस्ति, मधु-पुष्पयुक्तः च अस्ति। अतः सिन्धुनद्याः समीपे अस्मिन् प्रदेशे उन्नताः अश्वाः, सुसज्जाः रथाः च आसन्। ऊनीवस्त्रस्य प्रयोगः वैदिकसाहित्ये विविधस्थानेषु दृश्यते[72]। वैदिकसाहित्ये ऊनम् ऊर्णा उच्यते[73]। अस्मिन् कार्ये व्यापारिणः प्रवृत्ताः आसन्। द्रव्यवाहनार्थं वृषभः[74], अश्वाः, उष्ट्राः, श्वाः[75], खराः[76] च उपयुज्यन्ते स्म। अस्मिन् कार्ये महिषाः[77] अपि नियोजिताः आसन्। वैदिकाः समुद्रयात्रायाः विषये पूर्णतया अवगताः आसन्। वणिग्वर्गः विदेशव्यापारार्थं समुद्रमार्गेण गच्छति स्म। ऋग्वेदे चतुर्णां समुद्रानाम् उल्लेखः अस्ति, यत्र सोमदेवस्य प्रार्थना भवति -

**"रायः समुद्राँश्चतुरोऽस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणः"॥**[78]

**"चतुःसमुद्रं धरुणं रयीणाम्"॥**[79]

अतः स्पष्टं भवति यत् वैदिकाः पूर्वं दूरं दूरं गच्छन्ति स्म व्यापाराय, बहु धनसङ्ग्रहाय च।

**उपसंहृतिः**

भारतीयर्षिभिः परमेश्वरेण मानवकल्याणाय दत्तानां विशालवेदानां ज्ञानं स्पष्टतया कल्पितम्। एतत् ज्ञानं न केवलं आध्यात्मिकतायां श्रेष्ठम् अपितु आर्थिकप्रज्ञाप्रदाने अपि श्रेष्ठम् अस्ति। वैदिकसामाजिकव्यवस्थायाः समग्रं मूल्याङ्कनं कृत्वा वक्तुं शक्यते, यत् तस्मिन् समये कुलसम्बन्धाः अतीव प्रबलाः आसन्, यतः कुलप्रमुखस्य (पितुः) आदेशाः सर्वैः पाल्यन्ते स्म, परन्तु तदनन्तरं समाजे किञ्चित् अवनतिः अभवत्। तथापि वैदिकजातीनां मूल्यानि प्रशंसनीयानि आसन्। तेषां निवासः, अन्न-पानं, वस्त्र-भागाः, जीवन-जीविका चेत्यादिविषयाः तस्मिन् युगे अतीव उन्नता आसन्। आर्थिक-स्थितिः अपि अतीव उन्नता आसीत्। मूलतः वैदिक-आर्थिकव्यवस्थायाः मुख्यस्तम्भद्वयं - कृषिः पशुपालनं च। व्यापारेण सह एतयोः पर्याप्तं महत्त्वम् आसीत्। वैदिककाले भारतीयकृषेः पूर्णतया विकासः अभवत्। भारतीयधर्मे, समाजे, संस्कृतिषु च कृषिः सर्वोपरि इति स्वीकृता अस्ति। पशुपालनम् अपि तस्मिन् काले वैदिकानां मुख्यजीविकानां मध्ये अन्यतमम् अभवत्। वैदिकयुगस्य अर्थव्यवस्था कृषिपशुपालने आश्रित्य आसीत्। अतः वैदिकेषु कृषौ पशुपालने च महत्त्वं दत्तम् आसीत्। तस्मिन् काले कृषिजन्यपदार्थानाम् आधारेण अनेके विशेषोद्योगाः विकसिताः, यथा – वस्त्र-उद्योगः, लाह-उद्योगः, सोमरसोत्पादनं, सूरा-निर्माणोद्योगः, यज्ञ-सामग्री-निर्माणं च। वैदिककालस्य उद्योगेषु वस्त्रस्य प्रमुखं स्थानम् आसीत्। वैदिकसमाजः आर्थिकदृष्ट्या अतीव समृद्धः आसीत्। अतः, अन्ते वक्तुं शक्यते यत् वैदिकयुगे दैनन्दिनजीवने

---

[71] ऋ. वे. – १०/७५/८

[72] ऋ. वे. – १/१२६/७, ९/८/६, १०/१७५/८, वा. सं. – २/२, अ. वे. – १४/२/६६

[73] ऋ. वे. -४/२२/२, ८/६७/३, वा. सं. – १३/५०, श. ब्रा. – १२/५/१/१३

[74] "गावो न यूथमुप यन्ति वध्रय उप मा यन्ति वध्रयः"॥ ऋ. वे. – ८/४६/३०

[75] ऋ. वे. – ८/४६/२८

[76] ऋ. वे. – ८/५६/३

[77] (क) "यदि प्रवृद्ध सत्पते सहस्रं महिषाँ अघः आदित्त इन्द्रियं महि प्र वावृधे"॥ ऋ. वे. – ८/१२/८

(ख) "प्र सोमासो विपश्चितोऽपां न यन्त्यूर्मयः वनानि महिषा इव"॥ ऋ. वे. – ९/३३/१

[78] ऋ. वे. – ९/३३/६

[79] ऋ. वे. – १०/४७/२

सामाजिकव्यवस्था, आर्थिकस्थितिः च अतीव उन्नता आसीत् इत्यत्र नास्ति कोऽपि सन्देहः।

ଊଊଊ

## सहायकग्रन्थसूची


- अथर्ववेदसंहिता - गौड, रामस्वरूपशर्मा, चौखम्बा विद्या भवन, वाराणसी, २०११
- ऋग्वेदः (शङ्कर-भाष्यम्) - त्रिवेदी, रामगोपालः, इंडियन प्रेस लिमिटेड, प्रयाग, १९५८
- ऐतरेयब्राह्मणम् - मालवीय, डाँ. सुधाकर, तारा प्रिंटिंग वार्कस, वाराणसी
- कृष्ण यजुर्वेदीय तैत्तिरीय संहिताः (मूलपाठः) - सातवलेकर, श्रीपाददामोदर, रामलाल कपूर ट्रस्ट, हरियाणा, २००२
- तैत्तिरीयब्राह्मणम् - कुमार, प्रो. पुष्पेंद्र, नाग प्रकाशन प्रकाशक, १९९८
- निरुक्तम् - बक्सी, मुकुन्द झा, चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी, २०१६
- वेदग्रन्थमाला (अथर्ववेद-संहिता) - अधिकारी, तारकनाथ, रामकृष्ण मिशन इन्सटिट्यूट संस्थान, २०२१
- वैदिक अर्थव्यवस्था - डॉ महावीर, समानांतर प्रकाशन, दरियागंज, नई दिल्ली, २००१
- वैदिक इण्डेक्स (मैकडौनेल और कीथ) - राय, रामकुमार, चौखम्बा विद्या भवन, वाराणसी, २०१४
- शतपथब्राह्मणम् - उपाध्याय, प. गङ्गाप्रासाद, प्राचीनवैज्ञानिकाध्ययन-अनुसन्धान-संस्थानम्, नई दिल्ली, १९६७
- शुक्लयजुर्वेद (माध्यन्दिनसंहिता) - उपाध्याय, रामानुज, श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विद्यापीठ, २०१८

MANĪṢĀ - *A Research Journal of Sanskrit* ISSN : 2583-2271
***Sabang Sajanikanta Mahavidyalaya*** Vol. - 4, No. 1: 2024

# प्राचीनसंस्कृतवाङ्मये व्यवसायिकशिक्षा

**सत्यनारायण-पण्डा**
शोधच्छात्रः, केन्द्रियसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः
ओडिशा

**प्रबन्धसारः -**

*भारतवर्षस्य प्राचीनशिक्षाव्यवस्था इत्युक्ते प्राचीनसंस्कृतशिक्षा इत्येव बुध्यते। प्राचीनसंस्कृतसाहित्यस्य मुख्यमुद्देश्यं धार्मिकशिक्षा आसीत् तथा च शिक्षायाः उद्देश्यं मुख्यतया व्यक्तेः आध्यात्मिकविकासः। परन्तु तस्मिन् काले भारते व्यवसायिकशिक्षा अपि प्रचलिता आसीत्। वैदिकयुगः केवलम् आध्यात्मिकशिक्षामात्रे एव सीमितो नासीत्। समाजे जाति-आश्रम-व्यवस्थायाः कारणात् व्यवसायिकशिक्षा नियता जाता आसीत्। ब्राह्मणाः पूर्वम् ऋषिः, पुरोहितः, आचार्यः चेत्यादिरूपेण परिचिता आसन्। समाजे धर्मस्य स्थापनं रक्षणञ्च तेषां मुख्यं कर्तव्यमासीत्। क्षत्रियाणां कृते तर्कवेदादीनाम् अध्ययनम् अनिवार्यम् आसीत्। तेषां कृते सैन्यशिक्षायाः विभिन्नेषु भागेषु प्रशिक्षणं प्रचलितम् आसीत्। वैश्यानां कृषिः, व्यापारः, पशुपालनं च उपदिष्टम् आसीत्। शूद्राः कृषिः, गोपालनं, पशुपालनं, शस्त्रनिर्माणं, शिल्पं, वास्तुकला, चित्रकला इत्यादिषु लौकिकविषयेषु शिक्षां प्राप्तवन्तः। अन्येषु व्यवसायेषु आयुर्वेदस्य, चिकित्साशिक्षणस्य च व्यवस्था आसीत्। प्राचीनसंस्कृतसाहित्यस्य मुख्यमुद्देश्यम् आसीत् समाजोपयोगिनागरिकनिर्माणम्। आध्यात्मिकशिक्षायाम् अध्यात्मस्य विकासे बलं दत्तम् आसीत्। ईश्वरस्य, पूर्वजानां, ऋषिणां, समाजस्य च ऋणस्य परिशोधनार्थं आश्रमव्यवस्था स्वीकृता। बालानां चरित्रस्य विकासे पूर्णं ध्यानं दत्तम् आसीत्। व्यक्तित्वस्य समग्रविकासे एव बलं दत्तम् आसीत्।*

**कुञ्चीशब्दाः** - प्राचीनसंस्कृतवाङ्मयः, व्यवसायिकशिक्षा, व्यापारः, कला, विज्ञानं, चिकित्साशास्त्रम् चेत्यादयः।

*************************************************************************************

प्राचीनसंस्कृतवाङ्मये शिक्षा इत्युक्ते मुख्यतया धार्मिकशिक्षा एव आसीत् तथा च शिक्षायाः उद्देश्यं मुख्यतया व्यक्तेः आध्यात्मिकविकासः आसीत्। परन्तु तस्मिन् काले भारते व्यवसायिकशिक्षा अपि प्रचलिता आसीत्। वैदिककालः केवलम् आध्यात्मिकशिक्षामात्रे एव सीमितो नासीत्। समाजे जाति-आश्रम-व्यवस्थायाः कारणात् व्यवसायिक-शिक्षा नियता आसीत्। ब्राह्मणाः पूर्वम् ऋषिः, पुरोहितः, गुरुः चेत्यादिरूपेण परिचिता आसन्। धार्मिकग्रन्थाध्ययनेन छात्राणां धार्मिकाधिकारस्य कर्तव्यस्य च विकासः भवति स्म। क्षत्रियाणां कृते तर्कवेदानाम् अध्ययनम् अनिवार्यम् आसीत्। सैन्यशिक्षायाः विभिन्नेषु भागेषु प्रशिक्षणं दीयते स्म। सांख्ययोगस्य लोकायतस्य च ज्ञानं, दण्डनीतिप्रशिक्षणं, कृषिं, पशुपालनं, व्यापारकरं च इत्यादीनि अपि राजपुत्रेभ्यः प्रदत्तानि आसन्। वैश्येभ्यः कृषिव्यापार-पशुपालनविषये शिक्षा दीयते स्म। शूद्राः कृषि-गोपालन-पशुपालन-शस्त्रनिर्माण-शिल्प-वास्तुकला-चित्रकलादिषु लौकिकविषयेषु शिक्षां प्राप्नुवन्ति स्म। अन्येषु व्यवसायेषु आयुर्वेदस्य चिकित्साशास्त्रस्य च शिक्षायाः व्यवस्था अपि आसीत्। प्राचीनसंस्कृतवाङ्मये शिक्षायाः मुख्यम् उद्देश्यम् आसीत् समाजोपयोगिव्यक्तिनिर्माणम्। आध्यात्मिकशिक्षायाम् आध्यात्मिकविकासे प्राधान्यं दीयते स्म। ईश्वरस्य, पूर्वजानाम्, ऋषीणां, समाजस्य च ऋणं परिशोधयितुम् आश्रमव्यवस्था स्वीकृता आसीत्। बालस्य चरित्रस्य विकासे पूर्णं ध्यानं दीयते स्म। व्यक्तित्वस्य सामग्रिकविकासे गुरुत्वं दीयते स्म।

नश्वरेऽस्मिन् संसारसागरे समेषां चेतनशीलानां नराणाम् एकैव वाञ्छा यावत् जीवेत् सुस्थं सुखं च

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

जीवेत् इति। प्रपञ्चे निमग्नः सन् आत्मना आत्मानमुद्धरेत्। आत्मानं न अवसादयेत् न अधो गमयेत्। यस्मात् आत्मैव हि आत्मनो बन्धुः। न ह्यन्यः कश्चित् बन्धुः संसारमुक्तये भवति। जीवने अनुभूयमानदुःखानां निवारणं शिक्षया सम्भवति। इयं शिक्षा स्वकीयगृहादेव आरप्स्यते शिश्ववस्थातः। जन्मतः मृत्युं यावत् गम्यमाना एका गतिशीला प्रक्रिया भवति शिक्षा। या च मानवान् अन्येभ्यः प्राणिभ्यः पृथक्करोति। तादृशानां मानवानां सर्वाङ्गीणविकासाय शिक्षा उपकरोति। शिक्षयैव मानवानां सर्वाङ्गीणः विकासः इति समेषां विदुषां दार्शनिकानां चाभिमतिः। अनया एव मानवानां सर्वकालिकः विकासः सम्भवति। कर्तव्यनिर्वाहस्य शिक्षायाः माध्यमेन सामाजिककौशलस्य विकासः भवति स्म।

परिष्कृतं, परिशुद्धं, व्याकरणादिदोषरहितं यत्तत् संस्कृतपदवाच्यम्। प्राचीनैः ऋषिभिः मुनिभिश्च भाषागतदोषपरिष्कारेण अपशब्दादिदोषवारणेन या परिष्कृता भाषा व्यवहृतिमानीता सैव संस्कृतभाषानाम्ना सम्बोध्यते आद्रियते च। विद्वज्जनव्यवहृता चेयं भाषा। सैव संस्कृतभाषा, देववाणी, गीर्वाणवाणी, गीर्वाणगीरित्यादिभिर्नामधेयैः व्यवह्रियते। सेयं भाषा भारतीयानां प्राणरूपिणी, जीवनोन्नायिका, सत्पथप्रदर्शिनी आचारविचारप्रवर्तिनी, कर्तव्याकर्तव्यबोधिनी लोकस्य हितसम्पादिनी चास्ति।

भारतवर्षस्य समस्तमपि प्राचीनवाङ्मयः संस्कृतभाषामाश्रित्यैवावतिष्ठते। निखिलममि वैदिको वाङ्मयः रामायणं, महाभारतं, पुराणानि, स्मृतिग्रन्थाः, दर्शनानि, धर्मग्रन्थाः, महाकाव्यानि, काव्यानि, नाटकानि, गीतिकाव्यानि, आख्यानसाहित्यम्, नीतिग्रन्थाः चेत्यादयः संस्कृतभाषायाम् एव उपलभ्यन्तो। न केवलम् एतदेव, अपि तु व्याकरणं, काव्यशास्त्रम्, आयुर्वेदः, धनुर्वेदः, वास्तुकलाशास्त्रम्, अर्थशास्त्रम्, गणितं, ज्योतिषम्, आचारशास्त्रं, राजनीतिशास्त्रम्, ऐतिह्यं, छन्दःशास्त्रं, कोशग्रन्थाश्च संस्कृतवाङ्मयस्य गौरवमेव वर्धयन्ति। ज्ञानस्य विज्ञानस्य च न तादृशं किमप्यङ्गं, यन्नैवोपलभ्यते संस्कृतवाङ्मये। प्राचीनानां महर्षीणां, कवीनां, तत्त्वज्ञानां कठोरश्रमस्यैव फलमेतद्यदीदृश-विशालः संस्कृतवाङ्मयः दृष्टिपथमुपायाति। प्राचीनसंस्कृतवाङ्मये वैदिकसाहित्येषु ऋग्वेदः विशेषतया उल्लेखनीयः। विश्वस्य प्राचीनतमायाः संस्कृतेः सभ्यतायाश्च यथार्थावगमाय संस्कृतमेवैकं साधनम्। विश्वसंस्कृतेराधारशिला संस्कृतवाङ्मये एव प्राप्यते।

मानवजातिजीविकासाधनार्थं मूलस्त्रोतस्त्वेन भारतीयसंस्कृतवाङ्मयः ग्रीकसाहित्यापेक्षया महत्तरः। धर्मदर्शनयोः क्षेत्रे संस्कृतस्योत्कर्षः सर्वातिशायी। अध्यात्मशास्त्रानुशीलनाय, सङ्गीतनृत्याद्यभिनयकलानां सूक्ष्मातिसूक्ष्मज्ञानाय संस्कृतवाङ्मय एक एव शरणम्।

प्राचीनसंस्कृतवाङ्मये मुख्यतया धार्मिकशिक्षा आसीत्। शिक्षायाश्च उद्देश्यं मुख्यतया व्यक्तेः आध्यात्मिकविकास आसीत्। परन्तु तस्मिन् काले भारते व्यवसायिकशिक्षा अपि प्रचलिता आसीत्। प्राचीनव्यवसायिकशिक्षायाः सामान्यं वर्णनं यथा -

१. **पुरोहितशिक्षा** - प्राचीनकाले केवलं ब्राह्मणपुत्राणां पुरोहितशिक्षायाम् अधिकारः आसीत्। तदा यज्ञादयः विविधा विधयः आसन्। भिन्नभिन्नकार्याणां कृते भिन्नभिन्नपुरोहितानाम् आवश्यकता आसीत्। प्रत्येकं कार्यस्य कृते पृथक् प्रशिक्षणकेन्द्रस्य व्यवस्था आसीत्।

२. **सैन्यशिक्षा** - क्षत्रियाणां कृते सैन्यशिक्षा दीयते स्म। अस्मिन् अस्त्र-रथ-अश्व-गजादिप्रयोगार्थं शिक्षा प्रदीयते स्म। राज्यसेनाभ्यः सेवानिवृत्तसैनिकैः सैन्यशिक्षा प्रीदयते स्म।

**३. कृषिव्यापारे शिक्षा** - वैश्यानां कृते कृषिसम्बन्धिनी शिक्षाव्यवस्था आसीत्। अत्र कृषिः, वाणिज्यं, भूगोलः, भाषा, गणितं, व्यापार चेत्यादीनां ज्ञानं प्रदीयते स्म। प्रारम्भे पितरः पुत्रेभ्यः एतादृशीं शिक्षां प्रयच्छन्ति स्म। परन्तु क्रमेण एतत् कार्यं शिक्षकैः कर्तुमारब्धम्।

**४. चिकित्साशिक्षा** - प्राचीनभारतीयसंस्कृतवाङ्मये चिकित्साविद्यायाः समुचितव्यवस्था आसीत्। आयुर्वेदे सम्पूर्णरूपेण चरकसंहितायां सुश्रुतसंहितायां च शल्यचिकित्सा कथमासीत् तत् ज्ञायते। अत्र मुख्यतया रोगनिदानं, औषधनिदानं, शल्यक्रिया, सर्पदंशः, अस्थिज्ञानं रक्तपरीक्षणं चेत्यादीनां विषये शिक्षा प्रदत्ता आसीत्।

वैदिककाले समाजः वर्णचतुष्टये विभक्तः - ब्राह्मणक्षत्रियवैश्यशूद्रप्रभेदेन। अध्यापनमध्ययनं, यजनं, याजनं च ब्राह्मणानां मुख्यानि कर्माणि। रक्षा, शासनसञ्चालनं, न्यायदण्डव्यवस्था च क्षात्रं कर्म। कृषि, गोरक्षा, वाणिज्यं च वैश्यानां कर्म। समाजसेवा, शिल्पविधानं च शूद्राणां कर्म।

आर्थिकजीवनस्याधाररूपेण कृषिः, पशुपालनं चोपलभ्यते। पशुषु गवां स्थानं सर्वोत्कृष्टम्। सैव अम्बा-अदिति-मातेत्यादिनामभिर्निर्दिश्यते। कृषिकर्मणि वृषभाः प्रायुज्यन्त। सेचनसाधनानि नदी-कूप-जलाशय-कुल्यादीन्यभूवन्। अन्नेषु गोधूम-यव-ब्रीहि-चणक-माष-तिलादयो मुख्याः। कृषिकर्मातिरिक्ता वृत्तयः उद्योगाश्च प्राचलन्। तद्यथा तक्ष-हिरण्यकार-लौहकार-कर्मकार-चर्मकारादिवृत्तयः प्रावर्तन्त। व्यापारकर्मणि प्रवृत्ताः वणिजोऽभवन्। वस्तुविनिमयमूलकः क्रयविक्रयव्यापारः प्राचलत्। मुद्रासु निष्कं मुख्यमासीत्। तदा समुद्रव्यापारावस्थितिरपि विज्ञायते। सामुद्रिक- धनस्योल्लेखः अपि प्राप्यते। कुसीदवृत्तिरपि आसीत्तदा। अष्टमांशः षोडशांशो वा कुसीदरूपेणागृह्यत। आदानप्रदानस्य महत्त्वं यजुर्वेदे वर्ण्यते यत्-

"देहि मे ददामि ते, नि मे धेहि न ते दधे।
निहारं च हरासि मे निहारं नि हराणि ते।।"[1]

कर्मणैव जीवनस्य साफल्यम्। कर्मैव स्वाभीष्टसाधनपुरःसरं मोक्षावाप्तिमपि साधयति। अत एव यजुर्वेदे आदिश्यते यत् कर्माणि कुर्वन्नेव शतवर्षं यावद् जिजीविषेत्। निष्कामकर्मभावनया कर्मकरणेन न बन्धनावाप्तिः, न च कर्मफलावलेपः। उक्तं च –

"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथाऽस्ति न कर्म लिप्यते नरे॥"[2]

कार्यप्रवृत्तिमन्तरेण जीवने न किञ्चित् साफल्यं सम्भाव्यते। अत एव कर्मणोऽनिवार्यत्वं शंस्यते निर्दिश्यते च। उक्तं च–

"नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः॥"[3]

वैदिककालाद् एव चिकित्साविज्ञानं भारतवर्षे प्रारब्धम्। आयुर्वेदो यद्यपि ऋग्वेदस्य उपवेद इति कथ्यते, तथापि सुश्रुतादिभिः अथर्ववेदस्यायमुपवेद इत्यभाषि। उक्तञ्च सुश्रुतेन – "इह खलु आयुर्वेदो नाम यदुपाङ्गमथर्ववेदस्य" (सुश्रुतेः सूत्रस्थानम्-१६०) धान्वन्तरसम्प्रदायस्य शल्यचिकित्सा, आत्रेयसम्प्रदायस्य कायचिकित्सा, सिद्धसाम्प्रदायिकरसायनशास्त्रस्य रसायनचिकित्सात्र विद्यते। अतो वैज्ञानिकदृष्ट्या विभाग-चतुष्टयं विद्यते आयुर्वेदस्य। यथा - १) शल्यशास्त्रं २) वनस्पतिशास्त्रं ३) रसशास्त्रं ४) रसायनशास्त्रं चेति।

प्राचीने भारते विशेषतः परवर्तिवैदिककालस्य जातिव्यवस्थायां ब्राह्मणक्षत्रियवैश्यशूद्राणाम्

[1] यजुर्वेदः, ३/५०
[2] यजुर्वेदः, ४०/२
[3] श्रीमद्भगवद्गीता,.३/८

ISSN : 2583-2271
Vol. - 4, No. 1: 2024

आधिपत्यम् आसीत्। प्रत्येकं जातीनां कृते स्वकीयः व्यवसायः प्रकल्पित आसीत्। व्यवसायाय च सहायिका शिक्षा प्रदीयते स्म। उच्चत्रिजातीयानां स्वव्यापारानुसारं शिक्षायाः अधिकारः आसीत्, परन्तु शूद्राणां शिक्षायाः अधिकारः नासीत्। ते उच्चत्रिवर्गस्य सेवाम् अकुर्वन्।

राजपुत्राणां आर्याणां च गृहेषु यज्ञं कर्तुं पुरोहितरूपेण कार्यं कर्तुं च ब्राह्मणा नियुक्ता आसन्। ते प्राचीनज्ञानस्य साहित्यस्य च संरक्षका आसन्। पुरोहितानां कुटुम्बाः प्रथमं वैदिकविद्यालयेषु कार्यं कुर्वन्ति स्म। ब्राह्मणशिक्षकाणाम् अधीने विद्यालयजीवनस्य कालखण्डे प्रवेशात् पूर्वं त्रयाणां उच्चजातीयानां पवित्रसूत्रेण दीक्षां प्रदातुं प्रथा आसीत्।

छात्रवृत्तेः अवधिः द्वादश वर्षाणि आसन्। भिन्नजातीयानां कृते दीक्षावधिः अवश्यं भिन्ना आसीत्। एकः युवा ब्राह्मणः स्वस्य भविष्यत्कालीनव्यवसायस्य सज्जतायै विद्यालयं गच्छति स्म। क्षत्रियाणां शिक्षा अधिका आसीत्। क्षत्रियराजकुमारस्य मुख्यं कर्तव्यं राज्यस्य रक्षणं, युद्धं च आसीत्। अतः सः सैन्यप्रशिक्षणं प्राप्नुयात्, तस्य व्यवसाये साहाय्यं करिष्यमाणानां विषयाणाम् अध्ययनं कुर्यात्। तस्य अध्ययनविषयेषु स्वाभाविकतया धर्मशास्त्रं, नीतिशास्त्रम्, अर्थशास्त्रं, वेदाङ्गानि पुराणानि च आसन्। राजपुत्राः विद्यालयशिक्षणकाले एतेषु विषयेषु परिचिताः भवेयुः इति अपेक्षितम् आसीत्। क्षत्रिययुवकस्य कृते शस्त्रप्रयोगस्य, सैन्यकुशलतायाश्च ज्ञानम् आवश्यकमासीत्। वयं महाभारतात् जानीमः यत् कथं पाण्डुकुरुराजकुमाराः विविधसैन्यकौशलेषु प्रशिक्षिताः आसन्। तेषां गुरुः द्रोणाचार्यः नाम विद्वान् ब्राह्मणः आसीत्। रामायणे वयं पठामः यत् कथं राज्ञः दशरथस्य राजकुमाराः धनुर्विद्या, अश्वगजयोः युद्धं, शूलस्य, कवचस्य, खड्गस्य, बाणस्य, धनुषः, रथचालनं चेत्यादीनां विविधप्रकारकसैन्यकलानां प्रशिक्षणं प्राप्नुवन्ति स्म। प्रारम्भिककाले क्षत्रिययुवानां शिक्षायाः मुख्यमुद्देश्यं वेदस्याध्ययनं, सैन्यकुशलताप्राप्तिः, नैतिकप्रशिक्षणं चासीत्। मौर्यवंशस्य (३२० ई.पू.) काले क्षत्रियराजकुमाराणां शिक्षायाः महान् विकासः अभवत्। अर्थशास्त्रस्य प्रसिद्धः लेखकः, महान् विद्वान् च ब्राह्मणः कौटिल्यः अथवा चाणक्यः चन्द्रगुप्तवंशीयानां क्षत्रियराजपुत्राणां शिक्षागुरुः आसीत्। अर्थशास्त्रं राजनीतिशास्त्रस्य मूलग्रन्थः अस्ति, यस्य सिद्धान्ताः नृपाणाम् उपयोगाय सन्ति। अर्थशास्त्रे राज्ञः अधिकारिणां च कर्तव्यानां विस्तृतं वर्णनं दृश्यते। कौटिल्यस्य अर्थशास्त्रानुसारं चत्वारि विज्ञानानि सन्ति - आन्वीक्षिकी, त्रयी, वार्ता, दण्डनीतिश्चेति।

आन्वीक्षीक्यां सांख्ययोगः लोकायतदर्शनं च अन्तर्भवति। वार्तायां कृषिः, पशुपालनं व्यापारः चेति विषये आलोचना भवति। दण्डनीतिः शासनस्य विज्ञानं यस्मिन् अपराधिकन्यायस्य ज्ञानं समावेशितम् अस्ति। मनुः, बृहस्पतिः तथा उष्णः उक्तवान् यत् विद्यालयेषु उपर्युक्तविषयाध्यनस्य व्यवस्था भवेत् क्षत्रियराजकुमाराणां कृते। तक्षशिलापाटलिपुत्रादिषु केषुचित् नगरेषु सार्वजनिकसैन्यविद्यालयाः आसन्। एकस्मिन् सैन्यमहाविद्यालये शताधिकाः राजकुमाराः सैन्यप्रशिक्षणं प्राप्तं शक्नुवन्ति स्म। राजपुत्राणां कृते सैन्यकलाप्रशिक्षणार्थं व्यावसायिकसैन्यप्रशिक्षकाः अपि उपलभ्यन्ते स्म। सार्वजनिकसैन्यविद्यालयाः प्रायः राजधानी परितः स्थिताः आसन्, तेषु व्यायामशालाः, तरणकुण्डाः, सैन्याभ्यासस्य विस्तृतं क्षेत्रं च प्रदत्तम् आसीत्। इतिहासः, पुराणम्, अर्थशास्त्रं, धर्मशास्त्रं, पञ्चतन्त्रं, हितोपदेशः, राजनीति, प्रशासनं, नागरिक-अपराधिकविधिः चेत्यादिविभिन्नसैद्धान्तिकविषयेषु व्याख्यानानि प्रायः

अपराह्णे प्रदत्तानि आसन्, प्रातःकालस्तु तु एथ्लेटिक्-सैन्याभ्यासार्थम् उपयुज्यते स्म। सङ्गीतं चित्रकला चेत्यादिललितकलाविद्याः अपि पाठ्यन्ते स्म। एतेषु राजविद्यालयेषु छात्राः आवासगृहेषु निवसन्ति स्म। अध्ययनकाले राजकुमाराः स्वगुरूणां निरीक्षणे एव दिनं यापयन्ति स्म। ब्राह्मणशिक्षकाः व्यावसायिकप्रशिक्षण-विषयान् व्यक्तेः समाजस्य च आवश्यकतानुसारं शिक्षयन्ति स्म। क्षत्रियाणां शिक्षा पूर्णतया ब्राह्मणगुरूणां मार्गदर्शने नियन्त्रणे च आसीत्। क्षत्रियस्य अध्यापनं निषिद्धमासीत्। ब्राह्मणानां रक्षणं सम्माननञ्च क्षत्रियाणां कर्तव्यम् आसीत्। सामान्यतः राज्ञा वेदेषु, षडङ्गेषु, राजनीतिशास्त्रेषु च निपुणो ब्राह्मणः राजपुत्राणां गुरुरूपेण नियुज्यते स्म। धार्मिक-नैतिक-बौद्धिकशिक्षाज्ञानाय पुरोहितस्य ब्राह्मणगुरोः समीपे ते राजकुमाराः प्रेष्यन्ते स्म। क्षत्रियाणामिव वैश्यानां शिक्षा अपि ब्राह्मणगुरूणां पूर्णनियन्त्रणे, पर्यवेक्षणे च आसीत्।

प्राचीने भारते वैदेशिकव्यापारस्य, सामुद्रिकक्रिया-कलापस्य च महान् विकासः अभवत्। वैश्यानां व्यापारे, पशुपालने कृषिविषये च विशेषयोग्यता, आकर्षणं च आसीत्। एतत्सर्वं तेषां विशेषवृत्तिरूपेण स्वीक्रियते स्म। अतः तेषां शिक्षाविषयाणां निर्णयः तेषां विशेषप्रवणतायाः, व्यवसायस्य च आधारेण भवति स्म। क्षत्रियराजकुमार इव वैश्यस्य कृते अपि ब्राह्मणगुरोः कठोरपर्यवेक्षणेन समुचितवयसि शिक्षा दीयते स्म।

प्रथमावस्थायाम् एकः युवा वैश्यः परिवारिकव्यापारे नियुक्तः सन् स्वपित्रा विविधव्यापारेषु उद्योगेषु च प्रशिक्षिते भवति स्म। तेषु कालेषु वैश्यस्य व्यवसायः जात्यानुसारं वंशानुगतः एव आसीत्। अतः वेदाध्ययनं विहाय वैश्ययुवकस्य शिक्षा गृहे एव आसीत्। प्राचीनभारतीयसाहित्येषु वणिक्-शिल्पिनाम् एतादृशानां श्रमिकसङ्घानाम् अनेके सन्दर्भाः सन्ति।

भारते प्राचीनकालात् एव चिकित्साविज्ञानस्य अध्यापनं भवति। स्ट्रेबोनामकः कश्चन ग्रीकलेखकः भारतीयवैद्यानां सामर्थ्यं प्रशंसति। वैदिकसाहित्यं, चरकसंहिता, सुश्रुतसंहिता चेत्यादयः ग्रन्थाः प्राचीनभारतीयचिकित्साशास्त्रस्य शल्यक्रियायाः च विषये अध्ययनं निर्दिशन्ति। अस्मिन् प्रसङ्गे केचन विषयाः -

१. तक्षशिला चिकित्साशिक्षायाः मुख्यकेन्द्रम् आसीत्। तक्षशिलां विहाय बनारस, उज्जयिणी, वैशाली, नालन्दा, पाटलिपुत्रः चेत्यादीनि चिकित्साशिक्षाकेन्द्राणि अपि आसन्। १९५३-तमे वर्षे पटनासमीपे कुम्हारे उत्खननेन ज्ञातं यत् आरोग्यविहार इति मठेन सह आरोग्यालयः अपि आसीत्। केषुचित् सन्दर्भेषु महाविद्यालयैः सह चिकित्सालयाः संलग्नाः आसन्।

२. चिकित्सायाः पाठ्यक्रमः अतीव दीर्घः आसीत्। अयं पाठ्यक्रमः षट्सप्तवर्षीयः आसीत्। अतीतभारतस्य प्रसिद्धतमस्य वैद्यस्य विम्बिसारस्य अवैधपुत्रः जीवकः सप्तवर्षपर्यन्तं तक्षशिलायां चिकित्साशास्त्रस्य शल्यक्रियायाश्च अध्ययनं कृतवान्। सः सम्भवतः भारतस्य प्रथमः शल्यचिकित्सकः अस्ति।

३. पाठ्यक्रमे शल्यक्रियायाम् औषधशास्त्रे च व्यावहारिकं प्रशिक्षणं अन्तर्भवति स्म।

४. शल्यक्रियायाः सफलता रोगनाशक-औषधानां प्रयोगे आश्रिता आसीत्।

५. प्राचीनभारते नारदः, अङ्गिरः, कपिलः, अतुलः, चरकः सुश्रुतः चैते चिकित्साशास्त्रस्य महान्तः आचार्याः आसन्। एते स्वस्वग्रन्थस्य कृते प्रसिद्धाः आसन्।

६. चिकित्साशास्त्रस्य छात्रस्य कृते संस्कृतभाषायाः उत्तमं ज्ञानम् आवश्यकं भवति स्म। यतोहि

चिकित्साशास्त्रस्य अधिकांशग्रन्थाः संस्कृतेन एव लिखिताः आसन्।

७. चिकित्साशास्त्रेषु प्रवेशविषये जातिप्रतिबन्धः नासीत्। यदि कश्चनः शूद्रः स्ववंशस्य, गुणस्य च शुद्धतायाः आधारेण योग्यः आसीत् तर्हि तस्मै आयुर्वेदस्य अध्ययने अपि प्रवेशानुमतिः दीयते स्म। एवं सर्वजातीयानां कृते आयुर्वेदस्य अध्ययनं मुक्तमासीत्।

प्राचीने भारते ये जनाः आयुर्वेदशास्त्रेषु अध्ययनं कुर्वन्ति स्म, तेषां पाठसमाप्तेः अनन्तरं तेषां वैद्यानां सैद्धान्तिकज्ञानस्य प्रयोगविषये शिक्षा प्रदीयते स्म। चिकित्साशास्त्रपाठ्यक्रमसमापनानन्तरं दीक्षान्तसम्बोधने स्नातकानां कृते व्यावसायिकाचरणस्य आदर्शानुसरणविषये ज्ञानं दीयते स्म। मानवजातेः हिताय तैः सर्वदा प्रयत्नः करणीयः। तैः आजीवनम् अध्ययनं संशोधनं च निरन्तरं कर्तव्यम्।

**पशुचिकित्साशिक्षा -** प्राचीने भारते पशुचिकित्सा-विज्ञानस्य अपि विकासः अभवत्। शालिहोत्रः अस्य पारम्परिकः संस्थापकः अस्ति। प्राचीनस्य भारतस्य राजानः स्व-सेनाविभागे बहुसंख्यकान् अश्वसैनिकान्, बहून् गजान् च स्थापयन्ति स्म। एतेषां पशूनां परिचर्यायां सेवायां च केचन पशुचिकित्सकाः चीयन्ते, यथा महाभारते वयं पश्यामः यत् पाण्डववीरद्वयं नकुलः सहदेवश्च पशुचिकित्सायां प्रवीणतां व्यावहारिकीं कुशलतां च प्राप्तवन्तौ। ई. पू. तृतीयशतके पशुचिकित्सकाः बहुधाः उपलभ्यन्ते स्म। अशोकस्य एकः शिलालेखः सूचयति यत् सः सम्पूर्णे देशे पशूनां कृते स्वचिकित्सालयेषु अनेकान् पशुचिकित्सकान् नियुक्तवान्। अर्थशास्त्रे कौटिल्यः स्वसैन्येषु अश्वगजरोगाणां चिकित्सायै राजाभिः पशुचिकित्सकानां नियुक्तिम् अनुशंसति।

**कलाशिल्पशिक्षा -** प्राचीने भारते कलाशिल्पप्रशिक्षणस्य दीर्घपरम्परा आसीत्। प्राचीनः हिन्दुसमाजः जातिवादेन पीडितः आसीत्। चतसृणां जातीनां स्वस्वव्यवसायाः आसन्। परन्तु कालान्तरे एताः जातयः (ब्राह्मणक्षत्रियवैश्यशूद्राः) अधिकविभक्ताः उपविभक्ताः च अभवन्। ब्राह्मणाः क्षत्रियाः च स्वस्य पारम्परिकं व्यवसायं निर्वाहयन्ति स्म। परन्तु वैश्याः बहुसंख्येन उपविभक्ताः, सामान्यजनैः सह मिश्रिताः च अभवन्। अनेन शिल्पकारः, चित्रकारः, वास्तुकारः, काष्ठकारः, कृषकः, वस्त्रकारः, स्वर्णकारः चेत्यादयः अनेकाः जातयः निर्मिताः। विभिन्नजातीयानां व्यवसायाः शिल्पाः च भिन्नाः आसन्। प्रत्येकेषु जातिषु व्यावसायिकं कौशलं विकसितं, वंशानुगतं च आसीत्। पुत्रः पितुः व्यवसायं स्वीकृतवान्। काष्ठकारस्य पुत्रः स्वाभाविकतया काष्ठकारः अभवत्। परन्तु बौद्धधर्मे जातिव्यवस्था नासीत्। अतः कोऽपि किमपि शिल्पं स्वीकर्तुं शक्नोति स्म। प्राचीनस्य भारतस्य ग्रामेषु जनाः सर्वे आत्मनिर्भराः आसन्। प्रत्येकं ग्रामः भिन्न-भिन्न- शिल्पकर्मसु युक्तः आसीत्। प्राचीनस्य भारतस्य ग्रामाः भारतस्य पारम्परिककलाशिल्पानां दुर्गाः आसन्, परन्तु नगरेषु अपि बहवः शिल्पिनः निवसन्ति स्म।

प्राचीने काले रथनिर्माणकला अत्यन्तं विकसिता आसीत्। नानादेवानां रथाः तत्र प्रकीर्तिताः। रथस्य नानाभागाः च नानानामसु प्रसिद्धाः। यथा- रथः, अक्षः, चक्रः, अरः, प्राधिः (चक्रस्य गोलभागः), नेमिः (प्राधेः उपरि गोलवृत्तः), कोशः (रथस्य आबन्धः), बन्धुरः गर्तः वा (रथस्य अन्तः आसनस्थानम्)।

मृत्तिकायाः धातुपात्राणां वा निर्माणस्य कार्यक्षमतायाः अपि बहु वृद्धिः अभवत् इति विभिन्नानां गृहोपकरणानां नाम्ना ज्ञायते। एतादृशानां पात्राणां नाम्नां विस्तृतसूची तत्र उपलभ्यते। कलशः, कुम्भः, उदककुम्भः, द्रोणकलशः, दृतिः (चर्मनिर्मितस्यूतः), सूर्पा (सुपादा), स्थानाली, दृषद्,

ताम्रपात्रं, कांस्यं चेत्यादीनि वस्तूनि उपलब्धानि आसन्। तस्मिन् काले रजतस्य, लौहस्य, ताम्रस्य, कांसस्य, सुवर्णस्य पात्राणि निर्मितानि भवन्ति स्म। ऊन-क्षौम-कर्पासादिभ्यः वस्त्राणि निर्मीयन्ते स्म। एतासु प्रशिक्षणकलासु ये प्रशिक्षिताः आसन् ते सर्वे प्रशिक्षणात् परं व्यवसायेषु युक्ताः भवन्ति स्म। तस्मिन् काले चिकित्सासु या ओषधिचिकित्सा विद्यते सा सम्पूर्णतो वनस्पतिविज्ञानम् उपजीव्यैव वर्तते। ओषधिचिकित्सया रोगः उपशम्यते। भेषजानि वनस्पतिभ्यः निर्मीयन्ते। अतो वनस्पतीनां महत्त्वं नाम गुणविपाकरसादीन् यदि न जानीयात् तर्हि चिकिसको ओषधीः निर्मातुं न शक्नुयात् असौ। किञ्च शल्यचिकित्सायाम् अपि वनस्पतीनाम् उपयोगो महान् विद्यते। अतः सफलचिकित्सकस्य कृते वनस्पतिविज्ञानम् अतीव आवश्यकम्। तस्मिन् काले योगस्य शिक्षाव्यवस्था आसीत्। महाभारते कथितमस्ति यत्- “नास्ति योगसमं बलम्”[4]। छात्राणां कृते योगस्य शिक्षा दीयते स्म। विद्यार्थिनः, क्रीडार्थिनः, सैन्याः सामूहिकरूपेण योगाभ्यासं कुर्वन्ति स्म। छात्राणां योगाभ्यासेन एकाग्रतायाः वृद्धिः भवति। अनेन योगाभ्यासेन बहूनां रोगाणां निराकरणं सम्भवति। अतः अस्य शिक्षां प्राप्य छात्राः भाविनि काले व्यवसायजीविकानिर्वाहं कुर्वन्ति स्म।

भारतीय-इतिहासस्य प्रारम्भिककाले कला-शिल्प-विषये समाजस्य सामान्यदृष्टिकोणः अतीव अनुकूलः आसीत्। तदानीन्तनकाले शिल्पीनां महान् समादरः क्रियते। ब्राह्मणः क्षत्रियश्च हस्तशिल्पीनां कृते सम्मानं ददाति स्म। प्राचीने भारते कृषकाः स्वं स्वं शष्यम् उत्पादयित्वा नगरेषु विक्रयं कुर्वन्ति स्म। प्राचीने काले कलाशिल्पानि राजानैः, महाकुलीनैः च चोद्यन्ते स्म, तेषु बहवः स्वकीयाः शिल्पिनः आसन्। अशोकस्य काले राजशिल्पिनः अपि नियुक्ताः आसन्। कठोर जाति व्यवस्था शिल्पपरम्परायाः संरक्षणाय साहाय्यं कृतवती। प्रत्येकस्य व्यापारविशेषस्य निपुणता कौशलं च पितुः पुत्रं प्रति प्रसारितम् आसीत् । जातिविशेषस्य प्रत्येकः शिल्पिः स्वकार्यं कर्तुं कर्तव्य आसीत्। पिता स्वपुत्राय यत् कौशलं स्वयम् आसीत तत् प्रदातुं बहु प्रीतिम् अकरोत्। कलाशिल्पप्रशिक्षणं प्रायः शिक्षावृत्ति-व्यवस्थायाः माध्यमेन दीयते स्म यत् कतिपयैः नियमैः नियन्त्रितम् आसीत् ।

प्राचीनसंस्कृतवाङ्मयात् ज्ञायते यत् तस्मिन् काले बहुविधानां कलानां शिक्षा दीयते स्म। तासां कलानां शिक्षां प्राप्य बालकाः बालिकाः च विद्यासमाप्तेः परं यदा संसारजीवनं प्रविशन्ति स्म तदा धनोपार्जनाय स्व-स्व व्यवसायेषु यथा- सङ्गीतं, नृत्यं, वाद्ययन्त्रवादनं, विभिन्नप्रकारस्य पेयस्य निर्माणस्य कला, द्यूतक्रीडा, पुष्पशय्या-मालानिर्माणकला, शौचालय-निर्माणस्य कौशलम्, उद्यानकार्यं, धनुर्विद्या, चित्रनिर्माणकला, मृत्तिका-पात्रनिर्माणं, रथनिर्माणं, रथचालनं, गज-अश्व-रथेषु आरुह्य युद्धे भागग्रहणं, कुपखननं, यन्त्राणां वाद्ययन्त्राणां च निर्माणं, सुवर्णस्य रजतस्य वा आभूषणनिर्माणं, चर्मरञ्जनस्य विज्ञानं, तरणकला, वस्त्रनिर्माणं, कर्षणं, सेचनविज्ञानम्, ज्योतिष-चर्चा, शास्त्रनिर्माणं, ग्रन्थरचना, पाण्डुलिपिलेखनकला, वास्तुशास्त्रं, पौरोहित्य-यागादिकर्म, गृहनिर्माणं च इत्यादिषु व्यवसायेषु युक्ताः भवन्ति।

पूर्वपालीग्रन्थेषु अष्टादशानां शिल्पकनाम् उल्लेखः आसीत्। कौटिल्यस्य अर्थशास्त्रे अपि विविधशिल्पानाम् उल्लेखः अस्ति। अर्थशास्त्रे कोषः, खननं, धातुविज्ञानं, कृषिः, नौकायानं, द्यूतः चेत्यादीनां विभिन्नानां कलाशिल्पविभागानां विवरणं दत्तमस्ति।

प्राचीनसंस्कृतवाङ्मये शिक्षा व्यावसायिकी अपि आसीत्। यद्यपि धार्मिकशिक्षायाः प्राधान्यम्

[4] महाभारतम्, १२/३०४/२

आसीत्, तथापि व्यावसायिकशिक्षायाः महत्त्वमासीत्। शिक्षकस्य छात्रस्य च मध्ये उष्णः पारिवारिकः सम्बन्धः आसीत्।

**सहायकग्रन्थसूची**


- दत्त, पं भागवत (२०१३), वैदिक वाङ्मय का इतिहास, श्री रामलाल कर्पुर ट्रस्ट, अमृतसर।
- रस्तोगी, सुमनलता (२०१०), वैदिक वाङ्मय की विस्तृत रूपरेखा, प्रतिभा प्रकाशन, दिल्ली।
- सक्सेना, एस.सी (२००८), व्यावसायिक शिक्षा के प्रारम्भिक सिद्धान्त, साहित्यभवन, आगरा।
- चौधरी, श्रीमती. रेखा (२०१७), व्यावसायिक शिक्षा निर्देशन, शिवांक प्रकाशन, ISBN No 978- 9383980444.
- सिंह, रामपाल (२०१७), शैक्षिक तथा व्यावसायिक निर्देशन, साहित्य भवन, आगरा।
- सिंह, अखण्ड प्रताप (२०१७), व्यावसायिकशिक्षा एवं प्रशिक्षण, शिवांक प्रकाशन
- कुलश्रेष्ठ, एस. पी, सिंघल, अनुपमा (२०११), शैक्षिक तकनीक के मूल आधार, अग्रवाल पब्लिकेशन, आगरा।
- शर्मा, डॉ.आर.ए. (२०१३), शिक्षण अधिसूचना एवं सम्प्रेषण तकनीकी, आर. लाल. बुक डिपो, मेरठ।

সবং সজনীকান্ত মহাবিদ্যালয়

তমসো মা জ্যোতির্গময়